

A DESCRIPTIVE CATALOGUE
OF THE
SANSKRIT MANUSCRIPTS
IN
H. H. THE MAHARAJAH'S PALACE LIBRARY
TRIVANDRUM.

EDITED

BY

K Sāmbaśiva Śāstrī,

Curator for the publication of Oriental Manuscripts,

TRIVANDRUM

Published under the authority
of the Government of

H H THE MAHARAJAH OF TRAVANCORE

VOL. V.

Stuti *(continued)*

PRINTED AT THE

V V PRESS BRANCH, TRIVANDRUM

1938

CONTENTS.

PREFACE

The present volume comprising descriptive notices of a special group of works falling under the denomination 'Stuti' commences from the Āditya-hrdayam (No 1147A) and ends with the Mahimnastava (No 1213 A18) It is remarkable in the light of its singularity inasmuch as it evinces the predilection for and interest in the systematic collection and preservation of a class of manuscripts which are so numerous and varied as could ill-afford to be noticed within the compass of this single volume The inclusion of innumerable works in most of the codices embodying as they do eminent treatises by renowned authors bespeaks in superabundant measure the significance of the collection A few extremely rare works such as Durgāstava and Mahākālāstaka by Krsnalīlāsukamuni deserve special attention A perusal of these manuscripts will not fail to bring home to the reader that considerable light is shed by them on the furtherance of research I have much pleasure in presenting this volume to the enlightened public.

Trivandrum,
5—8—1113.

K. Sāmbaśiva Śāstrī,
Curator

DETAILED CONTENTS

OF

WORKS NOTICED IN VOL. V.

STUTI *(continued)*



॥ श्री ॥

A DESCRIPTIVE CATALOGUE OF THE SANSKRIT MANUSCRIPTS IN H. H. THE MAHARAJA'S PALACE LIBRARY TRIVANDRUM

॥ स्तुतयः (अनुवृत्ताः) ॥

॥ आदित्यहृदयम् ॥

1147 A ĀDITYAHṚDAYAM

Substance—Palm leaf Size—$10\frac{1}{2}'' \times 2''$ Leaves—4 9 lines per page and 28 letters per line. Script—Malayālam No of Granthas—60

Subject—Glorification of *Āditya*

Beginning

श्रीगणपतये नमः ।

अर्जुन उवाच—
नारायण नरश्रेष्ठ पृच्छामि त्वां महायशाः ।
कथमादित्यमुद्यन्तमुपतिष्ठेत् सनातनम् ॥

श्रीभगवानुवाच—
साधु पार्थ महाबाहो बुद्धिमानसि पाण्डव ।
यन्मा पृच्छस्युपस्थानं तत् पवित्रं विभावसोः ॥
सर्वमङ्गलमङ्गल्यं सर्वपापप्रणाशनम् ।
सर्वरोगप्रशमनमायुर्वर्धनमुत्तमम् ॥
अमित्रदहनं पार्थ संग्रामे जयवर्धनम् ।
वर्धनं धनपुत्राणामादित्यहृदयं शृणु ॥

End

नास्त्यादित्यसमो धर्मो नास्त्यादित्यसमा गतिः ।
प्रत्यक्ष भगवान् देवो यत्र विश्वं प्रकीर्तितम् ॥
योऽधीते सूर्यहृदयं सततं सफलं भवेत् ।
अष्टानां ब्राह्मणानां च यो दद्यादिदमर्थवित् ॥
ब्रह्मलोकैषिणो वापि यत्र वै मानुषेऽपि वा ।
जातिस्मरत्वमाप्नोति शुद्धात्मा नात्र संशयः ॥

Colophon

इति आदित्यहृदयं समाप्तम् ।

Author—Vyāsa

Remarks—In RCMPL this work is designated as *Ādityahṛdaya* and as *Sūryopasthānavidhi*. Since the portion covering the *Sūryopasthāna* proves to be the beginning of the Āditya-

hrdaya, both are catalogued together The *Ādıtyahrdayamantıa* ıs ıa'zen from the Mahābhāıata Tnə appended composıtıon, *Lakṣmīstava*, [as pointed cıt ın RCMPL occuıs only afteı t'ıe Vāgīsıstava (1147 C) The *ślokas* seen ın a Fol at the end are quoted below

अभिप्रेतार्थसिद्ध्यर्थं पूजितो यः सुरैरपि ।
सर्वविघ्नच्छिदे तस्मै गणाधिपतये नमः ॥

गणानामधिपश्चण्डो गजवक्त्रस्त्रिलोचनः ।
प्रीतो भवतु मे नित्य वरदाता विनायकः ॥

सरस्वति नमस्तुभ्यं वरदे कामरूपिणि ।
विद्यारम्भं करिष्यामि सिद्धिर्भवतु मे सदा ॥

अवर्णा नादरूपेण त्रिवर्णा प्रणवात्मना ।
लिप्यात्मना च पञ्चाशद्वर्णा वन्दे सरस्वतीम् ॥

गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ।
गुरुरेव जगत् सर्वं तस्मै श्रीगुरवे नमः ॥

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥

व्यासाय विष्णुरूपाय व्यासरूपाय विष्णवे ।
नमो वै ब्रह्मनिधये वासिष्ठाय नमो नमः ॥

श्रेयोमार्गतिरोधानध्वान्तध्वंसैकहेतवे ।
पुरुषाय पुराणाय वेदव्यासात्मने नम. ॥

आनन्दमेकममृतमज विज्ञानमक्षरम् ।
असर्वं सर्वमभयं नमस्यामः प्रजापतिम् ॥

ध्येयाय भक्तमनसामपि भुक्तिमुक्त्यो-
वेदापगानिगमनिर्गमभूधराय ।
आद्यारविन्दनिलयाय नमो विधात्रे
सर्गप्रपञ्चलतिकाप्रथमाङ्कुराय ॥

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥
यज्ञेशाच्युत गोविन्द माधवानन्त केशव ।
कृष्ण विष्णो हृषीकेश नारायण नमोऽस्तु ते ॥
शरणं मे महादेव शरणं मे महेश्वर ।
शरणं पार्वतीनाथ शरणं भक्तवत्सल ॥
अन्यथा शरणं नास्ति त्वमेव शरणं मम ।
तस्मात् कारुण्यभावेन रक्ष रक्ष महेश्वर ।
अज्ञानाद्वा प्रमादाद्वा वैकल्यात् साधनस्य वा ॥
यन्न्यूनमतिरिक्तं च तत्सर्वं क्षन्तुमर्हसि ।
मनसा चिन्तितं यन्मे वाचा यद् भाषितं पुनः ।
कायेन (मत्? यत्)कृतं कर्म तत्तद् ब्रह्मार्पणं भवेत् ॥

॥ गणाष्टकम् ॥

1147 B GANĀSTAKAM.

Substance—Palm leaf Size—$10\frac{1}{2}'' \times 2''$ Leaf—$\frac{1}{2}$
9 lines per page and 30 letters per line.
Script—Malayalam No of Granthas—8 Complete

Subject—A panegyric of *Gaṇapati.*

Beginning

शिवम् ।

एकदन्तं महाकायं तप्तकाञ्चनसन्निभम् ।
लम्बोदर विशालाक्षं वन्देऽहं गणनायकम् ॥
मौञ्जीकृष्णाजिनधर नागयज्ञोपवीतिनम् ।
बालेन्दुशकलामौलि वन्देऽहं गणनायकम् ॥

End

सर्वविघ्नकरं देवं सर्वविघ्नविवर्जितम् ।
सर्वसिद्धिप्रदातारं वन्देऽहं गणनायकम् ॥
गणाष्टकमिदं पुण्य भक्तितो यः पठेन्नरः ।
सर्वकामानवाप्नोति रुद्रलोकं म गच्छति ॥

Colophon

गणाष्टकं समाप्तम् ।

Author

Remarks—The Ms is fairly accurate

॥ वागीशीस्तवः ॥

1147 C VĀGĪŚĪSTAVA

Substance—Palm leaf Size—$10\frac{1}{2}'' \times 2''$ Leaf—1. 9 lines per page and 32 letters per line Script—Malayālam No of Granthas—18 Complete

Subject—Glorification of *Sarasvatī*.

Beginning

अमलकमलाधिवासिनि मनसो वैमल्यदायिनि मनोज्ञे ।
सुन्दरगात्रि सुशीले तव चरणाम्भोरुहं नमामि सदा ॥
अचलात्मजा च दुर्गा कमला त्रिपुरेति भेदिता जगति ।
या सा त्वमेव वाचामीश्वरि सर्वात्मना प्रसीद मम ॥

End

त्वच्चरणसरसिजन्मास्थितिसहितधियां न लिप्यते दोषः ।
भगवति भक्तिमतस्त्वयि परमां परमेश्वरि प्रसीद मम ॥
वागीशास्तवमिति यो जपार्चनाहवनवृत्तिषु प्रजपेत् ।
स तु विमलचित्तवृत्तिर्देहापदि नित्यशुद्धमेति पदम् ॥

Colophon

इति वागीश्वरीस्तवः समाप्तः ।

Author

Remarks—Same as No. 1147 B

॥ लक्ष्मीस्तवः ॥

1147 D LAKSMĪSTAVA

Substance—Palm leaf Size—$10\frac{1}{2}'' \times 2''$ Leaf—$\frac{1}{2}$ 9 lines per page and 32 letters per line Script—Malayālam. No of Granthas—15 Complete

Subject—A panegyric of *Laksmī*

Beginning

अङ्गं हरेः पुलकभूषणमाश्रयन्ती
भृङ्गाङ्गनेव मुकुलाभरणं तमालम् ॥
अङ्गीकृताखिलविभूतिरपाङ्गलीला
मङ्गल्यदास्तु मम मङ्गलदेवतायाः ॥
मुग्धा मुहुर्विदधती वदने मुरारेः
प्रेमत्रपाप्रणिहितानि गतागतानि ।
माला दृशोर्मधुकरीव महोत्पले या
सा मे श्रियं दिशतु सागरसम्भवायाः ॥

End

नमोऽस्तु हेमाम्बुजपीठिकायै नमोऽस्तु भूमण्डलनायिकायै ।
नमोऽस्तु देवादिदयापरायै नमोऽस्तु शार्ङ्गायुधवल्लभायै ॥
स्तुवन्ति ये स्तुतिभिरमूभिरन्वहं
त्रयीमयीं त्रिभुवनमातरं रमाम् ।
गुणाधिका गुरुधनधान्यभागिनो
भवन्तु ते भवमनुभाविताशयाः ॥

Colophon

Author—Śankarācārya

Remarks—It is clear from the introductory portion of the text that the work is the well-known *Kanakadhārāstava*

॥ सौराष्टकम् ॥

1147 E. SAURĀṢṬAKAM

Substance—Palm leaf Size—$10\frac{1}{2}'' \times 2''$ Leaf—$\frac{1}{2}$

9 lines per page and 32 letters per line
Script—Malayālam No of Granthas—15
Complete

Subject—A panegyric of *Sūrya*

Beginning

उदयाद्रिमस्तकमहामणि लसत्-
कमलाकरैकसुहृदं महौजसम् ।
गदपङ्कशोषणमघौघनाशनं
शरणं गतोऽस्मि रविमंशुमालिनम् ॥

दिनरात्रिभेदकरमद्भुतं पर
सुरवृन्दसंस्तुतचरित्रमव्ययम् ।
गदपङ्कशोषणमघौघनाशन
शरणं गतोऽस्मि रविमशुमालिनम् ॥

End

इति सौरमष्टकमहर्मुखे रवि
प्रणिपत्य यः पठति भक्तितो नरः ।
स विमुच्यते सकलरोगकल्मषैः
सवितुः समीपमपि सम्यगाप्नुयात् ॥

Colophon
Author
Remarks—The latter half in each verse is the same throughout except in the last

---

॥ सौराष्टकम् ॥

1147 F. SAURĀSTAKAM.

Substance—Palm leaf Size—$10\frac{1}{2}'' \times 2''$ Leaf—1.
8 lines per page and 32 letters per line

Script — Malayāḷam No of Granthas—15
Complete

Subject—Same as No 1147 E

Beginning

त्रैलोक्यवन्द्यैर्मुनिदेववृन्दै-
गनन्दिभिर्वन्द्यपदारविन्दम् ।
अनिन्द्यमानन्दकरं दुरापं
वन्दे जनानामरविन्दबन्धुम् ॥
ध्वान्तं समस्तं सततं नयन्तं
नितान्तदुर्दान्तमनन्तमन्तम् ।
वसन्तमन्तःकरणे मुनीनां
शान्ते लसन्तं तपनं नमामि ॥
नमः सवित्रे जगदेकचक्षुषे
जगत्प्रसूतिस्थितिनाशहेतवे ।
त्रयीमयाय त्रिगुणात्मधारिणे
विरिञ्चिनारायणशङ्करात्मने ॥
शुकतुण्डच्छवि तरुणं चण्डरुचः पुण्डरीकवनबन्धोः ।
मण्डलमुदितं वन्दे कुण्डलमाखण्डलाशायाः ॥
उदयाचलगाम्भीर्यं कुर्वाणाय दिने दिने ।
कमलाकरमित्राय श्रीसूर्याय नमो नमः ॥
वैनतेयसहायन्त्रे सप्तवाहाय भास्वते ।
जगद्गुणकृते तस्मै श्रीसूर्याय नमो नमः ॥

End

नीरोगाः सन्ति यद्भक्त्या जीर्णाङ्गाः सर्वजन्तवः ।

तस्मै देवादिदेवाय श्रीसूर्याय नमो नमः ॥
सौरमष्टकमेतद् यः प्रातरुत्त्वा दिने दिने ।
नमस्करोति भास्वन्तं तन्मण्डलमवाप्नुयात् ॥

Colophon

Author

Remarks—This panegyric of Sūrya is different from the one already noticed under No 1147 E In the beginning, two verses are composed in praise of *Sūrya* and one, of *Mandala*, in addition to the Astaka.

॥ अर्धनारीशस्तवः ॥

1147 G ARDHANĀRĪSASTAVA

Substance—Palm leaf Size—10½" × 2" Leaf—½
9 lines per page and 32 letters per line Script—Malayālam No of Granthas—10 Complete
Subject—A panegyric of *Śiva*

Beginning

वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥
अनादिविद्याससारप्रवर्तकनिवर्तकौ ।
विश्वस्य पितरौ वन्दे पार्वतीपरमेश्वरौ ॥

End

अन्योन्यालिङ्गनोद्भूतपरमानन्दनिर्वृतौ ।
सर्वानन्दकरौ वन्दे पार्वतीपरमेश्वरौ ॥

Colophon

Author:

Remarks—Same as No 1147 B.

॥ दुर्गाकवचम् ॥

1147 H DURGĀKAVACAM

Substance—Palm leaf Size—$10\frac{1}{2}'' \times 2''$ Leaf—1
8 lines per page and 28 letters per line
Script—Malayalam No of Granthas—10.
Complete

Subject—A panegyric of *Durgā*

Beginning

सर्वमङ्गल्यमङ्गल्यं सर्वपापप्रणाशनम् ।
सर्वरोगप्रशमनमायुर्वर्धनमुत्तमम् ॥
जयावहामिदं पुण्य पवित्रमभयप्रदम् ।
यज्जप्त्वा सर्वपापेभ्यो मुच्यते नात्र संशयः ॥
जया मे अग्रतः स्थातु विजया स्थातु पृष्ठतः ।
वामपार्श्वे जया स्थातु दक्षिणेऽप्यपराजिता ॥

End.

इदं तु दौर्गं कवचं सर्वरक्षाकरं परम् ।
द्यूते वा व्यवहारे वा जले सङ्ग्राममूर्धनि ॥
बन्धने व्यसने राज्ञो जपेन्मन्त्रं तु मानसम् ।
अभयानि भवन्त्येव भयानि सकलान्यपि ॥

Colophon

Author

Remarks—Same as No 1147 B

॥ गौरीदशकम् ॥

2147 I GAURĪDAŚAKAM

Substance—Palm leaf Size—$10\frac{1}{2}'' \times 2''$ Leaves—$1\frac{1}{2}$
9 lines per page and 24 letters per line
Script — Malayālam No of Granthas — 18
Complete

Subject—Same as No 1147 H

Beginning

हरिः । गणपतये नमः ।

लीलारब्धस्थापितलुप्ताखिललोकां
लोकातीतैर्योगिभिरन्तश्चिरमृग्याम् ।
बालादित्यश्रेणिसमानद्युतिपुञ्जां
गौरीमम्बामम्बुरुहाक्षीमहमीडे ॥

प्रत्याहारध्यानसमाधिस्थितिभाजां
नित्य चित्ते निर्वृतिकाष्ठां कलयन्तीम् ।
सत्यज्ञानानन्दमयी तां तनुमध्यां
गौरीमम्बामम्बुरुहाक्षीमहमीडे ॥

End

प्रातः काले भावविशुद्धिप्रणिधानो
भक्त्या नित्यं जप्यति गौरीदशकं यः ।

वाचां सिद्धिं सम्पदमुच्चैश्शिवभक्तिं
तस्यावश्यं पर्वतपुत्री विदधाति ॥

Colophon

हरिः। गौरिदशकम्।

Author

Remarks—The work is identical with No 9584, DCSM Madras, Vol XVIII But the variants are noteworthy

---

॥ कृष्णद्वैपायनाष्टकम् ॥

1147 J . KRSNADVAIPĀYANĀSTAKAM

Substance—Palm leaf Size—$10\frac{1}{2}'' \times 2''$ Leaf—1 8 lines per page and 26 letters per line Script —Malayalam. No of Granthas—9 Complete

Subject—A panegyric of *Vedāvyāsa*

Beginning

एक सर्वमहर्षीणामेकं वेदाब्धिपारगम् ।
एकान्तिनमहं वन्दे कृष्णद्वैपायनं हरिम् ॥
द्वीपे च द्वापरे जातं द्वन्द्वातीतं द्विजर्षभम् ।
द्वैतप्रध्वंसकं वन्दे कृष्णद्वैपायनं हरिम् ॥

End

अष्टैश्वर्यगुणोपेतं तीर्णतत्त्वाष्टकार्णवम् ।
अष्टाङ्गयोगिनं वन्दे कृष्णद्वैपायनं हरिम् ॥

इद ज्ञानघनाख्यात जप्त द्वैपायनाष्टकम् ।
यो यामारभते विद्यां तस्याः पार स गच्छति ॥
नमश्शिवाय ।

Colophon

Author—Jñānaghana

Remarks—The final verse discloses the author's name

॥ दक्षिणामूर्तिस्तवः ॥

1147 K DAKSINĀMŪRTISTAVA

Substance—Palm leaf Size—10½" × 2" Leaves—2. 9 lines per page and 26 letters per line Script—Malayālam No. of Granthas—25. Complete

Subject—A panegyric of *Śiva*

Author—Krsnalīlāśukamuni

Remarks—The work has been published as No 2 in TSS. The following additional verse is cited at the beginning

मुद्रां भद्राक्षदात्रीं सपरशुहरिणां बाहुभिर्बाहुमेकं
जान्वासक्तं दधानो भुजगवरसमाबद्धकक्षो वटाधः ।
आसीनश्चन्द्रखण्डप्रतिघटितजटः क्षीरगौरस्त्रिणेत्रो
दद्यादाद्यैः शुकाद्यैर्मुनिभिरभिवृतो भावशुद्धिं भवो वः ॥

॥ शिवस्तवः ॥

1147 L ŚIVASTAVA

Substance—Palm leaf Size—$10\frac{1}{2}'' \times 2''$ Leaf—1
9 lines per page and 32 letters per line
Script—Malayālam No of Granthas—20
Complete

Subject—A panegyric of *Śiva*

Beginning

शुभमस्तु ।

एकं निष्कलमचलं संमक्तद्वादशान्तमतिशान्तम् ।
ज्योतिर्विज्ञानमय परात्पर पावन शिव वन्दे ॥
द्वेधा शक्त्या युक्तं पुरुषप्रकृतिप्रकाशभेदेन ।
अग्नीषोमात्मान जगत्प्रसूति महेश्वर वन्दे ॥

End.

करधृतशूलकपालं भमितसिताङ्गं त्रिलोचनं जटिलम् ।
भीषणवृतृवर(?)निलयं नीलग्रीवं दिगम्बरं वन्दे ॥

वन्दे रुद्रं वरदममल दण्डिन मुण्डधारि
दिव्यज्ञानं त्रिपुरदहनं तं शिव शूलपाणिम् ।
तेजोमूर्तिं त्रिभुवनगुरु तीर्थमौलि त्रिणेत्रं
कैलासस्थ धनपतिसखं पार्वतीनाथमीशम् ॥

Colophon

नमश्शिवाय । स्वस्त्यस्तु । शुभमस्तु । मङ्गलानि सन्तु ।

Author

Remarks—*Sadāśivāstaka* and *Śivastava* are not

included in this codex though noted in RCMPL The opening verse is identical with that in R No 11237, DCSM Madras, Vol XIX in which the work is attributed to Śankarācārya But the closing verses are different

---

॥ महिम्नःस्तवः ॥

1147 M MAHIMNAHSTAVA

Substance—Palm leaf Size—$10\frac{1}{2}'' \times 2'$ Leaves—4 9 lines per page and 32 letters per line Script—Malayālam No of Granthas—75 Complete

Subject—Beginning—Same as No 1146 D

End

कृशपरिणतिचेतः क्लेशवश्यं क्वचेदं
क्व च तव गुणसीमोल्लङ्घिनी शश्वदृद्धिः ।
इति चकितममन्दीकृत्य मां भक्तिराधाद्
वरद चरणयोस्ते वाक्यपुष्पोपहारम् ॥

Colophon

महिमापारस्तवः समाप्तः ।
वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥

Author—Puṣpadanta.

Remarks—The work is printed in Bombay The printed edition differs much from this work The *slokas* quoted after the concluding verse in the printed edition are omitted in this codex



॥ अन्नपूर्णास्तवः ॥

1147 N ANNAPŪRṆĀSTAVA

Substance—Palm leaf Size—$10\frac{1}{2}'' \times 2''$ Leaf—1 9 lines per page and 38 letters per line Script—Malayalam No of Granthas—22

Subject—Same as No 1147 H

Beginning

हरिः ।

भगवति भवरोगात् पीडितं दुष्कृतोत्थात्
सुतदुहितृकलत्रोपद्रवेणानुयातम् ।
विलसदमृतदृष्ट्या वीक्ष्य विभ्रान्तचित्तं
सकलभुवनमातस्त्राहि मामो नमस्ते ॥

माहेश्वरीमाश्रितकल्पवल्लीमहं भवच्छेदकरीं भवानीम् ।
क्षुधार्तजायातनयाद्युपेतस्त्वामन्नपूर्णे शरणं प्रपद्ये ॥

End

वामे माणिक्यपात्रं मधुरसभरितं बिभ्रती पाणिपद्मे
दिव्यैरन्नैः प्रपूर्णं धृतमणिवलये दक्षिणे रत्नदर्वीम् ।

रक्ताङ्गी पीनतुङ्गस्तनभरविलसत्तारहारां त्रिणेत्रा
वन्दे पूर्णेन्दुबिम्बप्रतिविधिवदनामम्बिकामन्नपूर्णाम् ॥

Colophon

Author

Remarks—This work is quite different from the printed edition In RC, MPL it is not mentioned R No 10703 designated *Annapūrṇāstotra* (DCSM Madras, Vol XIX) seems to be an identical work But the verses in the end quoted therein are missing in this Ms

---

॥ शिवस्तवः ॥

1147 O ŚIVASTAVA

Substance—Palm leaf Size—$10\frac{1}{2}'' \times 2''$ Leaf—1 9 lines per page and 36 letters per line Script—Malayālam No of Granthas—20

Subject—Same as No 1147 L

Beginning

हर हर जय जय महादेव महाकालास्पद महाकालगल नाकौकःप्रत्यनीकनाशकर नारायणप्रिय नारदोपगीयमानशुभचरित नागेन्द्रकृत्तिनिर्वर्त्तितोत्तरीय त्रिभुवनभवनातिमिरहरण विशददशशतकरकरनिकरविकासिततरुणसरसिजदलसदृशनयन त्रिशूलधर त्रिपुरहर

End

विबुधयुवतिजनानन्दन प्रणतभक्तजनार्तिविनाशन वरद वा-
मेदव समस्तलोकैकनाथ शिवकर शिव नमस्ते नमस्ते ।

नमस्तुङ्गशिरश्चुम्बिचन्द्रचामरचारवे ।
त्रैलोक्यनगरारम्भमूलस्तम्भाय शम्भवे ॥

नमश्शिवाय नमः । हर हर नमश्शिवाय नमः ।

Colophon

Author

Remarks—This panegyric is not noticed in RC, MPL It is composed in the form of a *Dandaka*

॥ छायाविंशतिः ॥

1147 P CHĀYĀVIMSATI

Substance—Palm leaf Size—10½″ × 2″ Leaves—3 9 lines per page and 28 letters per line Script—Malayālam No of Granthas—45 Complete

Subject—Same as No 1147 H

Beginning

श्रीगणपतये नमः । अविघ्नमस्तु ।

गुरूणां विद्यासौ स्फुरितकरुणोदन्वदुदित-
प्रभावेन्दुज्योत्स्ना हृदयकुमुदो(द्भेदे?द्बोध)नपटुः ।

यया सूक्तिस्रोतःस्रवदमृतया ध्वस्ततमसा
प्रकाश्यन्ते सर्वा अपि सपदि शास्त्रार्थककुभः ॥
अनीशामीशानी वदति निरयाणां प्रशमदो
गुरुः कल्याणी यामथ च सकलाँ पूर्वपरगाम् ।
सिता पीता रागोज्ज्वलिततनुरुद्गारसहिता
विचित्रा प्रोक्ता सा मनसि रमतां मे भगवती ॥

End

श्रियं पृष्ठे कृत्वा हृदि तव पदाम्भोजयुगलीं
वय वाणीपुष्पैः स्रजमरचयाम स्तुतिमयीम् ।
स्वयं गृह्णीष्वैनां शरणमनुगृह्णातु भवती
मदीया भूयास्म(?) त्वयि भवतु भक्तिः स्थिरतरा ॥

सदा सूक्तिध्यानामृतरसनिषेकोत्थपुलक-
प्ररोहा स्वान्ते त्वत्पदकिसलयं देवि दधती ।
स्फुरन्त्येवाभीष्टश्चुलुकपुटिकाकोमलपुट-
स्फुरत्पूजापुष्पान्वय(स?)समुदिता भक्तिलतिका ॥

Colophon

छायाविंशतिः सम्पूर्णा ।

Author

Remarks—Same as No 1147 B

॥ सिद्धसारस्वतस्तवः ॥

1147 Q SIDDHASĀRASVATASTAVA

Substance—Palm leaf Size—10½″ × 2″ Leaves—5
9 lines per page and 32 letters per line
Script — Malayālam No of Granthas — 90,
Complete

Subject—Same as No 1147 H.

Beginning

श्रीगणपतये नमः । अविघ्नमस्तु ।

ऐन्दव्या कलयावतंसितशिरोविस्तारि नादात्मक
तद्रूपं जननि स्मरामि परमं सन्मात्रमेकं तव ।
यद्वोदेति पराभिधा भगवती भासां हि नाम्नां पद
पश्यन्तीमनु मध्यमा विहरति स्वैर च सा वैखरी ॥

आदिक्षान्तविलासलालसतया नाम्नां तुरीया तु या
क्रोडीकृत्य जगत्त्रय विभजते वेदादिविद्यामयी ।
तां वाचं मयि सम्प्रसारय सुधाकल्लोलकोलाहल-
क्रीडाकर्णनवर्णनीयकवितासाम्राज्यसिद्धिप्रदाम् ॥

End

एव त्वाममृतेश्वरीमनुदिन राकानिशाकामुक-
स्वान्ते सन्ततभासमानवपुषं साक्षाद् यजन्ते तु ये ।
ते मृत्योः कबलीकृतत्रिभुवनाभोगस्य मौलौ पद
दत्त्वा भोगमहोदधौ निरवधि क्रीडन्ति तैस्तैः सुखैः ॥

त्वं मातापितरौ त्वमेव सुहृदस्त्व भ्रातरस्त्वं सखा
त्व विद्या त्वमुदारकीर्तिभरितस्त्वं भाग्यमत्यद्भुतम् ।
किं भूयस्सकलं त्वमीहितमिति ज्ञात्वा कृपाकोमळे
श्रीकामेश्वरि सम्प्रसीद शरणं मातः परं नास्ति मे ॥

Colophon

पृथ्वीधराचार्यकृतं स्तोत्र श्रोत्रमनोहरम् ।
सिद्धसारस्वतं नाम कृच्छ्राल्लब्ध्वाहमालिखम् ॥

Author—Pṛthvīdharācārya

Remarks—Same as No 1147 B

॥ त्रिपुराम्बास्तवः ॥

1147 R TRIPURĀMBĀSTAVA

Substance—Palm leaf Size—$10\frac{1}{2}'' \times 2''$ Leaves—7 9 lines per page and 32 letters per line Script —Malayālam No of Granthas—125

Subject—Same as No 1147 I

Beginning

श्रीगणपतये नमः ।

श्रीमातस्त्रिपुरे परात्परतरे देवि त्रिलोकीमहा
सौन्दर्यार्णवमन्थनोद्भवसुधाप्राचुर्यवर्योज्ज्वलम् ।
उद्यद्भानुसहस्रनूतनजपापुष्पप्रभं ते वपुः
स्वान्ते मे स्फुरतु त्रिलोकानिलयं ज्योतिर्मयं वाङ्मयम् ॥

आदिक्षान्तसमस्तवर्णसुमणिप्रोते वितानप्रभे
ब्रह्मादिप्रतिमादिकीलितषडाधाराब्जकक्ष्योन्नते ।
ब्रह्माण्डाण्डमहासने जननि ते मूर्तिं भजे चिन्मयीं
सौषुम्नायनपारपङ्कजमहामध्यात्रिकोणास्थिताम् ॥

End

इति त्रिपुरसुन्दरीस्तुतिमिमां पठेद् यः सुधीः
स सर्वदुरिताटवीपटलचण्डदावानलः ।
भवेन्म(न)मि वाञ्छितप्रथितसिद्धि....भवे-
दनेकविधसम्पदां पदमनन्यतुल्यो भवेत् ॥

पृथ्वीपालप्रकटमकुटस्रग्रजोरञ्जिताङ्घ्रि-
र्विद्वत्पूजानुतिनातिममाराधितो बाधितारिः ।
विद्याः सर्वाः कलयति हृदा व्याकरोति प्रवाचा
लोकाश्चर्यैर्नवनवपदैरिन्दुबिम्बप्रकाशैः ॥

भूष्यं वैदुष्यमुद्यद्दिनकरकिरणाकारमाकारतेजः
सुज्ञानं भूरिमानं निजतनुकलनं दुर्गमं योगमार्गम् ।
आयुष्यं ब्रह्मपोष्यं हरगिरिविशदां कीर्तिमभ्येत्य भूमौ
देहान्ते ब्रह्म पारं परशिवचरणाकारमभ्येति विद्वान् ॥

Colophon

दुर्वाससा महितदिव्यमुनीश्वरेण
विद्याकलायुवतिमन्मथमूर्तिनैनत ।
स्तोत्रं व्यधायि रुचिरं त्रिपुराम्बिकाया
वेदागमोक्तपटलीविदितैकमूर्तेः ॥

सदस(द)नुग्रहनिग्रहगृहीतयतिविग्रहो भगवान् ।
सर्वासामुपनिषदां दुर्वासा जयति देशिकः प्रथमः ॥

Author—Durvāsas

Remarks—The work is printed in Bombay No 10758, DCSM Madras, Vol XIX is identical with this work

॥ कार्तवीर्यार्जुनकवचम् ॥

1147 S KĀRTAVĪRYĀRJUNAKAVACAM.

Substance—Palm leaf Size—$10\frac{1}{2}'' \times 2''$ Leaves—8. 9—10 lines per page and 36 letters per line Script — Malayālam No of Granthas—160 Complete

Subject—An amulet to ward off misfortunes.

Beginning

शिवम् ।

देव्युवाच—

देवादिदेव सर्वज्ञ सर्वभूतहिते रत ।

केन रक्षा भवेन्नृणां भूतानां विविधापदि ॥

राजचोरारिपीडासु शस्त्राग्निविषपातने ।

मारीदुःस्वप्नपीडासु ग्रहचोरभयेषु च ॥

ज्वरापस्मारपीडासु सिंहव्याघ्रनिपातने ।

राक्षसासुरवेतालपिशाचप्रेतपातने ॥

महाभये महानाशे महानावगतेऽर्णवे ।

महामृत्युभये घोरे महाकलहपातने ॥

केनोपायेन शान्तिः स्यात् साधकाना महेश्वर ।

अनष्टद्रव्यरक्षा च नष्टस्य पुनरागा(मे?गः) ॥

सर्वाकर्षणसंक्षोभसर्वसंवर्धनं तथा ।

भवत्यभीष्ट जन्तूनां केन तद् वद मे शिव ॥

ईश्वर उवाच—

शृणु गुह्यं महादेवि गोपनीयं प्रयत्नतः ।

अवाच्यमपि वक्ष्यामि सर्वलोकहिताय वै ॥

कवच कार्तवीर्यस्य साङ्गावरणक क्रमात् ।

End

कवचेनावृतो भूत्वा योगध्यानं समुद्धरेत् ।

यथोक्तं लभते सद्यः फल वज्रतनुर्भवेत् ॥

यथा तथेदं कवचं कस्यचिन्न प्रकाशयेत् ।

गोपनीयं प्रयत्नेन शिवस्य वचनं तथा ॥

सुभक्ताय सुशिष्याय दद्यात् सर्वस्वदायिने ।
साधकानां हितार्थाय यदुक्तं चन्द्रमौलिना ॥
कार्तवीर्यस्य कवचं यदुक्तं वै मया तव ।
येन संवर्धितो देहः कालेनापि न जीर्यते ॥

Colophon

इत्योड्डामरेश्वरे तन्त्रे कार्तवीर्यकवचं नाम द्वादशोऽध्यायः ।
इति श्रीकार्तवीर्यार्जुनकवचं समाप्तम् ।
श्रीकार्तवीर्यार्जुनाय नमः ।

Author

Remarks—The work is printed in Bombay The text is borrowed from *Uddāmareśvaratantra*

॥ मयूरशतकम् ॥

1147 T MAYŪRAŚATAKAM

Substance—Palm leaf Size—$10\frac{1}{2}'' \times 2''$ Leaves—23 7—8 lines per page and 24 letters per line Script—Malayālam No of Granthas—260 Complete

Subject—Glorification of Sūrya

Beginning

श्रीमहागणपतये नमः । अविघ्नमस्तु ।
जम्भारातीभकुम्भोद्भवमिव दधतः सान्द्रसिन्दूररेणुं
रक्ताः सिक्ता इवौघैरुदयगिरितटीधातुधाराद्रवस्य ।

आयान्त्या तुल्यकालं कमलवनरुचेवारुणा वो विभूत्यै
भूयासुर्भासयन्तो भुवनमभिनवा भानवो भानवीयाः ॥

End

चत्वारिंशत् प्रभायास्त्रिभिरधिकमथो वाजिनां षट्कमेकं
पश्चान्नेतुर्द्विषट्क पुनरपि च दश स्यन्दनस्यैकयुक्तम् ।
भूयोऽष्टौ मण्डलस्य स्तुतिरपि च रवेर्विंशतिः श्रीमयूरा-
दित्थं जातं पठेद् यः शतकमनुदिनं सूर्यसायुज्यमेति ॥

Colophon

श्लोका लोकस्य भूत्यै शतमिति रचिताः श्रीमयूरेण भक्त्या
युक्तश्चैतान् पठेद् यः सकृदपि पुरुषः सर्वपापैर्विमुक्तः ।
आरोग्यं सत्कवित्वं श्रियमतुलबल कान्तिमायुःप्रकर्षं
विद्यामैश्वर्यमर्थं सुखमपि लभते सोऽत्र सूर्यप्रसादात् ॥

हरिः । शतक समाप्तम् ।
श्रीसूर्याय नमः ।

अन्यथा शरणं नास्ति त्वमेव शरणं मम ।
तस्मात् कारुण्यभावेन रक्ष रक्ष दिवाकर ॥
दिवाकराय दिवाकराय नमो नमः ।

Author—Mayūra

Remarks—The work is printed in N S Press, Bombay It is well-known under the title *Sūryaśataka* The descriptions of the Sun's chariot etc are embodied herein.

॥ नवग्रहनवकम् ॥

1147 U NAVAGRAHANAVAKAM.

Substance—Palm leaf Size—10½" × 2" Leaf—1
11 lines per page and 32 letters per line
Script—Malayalam No of Granthas—20
Complete

Subject—A panegyric of the nine *Grahas*

Beginning

गणपतये नमः ।

अविघ्नविघ्नं गजरूपधारिणं
त्रिलोचनं त्रिषु लोकेषु पूजितम् ।
उमात्मजं सर्वगणेश्वरं प्रभुं
विनायकं सदा शरणमहं प्रपद्ये ॥

पद्मोद्भवं वेदनिधिं पुराणं
ब्रह्मागमीशं जगतः प्रणम्य ।
स्तोत्रं प्रवक्ष्ये प्रयतो ग्रहाणां
येन स्तुतास्तुष्टिकरा भवन्ति ॥

दिवाकरं दीप्तसहस्ररश्मिं
तेजोमयं जगतः कर्मसाक्षिम् ।
अंशुं भानुं सूर्यमादिं ग्रहाणां
रविं सदा शरणमहं प्रपद्ये ॥

End

इमं स्तवं व्यासेन प्रणीतं
ये श्रद्दधानाः सन्ध्याकाले पठन्ति ।
तेषां ग्रहाणां विषमस्थघोराः
स्तुतानुग्रहाः सार्वकालं भजन्ति ॥ (१)

आयुश्च विद्या च तथा सुखं च
धर्मार्थलाभौ बहुपुत्रतां च ।
शत्रुक्षयं राजसुपूजितं च
स्तुतानुग्रहाः सार्वकालं भजन्ति ॥

Colophon

ग्रहस्तोत्रं समाप्तम् ।

Author—Vyāsamuni

Remarks—The Ms is identical with No 9530, DCSM Madras, Vol XVIII The opening verse is missing in it

---

॥ धन्वन्तरिदशकम् ॥

1147 V DHANVANTARĪDAŚAKAM

Substance—Palm leaf Size—10½″ × 2″ Leaf—1 9 lines per page and 32 letters per line Script—Malayālam No of Granthas—15. Complete

Subject—A panegyric of *Dhanvantari*

Beginning

हरिः ।

व्याध्यादितत्त्वज्ञतया विशिष्टश्चिकित्सको यः सुतरां प्रसिद्धः ।
भिषक्तमोऽसौ भिषजां प्रधानो धुनोतु धन्वन्तरिरस्मदंहः ॥
सशङ्खचक्रामृतपूर्णकुम्भं जलौकसं सम्भृतभेषजौघम् ।
जगद्रिरक्षुर्दयया दधानो धुनोतु धन्वन्तरिरस्मदंहः ॥

यस्यादिमर्तैर्गमितप्रमादान् प्रह्लादमुख्याः प्रभवन्ति मैत्रे ।
विपत्सु चानन्दधिया प्रपन्ना धुनोतु धन्वन्तरिरस्मदंहः ॥

End

रुजा त्रिवक्रामनुलेपदानप्रमादिनो यो भगवान् यथावत् ।
चकार मद्यो रमणीयरूपां धुनोतु धन्वन्तरिरस्मदहः ।
अनेकजन्मार्जितदुष्कृतान्धं नमामि यन्नाम निगद्यमानम् ।
मुष्णाति सम्यक् सवितेव साक्षाद् धुनोतु धन्वन्तरिरस्मदहः ॥
पुराणभूतादिकथाप्रसङ्गद्वारेण विष्णोः स्मरणानुभावात् ।
पुनामि चात्मानमितीव मत्वा वद्धानि पद्यानि पठन् विरुक् स्यात् ॥

Colophon

Author

Remarks—The refrain in the closing lines of all stanzas is noteworthy



॥ विंशतिस्तवः ॥

1147 W VIMŚATISTAVA

Substance—Palm leaf Size—$10\frac{1}{2}'' \times 2''$. Leaves—3 9 lines per page and 30 letters per line Script—Malayalam No of Granthas—90. Complete

Subject—Same as No 1147 H

Colophon

विंशतिः समाप्ता ।

Author—Laghubhattāraka

Remarks—The work is printed as No. 60 in TSS. It is also known as Laghustuti.

॥ चर्चास्तवः ॥

1147 X CARCĀSTAVA

Substance—Palm leaf Size—$10\frac{1}{2}'' \times 2''$ Leaves—9 9 lines per page and 40 letters per line Script—Malayālam No of Granthas—35

Subject—Same as No 1147 H

Beginning

सौन्दर्यविभ्रमभुवो भुवनाधिपत्य-
सम्पत्तिकल्पतरवस्त्रिपुरे जयन्ति ।
एते कवित्वकुमुदप्रकरावबोध-
पूर्णेन्दवस्त्वयि जगज्जननि प्रणामाः ॥
देवि स्तुतिव्यतिकरे कृतबुद्धयस्ते
वाचस्पतिप्रभृतयोऽपि जडीभवन्ति ।
तस्मान्निसर्गजडिमा कतमोऽहमत्र
स्तोत्रं तव त्रिपुरतापनपत्नि कर्तुम् ॥

End

उत्तप्तहेमरुचिरे त्रिपुरे पुनीहि
चेतश्चिरन्तनमघौघवनं लुनीहि ।
कारागृहे निगलबन्धनयन्त्रितस्य
त्वत्संस्मृतौ झटिति ते निगला गलन्ति ॥


यः स्तोत्रमेतदनुवासरमीश्वरायाः
श्रेयस्करं पठति वा यदि वा शृणोति ।
तस्यैहिकं फलति राजभिरीड्यतेऽसौ
जायेत स प्रियतमो मदिरेक्षणानाम् ॥

Colophon

चर्चा समाप्ता ॥

Author

Remarks—The work is identical with No 9588, DCSM Madras, Vol XVIII wherein is seen an additional verse in the *phalaśruti*



॥ देवीस्तवः ॥

1147 Y DEVĪSTAVA

Substance—Palm leaf Size—$10\frac{1}{2}'' \times 2''$ Leaves—$2\frac{1}{2}$ 10 lines per page and 40 letters per line Script—Malayālam No of Granthas—60 Incomplete

Subject—Same as No 1147 H

Beginning

यामामनन्ति मुनयः प्रकृतिं पुराणीं
विद्येति यां श्रुतिरहस्यगिरो गृणन्ति ।
तामर्धपल्लवितशङ्कररूपमुद्रां
देवीमनन्यशरणः शरणं प्रपद्ये ॥

अम्ब स्तवेषु तव तावदकर्तृकाणि
कुण्ठीभवन्ति वचसामपि गुम्फनानि ।
डिम्भस्य मे स्तुतिरसावसमञ्जसापि
वात्सल्यविघ्नहृदयां भवती धुनाति ॥

End

सङ्कोचमिच्छसि यदा गिरिजे भवानि
वाक्तर्कयोस्त्वमतिभूमिरनामरूपा ।
यद्वा विकासमुपयासि यदा तदानी
त्वन्नामरूपगणनाः सुकरा भवन्ति ॥
कालाग्निकोटिरुचिमम्ब पदध्वशुद्वा-
वाप्लावनेषु भवतीममृतौघवृष्ट्या ।
श्यामां घनस्तननतां सकलीकृतौ च
ध्यायन्त एव जगदम्ब यस्याः ॥

Colophon.

Authoı

Remaıks—Same as No 1147 B.

॥ अन्नपूर्णास्तवः ॥

1147 Z ANNAPŪRNĀSTAVA

Substance—Palm leaf Sıze—$10\frac{1}{2}'' \times 2''$ Leaves—$2\frac{1}{2}$ 9 lınes per page and 36 letters per lıne Scrıpt—Malayālam No of Granthas—50

Subȷect—Same as No. 1147 H.

Beginning

श्रीगणपतये नमः ।

विश्वेश्वरीं वरेण्यां विश्वाश्रयणीं विशिष्टफलदात्रीम् ।
स्तोष्यामि वाञ्छितास्त्यै स्तोत्ररत्नाधिनायिकामम्बाम् ॥
काञ्चनरत्नविचित्रां दर्वीं दधतीं तथान्नपात्रं च ।
कष्टदरिद्रार्तिहरामम्बां प्रणतोऽस्मि सम्पदां वृद्ध्यै ॥
सर्वाभिलापपूरणकल्पकलतिकान्नपूर्णाख्या ।
दारिद्र्यदोषमुग्रं शमयतु सकलार्थवृद्धिदानेन ॥
अन्नाधिनाथिकायाः कृपा घना दुःखघर्मपरितप्ते ।
मयि दारिद्र्यकृशाङ्ग्या वर्षतु धनधान्यधारया सुचिरम् ॥

End

कथमम्ब रूपमाद्य तव रूपगुणाधिकश्च चिन्मात्रम् ।
जानामि देवि तस्माद् दुरुक्तमीशि क्षमस्व तत् सर्वम् ॥
दारिद्र्यदुरितदुःखप्रशान्तये व्याहृतं मया स्तोत्रम् ॥
देवि सदा सजपतां भक्तानां भवतु कामधेनुरिदम् ॥
स्तोत्रेण त्व तुष्टा मयोदितेन प्रभूतधनधान्यैः ।
पूरय वेश्म मदीयं विधेहि मयि सन्निधिं प्रपद्ये त्वाम् ॥

Colophon

Author

Remarks—No 1147 N under the same title is different from this composition Seven verses at the end devoted to the description of Annapūrnādevi's devine form *Dhāynaslokas* on *Annapūrnā* are quoted below

अमृतमहार्णवमध्ये विकसत्कनकप्रभाचितद्वीपे ।
सुरतरुनिवहच्छायानिन्दितबृन्दारकाभिसौन्दर्ये ॥

तन्मध्ये परिदीप्यत्पायसभुक्त्रोदिकारिबृन्ददले(?) ।
आसीनामतिभुक्तक्षुब्धदरिद्रार्थभङ्गिनीमम्बाम् ॥

रक्ताङ्गीं शिवमन्मथप्रियतमामारक्तचित्राम्बरां
भास्वद्रत्नविभूषिताङ्गलतिकां देवीमयुग्मेक्षणाम् ।
सव्ये लोककराम्बुजान्नविलसन्माध्वीकपालां शिवां
दव्यन्निादिपयोद्यताम्बरधरां वन्दे विभूतिप्रदाम् ॥

करधृतदर्वीफलितैर्भक्तैर्भक्तान् कृतार्थयन्त्यखिलान् ।
गृहिणीयमादिभिक्षोर्विश्वकुटुम्बभरणतोऽन्नमुखी ? ॥

दिव्यप्रसूननि(ष्क?भ)रविलोलधम्मिल्लमांसलताम् ।
शेखरितैन्दवशकलां तिलकितलोचनललाटचन्द्रार्धाम् ॥

अभिलषितान्नसमर्पणसततव्यापारतः श्रमाम्बुमुखीम् ।
क्षुधितजनमार्गणोद्यत्पारिप्लवनेत्रफलितकारुण्याम् ॥

मणिमण्डलांशुमण्डलमांसललावण्यमधुरमण्डितगण्डतलाम् । (?)
मन्दस्मितानुषङ्गस्फुरिताधरबिम्बभूरिबिम्बोष्ठाम् ॥

॥ चण्डिकासप्ततिः ॥

1147 A1 CANDIKĀSAPTATI.

Substance—Palm leaf Size—$10\frac{1}{2}'' \times 2''$ Leaves—11 9 lines per page and 30 letters per line Script—Malayālam No of Granthas—185 Complete.

Subject—Same as No 1147 H.

Beginning

श्रीमहागणपतये नमः । अविघ्नमस्तु ।

मा भाङ्क्षीर्विभ्रम भ्रूरधरविधुरता केयमास्यास्य राग
पाणे प्राण्येव नाय कलयमि कलहश्रद्धया किं त्रिशूलम् ।
इत्युद्यत्कोपकेतून् प्रकृतिमवयवान् प्रापयन्त्येव देव्या
न्यस्तो वो मूर्ध्नि मुष्यान्मरुदसुहृदसून् संहरन्नङ्घ्रिरंहः ॥

End

चक्रे चक्रायुधस्य क्वणति निपतिते रोमणि ग्रामणीव
स्थाणोर्बाणस्य वेगः प्रतिहतगुरुणा चर्मणा वर्मणेव ।
यस्येति क्रोधगर्भं स्मितहरिहरा तस्य गीर्वाणशत्रोः
पायात् पादेन मृत्यु महिषमनुभृतः कुर्वती पार्वती वः ॥

Colophon

समाप्तिः समाप्ता ।

श्रीदुर्गायै नमः । नमश्शिवाय । श्रीकृष्णाय नमः ।

Author—Bāṇabhaṭṭa

Remarks—The work is printed in Bombay

॥ लक्ष्मीस्तवः ॥

1147 A2 LAKṢMĪSTAVA

Substance—Palm leaf Size—10½" × 2" Leaves—4
10 lines per page and 36 letters per line
Script—Malayālam No of Granthas—90
Complete

Subject—A panegyric of Lakṣmī

Beginning

गणपतये नमः ।

प्रणिपत्य महादेवी सर्वमङ्गलमङ्गलाम् ।

ऋषिर्मङ्कणकः पूर्वं तुष्टाव कमलालयाम् ॥
क्षीराब्धेरुत्तरे तीरे रम्ये बिल्ववनावृते ।
मृगपक्षिसमाकीर्णे लक्ष्मीसञ्चारपावने ॥

मङ्कण उवाच—
नमस्ते सकलावाप्ति नमस्ते हितकारिणि ।
नमः सकलकल्याणि नमस्ते हरिवल्लभे ॥

End
ब्रह्महा वा सुरापो वा स्तेयो वा गुरुतल्पग. ।
यस्त्वामनेन स्तोत्रेण (तो?स्तो)ष्यत्यमृतसम्भवे ॥
सर्वपापविनिर्मुक्तो धनधान्यसमृद्धिमान् ।
अनुभूयाखिलान् भोगान् प्रसादात् तव भामिनि ॥
अन्ते स तु परं यातु तद् विष्णोरव्यय पदम् ।
इत्युक्त्वा मुनिना तेन भक्तिनम्रेण चेतसा ।
एवमस्त्वित्युदाहृत्य तत्रैवान्तरधीयत ॥
यस्त्वेतच्छृणुयात् स्तोत्र जपेच्च सुसमाहितः ।
सर्वपापविनिर्मुक्तः समृद्धां श्रियमेष्यति ॥

Colophon
इति मङ्कणकस्तवः समाप्तः ।
श्रीशिवाय नमः ।

Author—Mankanaka

Remarks—This work is also known as Mankanaka-stava after the author's name

---

॥ सरस्वत्यष्टकम् ॥

1147 A3 SARASVATYASTAKAM

Substance—Palm leaf Size—$10\frac{1}{2}'' \times 2''$. Leaf—

9 lines per page and 32 letters per line Script — Malayālam No of Granthas — 9 Complete

Subject—A eulogy of Sarasvatī

Beginning

शिवम् । हरिः ।

अमला विश्ववन्द्या सा कमलाकरमालिनी ।
विमलाभ्रनिभा वोऽव्यात् कमला या सरस्वती ॥
वर्णसंस्थाङ्गरूपा सा स्वर्णरत्नविभूषिता ।
निर्णया भारती वोऽव्याच्छ्वेतवर्णा सरस्वती ॥

End

रक्तकौशेयवस्त्राढ्या व्यक्तभाषणभूषणा ।
रक्तहृत्पद्मसंस्था या शक्ता वोऽव्यात् सरस्वती ॥
सरस्वत्यष्टकं नित्यं सकृत् प्रातर्जपेन्नरः ।
अज्ञैर्विमुच्यते सोऽयं प्रज्ञैरिष्टैः स लभ्यते ॥

Colophon

सरस्वत्यष्टकं समाप्तम् ।

Author

Remarks—Same as No 1147 B

॥ दशश्लोकी ॥

1147 A4 DAŚAŚLOKĪ

Substance—Palm leaf Size—$10\frac{1}{2}'' \times 2''$ Leaves—$2\frac{1}{2}$ 9 lines per page and 28 letters per line Script—Malayālam No of Granthas—35 Complete.

Subject—Same as No 1147 C

Beginning

श्रीबाष्कल उवाच—

वागीश्वरो महाबुद्धिः केन जप्येन सुव्रत ।

जितवान् नीतिमाञ्छक्रं तन्मे ब्रूहि द्विजोत्तम ।

आश्वलायन उवाच—

शृणु वत्स स्तव दिव्यं सर्वाज्ञानविनाशनम् ।

सर्ववेदमय दिव्यं सर्वमन्त्रमयं तथा ॥

शुद्धस्फटिकसङ्काशां रविबिम्बसमप्रभाम् ।

कुन्देन्दुतुहिनाभासां हंसासनगतां शिवाम् ॥

End

यद्वागिति द्व्यृचेनैव गौरीं योऽर्चेति सुव्रतः ।

तस्य नासंस्कृता वाणी मुखादुच्चरते क्वचित् ॥

इत्याश्वलायनप्रोक्तस्सिद्धसारस्वतस्तवः ।

चतुर्वर्गफलावाप्तौ हेतुभूतः सनातनः ॥

Colophon

इत्याश्वलायनस्तवः समाप्तः ।

कुन्दसुन्दरमन्दहासविराजिताधरपल्लवा-

मिन्दुकुन्दनिभाननामरविन्दचारुविलोचनाम् ॥

चन्दनागरुपङ्करूषिततुङ्गपीनपयोधरां

चन्द्रशेखरवल्लभां प्रणमामि शैलसुतामुमाम् ॥

Author—Āśvalāyana

Remarks—The work is erroneously entitled Daśaślokī in RCMPL Not less than 30 verses constitute this composition, It woul

have been more appropriate if it had been styled Siddhasārasvata as suggested by the colophon RCMPL omits the *stotras* Sāmbapañcāśikā, Śrīstuti, Sadāśivāṣṭaka, and Lingāṣṭaka, appended to this codex which are separately noticed herein

॥ साम्बपञ्चाशिका ॥

1147 A5 SĀMBAPAÑCĀŚIKĀ

Substance—Palm leaf Size—$10\frac{1}{2}'' \times 2''$ Leaves—3 9 lines per page and 30 letters per line Script—Malayālam No of Granthas—49.

Subject—Same as No 1147 A

Author—Sāmba

Remarks—The work has been published with commentary as No 104 in TSS Only 23 verses in the text are extant in this codex

---

॥ श्रीस्तुतिः ॥

1147 A6 ŚRĪSTUTI

Substance—Palm leaf Size—$10\frac{1}{2}'' \times 2''$ Leaves—$2\frac{1}{2}$ 9 lines per page and 25 letters per line Script — Malayālam No of Granthas—35 Complete

Subject—A panegyric of the Goddess Lakṣmī

Beginning

स्वस्त्यस्तु ।

श्रीपराशर उवाच—

सिंहासनगतः शक्रः सम्प्राप्य त्रिदिवं पुनः ।
देवराज्ये स्थितो देवीं तुष्टावाब्जकरां ततः ॥

इन्द्र उवाच—

नमामि सर्वलोकानां जननीमब्जसम्भवाम् ।
श्रियमुन्निद्रपद्माक्षीं विष्णुवक्षःस्थलस्थिताम् ॥
पद्मालयां पद्मकरां पद्मां पद्मदलेक्षणाम् ।
वन्दे पद्ममुखीं देवीं पद्मनाभप्रियामहम् ॥

End

एतत् ते कथित ब्रह्मन् यन्मां त्वं परिपृच्छसि ।
क्षीरोदाच्छ्रीर्यथा जाता पूर्वं भृगुसुता सती ॥

इति सकलविभूत्यवाप्तिहेतुः
स्तुतिरियमिन्द्रमुखोद्गता च लक्ष्म्याः ।
अनुदिनमिह पठ्यते नृभिर्यै-
र्वसति न तेषु कदाचिदप्यलक्ष्मीः ॥

Colophon

इति श्रीस्तुतिः समाप्ता ।

Author—Vedavyāsa

Remarks—The work is borrowed from Viṣṇupurāṇa The verses bearing upon Viṣṇu and Śiva which occur after the completion of Śrīstuti are quoted below.

ऊर्ध्वाधःप्रोतपद्मद्वयनिहितदलैरक्षरैस्तैर्ध्रुवाद्यै-
राद्यन्तैर्मन्दमन्दप्र(त्रि)गलितसुधाधारमंमिच्यमानम् ।
ईशान सूक्ष्मरूपं विमलतरसुषुम्नान्तरा मन्निषण्ण
ध्यायन् प्राप्नोत्यरोगी निखिलपरिहृतः सज्जपाद् दीर्घमायुः ॥

तारनालमथ मध्यपत्रकम्
आद्यकर्णिकयुतं क्रमात् क्रमात् ।
चिन्तयन्नियतमन्तरा शिवं
नीरदोघमथ दायुषे द्वयोः ॥

रक्षन्तु त्वामसितजलजन्माञ्जलिः पादमूले
मीना ना(मी?भी)सरसि हृदये मारवाणा सुरारेः ।
हाराः कण्ठे हरिमणिमया वक्त्रपद्मे द्विरेफाः
पिञ्छाचूडाश्चिकुरनिचये घोषयोषित्कटाक्षाः ॥

अम्भांस्याप्याययन्त्यः सुरसरिति सिसित्कारमापादयन्त्यो
नेत्राग्निं स्वापयन्त्यः फणिगणसुरभि क्षालयन्त्योऽङ्गरागम् ।
सेनान्यः शैलकन्यास्तनयुगलरसास्वादशिष्टान्मुखेन्दून्
पान्तु त्वा पाययन्त्यः पुरमथनशिरश्चन्द्रपीयूषधाराः ॥

॥ सदाशिवाष्टकम् ॥

1147 A7. SADĀŚIVĀSTAKAM

Substance—Palm leaf Size—$10\frac{1}{2}'' \times 2''$ Leaf—$\frac{1}{2}$
9 lines per page and 32 letters per line
Script — Malayalam. No of Granthas — 9
Complete

Subject—Same as No 1147 G

Beginning

शुद्धस्फटिकसङ्काशं त्रिणेत्रं चन्द्रशेखरम् ।
इन्दुमण्डलमध्यस्थं वन्दे देवं सदाशिवम् ॥
स्वमायापटसंछन्नं मायातीतं महेश्वरम् ।
करणं कारणं नित्यं वन्दे देवं सदाशिवम् ॥
आनन्दैश्वर्यविज्ञानशक्तिसम्पन्नमीश्वरम् ।
परमात्मानमीशेशं वन्दे देव सदाशिवम् ॥

End

तद् ब्रह्मास्मीति य नित्यं सूरयः समुपासते ।
तमानन्दं परं सत्य वन्दे देव सदाशिवम् ॥
सदाशिवाष्टकं नित्यं भक्तितो यः पठेन्नरः ।
विमुच्य हृदयग्रन्थि स याति परमां गतिम् ॥

Colophon

Author

Remarks—The refrain adopted in the 4th line in all stanzas is noteworthy.

॥ लिङ्गाष्टकम् ॥

1147 A8. LINGĀSTAKAM.

Substance—Palm leaf. Size—$10\frac{1}{2}'' \times 2''$. Leaf—$\frac{1}{2}$ 8 lines per page and 36 letters per line. Script — Malayālam. No. of Granthas — 9. Complete.

Subject—Same as No. 1147 G.

Beginning·

ब्रह्मविष्णू ऊचतुः—

अनादिमलसंसाररोगवैद्याय शम्भवे ।

नमश्शिवाय शान्ताय ब्रह्मणे लिङ्गमूर्तये ॥

प्रलयार्णवसंस्थाय प्रलयोत्पत्तिहेतवे ।

नमश्शिवाय शान्ताय ब्रह्मणे लिङ्गमूर्तये ॥

End

वेदान्तसाररूपाय कालरूपाय धीमते ।

नमश्शिवाय शान्ताय ब्रह्मणे लिङ्गमूर्तये ॥

अव्यक्तलिङ्गमित्याहुरानन्दज्योतिरक्षरम् ।

वेदा महेश्वरं देवमाहुर्लिङ्गिनमव्ययम् ॥

Colophon

Author

Remarks—The work is identical with No 11151, DCSM Madras, Vol XIX

॥ श्रीकृष्णकर्णामृतम् ॥

1147 A9 ŚRĪKRṢNAKARNĀMRTAM

Substance—Palm leaf Size—10½" × 2" Leaf—1
11 lines per page and 40 letters per line
Script—Malayālam No of Granthas — 40
Incomplete

Subject—Glorification of the *līlās* of Lord Krsna.

Beginning

हरिः ।

चिन्तामणिर्जयति सोमगिरिर्गुरुर्मे
शिक्षागुरुश्च भगवान् शिखिपिञ्छमौलिः ।
यत्पादकल्पतरु(पल्लव)शेखरेषु
लीलास्वयंवररसं लभते जयश्रीः ॥

अस्ति स्वस्तरुणीकराग्रविगलत्कल्पप्रसूनाप्लुतं
वस्तु प्रस्तुतवेणुनादलहरीनिर्वाणनिर्व्याकुलम् ।
स्रस्तस्रस्तनिरुद्धनीविविलसद्गोपीसहस्रावृत
हस्तन्यस्तनतापवर्गमखिलोदारं किशोराकृति ॥

End

अव्याजमञ्जुलमुखाम्बुजमुग्धभावै-
रास्वाद्यमाननिजवेणुविनोदनादम् ।
आक्रीडतामरुणपादसरोरुहाभ्या-
मार्द्रे मदीयहृदये भुवनार्द्रमोजः ॥

मणिनूपुरवाचालं वन्दे तच्चरणं विभोः ।
ललितानि यदीयानि लक्ष्माणि व्रजवीथिषु ॥

मम चेतसि स्फुरति वल्लवीविभो-
र्मणिनूपुरप्रणयि मञ्जु शिञ्जित
कमलावनेचरकालिन्दकन्यका-
कलहंसकण्ठक(लकूजितादृतम्) ॥

Colophon

Author—Śrīkṛṣṇalīlāśukamuni

Remarks—The work has been published in the Kāvyamālā Series, Bombay.

॥ धन्वन्तरिध्यानम् ।

1147 A10 DHANVANTARIDHYĀNAM

Substance—Palm leaf Size—$10\frac{1}{2}'' \times 2''$ Leaf—1
10 lines per page and 40 letters per line
Script—Malayālam No of Granthas—25

Subject—Meditation on Dhanvantari

Beginning

शिवम् ।

पयःपयोधिकल्लोलशीकरोत्करशीतले ।
मुक्ताधिकतले हृद्ये द्वीपे कर्पूरपांसुले ॥
परितः पवनोद्धूतप्रवालमणिशोभिते ।
अनल्पैः कल्पतरुभिर्मण्डिते मणिमण्डले ॥
अशेषभुवनाधीशं शेषतल्पस्थितं प्रभुम् ।
सहस्रमुखसन्दष्टकलशामृतसंप्लुतम् ॥
शीतांशुशतसङ्काशं ध्यायेद् भैषज्यदैवतम् ।

End

सञ्चिन्त्यो वल्लकीपाणिर्नारदो मुनिपुङ्गवः ।
सनकाद्यैर्मुनिवरैरमरैरसुरैरपि ॥
ध्येयो जगदशेषारिसूदनो मधुसूदनः ।
गरुत्मत्तुण्डससिक्तघटामृतनिषेवितः ॥

अनन्तो गरुडस्थाने तथा ध्येयो मनीषिणा ।
अष्टाक्षरयुतो ध्येयः सहस्रारसमप्रभः ॥

Colophon

Author

Remaıks—The Ms ıs ın neat legıble hand

॥ कृष्णकर्णामृतम् ॥

1148 KRSNAKARNĀMRTAM

Substance—Palm leaf Sıze—8″×2″ Leaves—66
7 lınes per page and 18 letters per lıne
Scrıpt—Malayālam No of Granthas—528

Subject—Same as No 1147 A9

Begınnıng

श्रीगणपतये नमः । अविघ्नमस्तु ।
रमापतिपदाम्भोजपरिस्फुरितमानसम् ॥
सेनापतिमहं वन्दे विष्वक्सेनं निरन्तरम् ।
श्रीरामं सीतया साकं मुकुन्द मौनिशेखरम् ॥
यज्वानं वाजपेयेन यज्ञेशं प्रणतोऽस्म्यहम् ।
येषां सन्दर्शनेनैव षट्च्छास्त्रवशगो भवेत् ॥
यतीन्द्रान् वासुदेवेन्द्रान् नमोऽभीष्टार्थसिद्धये ।
चिन्तामणिर्जयति सोमगिरिर्गुरुर्मे
शिक्षागुरुश्च भगवान् शिखिपिञ्छमौलिः ।

यत्पादकल्पतरुपल्लवशेखरेषु
लीलास्वयंवररसं लभते जयश्रीः ॥

End

या प्रीतिर्विदुरार्पिते मुररिपो कन्यार्पिते यादृशी
या गोवर्धनमूर्ध्नि या च पृथुके स्तन्ये यशोदार्पिते ।
भारद्वाजसमर्पिते शबरिकादत्तेऽधरे योषितां
या प्रीतिर्मुनिपत्निभक्तिरचितेऽप्यत्रापि तां तां कुरु ॥

Colophon

इति कर्णामृते तृतीयशतकं समाप्तम् ।
श्रीसुब्रह्मण्याय नमः । श्रीपद्मनाभो रक्षतु ।
വിശാഖംതിരുനാൾ തിരുമനസ്സിലെ വക കർണ്ണാമൃതം ശത
കത്രയം സുബ്രഹ്മണ്യൻ സ്വഹസ്തലിഖിതം

Author—Remarks—Same as No 1147 A9

॥ कृष्णानुस्मृतिः ॥

1149 A KRSNĀNUSMRTI.

Substance—Palm leaf Size—4″ × 1½″ Leaves—15 7 lines per page and 14 letters per line Script—Malayālam No of Granthas—75.

Subject etc —Same as No 1144 A.

Remarks—The opening leaf is numbered "ഞ" (30) and the page numbers are consecutive thereafter. The codex is said to contain five

works Kṛṣṇānusmṛti, Kṛṣṇastavarāja, Kṛṣṇastava, Rāmastava and Navagrahastava, according to RCMPL But only Kṛṣṇānusmṛti and Kṛṣṇastavarāja are extant herein The Stotra is borrowed from *Śāntiparva* in the Mahābhārata

---

॥ कृष्णस्तवराजः ॥

1149 B KṚṢṆASTAVARĀJA

Substance—Palm leaf Size—4" × 1½" Leaves—21
6 lines per page and 16 letters per line
Script — Malayālam No of Granthas—125

Subject etc —Same as No 1146 E

॥ कैवल्यदीपिका (भक्तिमुक्ताफलव्याख्या) ॥

1150 KAIVALYADĪPIKĀ

Commentary on Bhaktimuktāphala

Substance—Palm leaf Size—14½" × 2" Leaves—55
7—9 lines per page and 48 letters per line
Script—Malayālam No of Granthas—1250
Incomplete

Subject—Description of devotion and the means of its attainment

Beginning

श्रीगणेशाय नमः ।

यज्ज्योतिरुन्मिषति चेतसि धर्ममेघ-
मातस्थुषामिह वशे परिकर्ममुख्यैः ।

तच्छुद्धमच्छमुकुरप्रतिबिम्बभावात्
कृष्णाभिधामुपगतं भुवि भावयेम ॥

समूलघातं प्रणिहत्य योऽन्धं मृणालिनी चेतयते मनीषाम् ।
यत्पादसंगाज्जगती कृतार्था गुरु विवस्वन्तमिवानुपेतम् ॥
श्रीबोपदेवस्य निधेर्गुणानां जयन्ति ते ते भुवि वाग्विलासाः ।
विकुण्ठ्य येषु स्वयमीश्वरोऽपि सर्वज्ञशब्दं समुपैति रूढम् ॥
अस्मिन् समास्मिन्नपि वाङ्मयाब्धावपारपारीणमनीषयोच्चैः ।
विवृण्वतश्चिज्जडवस्तुभेदं गुणागुणेयं भुवि नास्य कैः कैः ॥
अमुष्य वैदग्ध्यनिधेर्हृदिस्पृशो मुदं ददत्यत्र न कस्य सूक्तयः ।
मुक्त्वा मृषाद्वेषिमनांस्यनारतं वियोगिहृद्दीपकला कलानिधेः ॥
तेन मुक्ताफलं तेने यल्लोकमनुगृह्णता ।
तत्र टीकां यथाबुद्धि कुर्वे कैवल्यदीपिकाम् ॥

End

मैत्रेयो विदुरः तस्य स्वायंभुवस्य यातयामा उपभुक्ताः तद्विपरीता अयातयामाः पुनः पुनरुपभुज्यमाना अपि पूर्ववदुपभोग्या इत्यर्थः । यावद्भिर्यामैः मन्वन्तरं समाप्तं तावन्तो यामाः विष्णुकथासम्बन्धादुत्तरोत्तरं रमणीया जाता इत्यर्थः । कुर्वतः स्ववाक्यैर्ब्रुवतः मैत्रेयः अन्तेऽवसायिनोऽन्त्यजाः ब्रह्ममयो ब्रह्मस्वरूपः ईक्षा दर्शनं अभिमर्शः तौ विद्येते येषां ते तथा । नारदं श्रीकृष्णम् ।

Colophon ·

इति श्रीहेमाद्रिविरचितायां कैवल्यदीपिकायां भक्तिप्रकरणम् ।
इति कैवल्यदीपिकायां भक्त्यङ्गलक्षण भेदाश्च ।

Author—Hemādri, the minister of Rāmarāja.

Remarks—This commentary on Bhaktimuktāphala of Vopadeva is identical with R No 3255, TCM, Madras Vol IV Part I Sanskrit B The work is complete in 11 *prakaraṇas* The commentator acknowledges his indebtedness to *Paramahamsa's* commentary (tīka) on the work

॥ कैवल्यदीपिका (भक्तिमुक्ताफलव्याख्या) ॥

1151 KAIVALYADĪPIKĀ

Commentary on Bhaktimuktāphala

Substance—Palm leaf Size—$14\frac{1}{2}'' \times 2''$ Leaves—59 8—9 lines per page and 44 letters per line. Script—Malayālam No of Granthas—1375.

Subject—Same as No 1150

Beginning

तया ब्रह्मसभादौ प्रसिद्धया श्रवणकीर्तनचिन्तयेति । द्वन्द्वैकत्वे नपुंसकत्वमिति कीर्त्याच्छयेत्यत्रोक्तम् । तद्धाम वैष्णवं स्थानं कृतान्तस्य जवो वेगः तस्यापवर्गमपवर्जन निवृत्तिर्यस्मिन् तदकालकालितमित्यर्थः । यदर्थाः यदभिलाषाः । शुकः । वृत्तिः स्थितिः । अनन्यविषयाण्यनन्यसाध्यानि गानं कीर्तनं अनुमोदन मनसः स्वीकारः स च स्मरणपूर्वकः रक्षितुः रक्षकस्य ईशितुः स्रष्टुः संहर्तुश्च अङ्घ्रिमूलम् । यद्वै भजाम्यृतधिय इत्युत्तरश्लोकः । तेन भजामीत्यनेनान्वयः । यत्स्थ यत्र स्थित कर्म पुण्यपापे गुणाः रजःप्रभृतयः कालो मृत्युः त एव विकारापादकत्वाद्रुजो रोगाः । एते स्पृशन्त्यपि ।

End

यो नित्यशुद्धसुखबोधवपुर्नितान्तं
जागर्ति चोमिति पदं यमिहानुपानु(?)।
यो योगिनां हृदि चकास्ति विधूतपङ्के
सोऽस्माकमस्तु शरणं पुरुषः पुराणः॥

यत्किञ्चिदत्रभवतः खलु बोप्पदेव-
सूरेः कृतिर्निजधिया परिचर्च्यते मे।
उद्दिश्य कोऽपि भजनोपकृति तदेत-
दाराधनं भगवतः परमेश्वरस्य(?)॥

छायावतीममृतधामदिनैकचित्रां
पुण्यप्रमामिव श्रुति प्रथितां तदीयाम्।
टीकां प्रियां परमहंसजनस्य दृष्ट्वा
ग्रन्थः कृतोऽत्र कृतिनां हृदुपैति तोषम्॥

अतत्त्वे तत्त्वधीर्येषां तत्त्वे चातत्त्वधीर्नृणाम्।
न तानानन्दयत्येता बोप्पदेवस्य सूक्तयः॥

यस्य व्याकरणे वरेण्यघटनाः स्फीताः प्रबन्धा दश
प्रख्याता नव वैद्यकेऽथ तिथिनिर्धारार्थमेकोऽद्भुतः।
साहित्ये त्रय एव भागवततत्त्वोक्तौ त्रयस्तस्य भु-
व्यन्तर्वाणिशिरोमणेरिह गुणाः के के न लोकोत्तराः॥

टीकां मुक्ताफलस्येमां नाम्ना कैवल्यदीपिकाम्।
हेमाद्रिः कटके चक्रे रामराजस्य वेश्मनि॥

Colophon

इति हेमाद्रिदेवकृतायां मुक्ताफलटीकायां कैवल्य-
दीपिकायां विष्णुभक्तप्रकरणम्। समाप्ता कैवल्यदीपिका।

हिसा प्राणवियोजको व्यापारः ।
अहिंसाप्रतिषेधश्च हिते चैव प्रवर्तनम् ।
व्यमने चापरित्यागस्त्रिविधं सखिलक्षणम् ।
साक्षादनाच्छन्नरूपम् ।

Authoı—Same as No. 1150

Remaıks—The openıng page numbeı of thıs Ms ıs 56 and No 1150 ends on the 55th folıo The close ıesemblance of the leaves and the continuıty of the page numbers beaı out that one and the same work has been arranged ın two dıfferent codıces

॥ कैवल्यदीपिका (भक्तिमुक्ताफलव्याख्या)॥

1152 KAIVALYADĪPIKĀ

Commentary on Bhaktımuktāphala.

Substance—Palm leaf Sıze—$14\frac{1}{2}'' \times 2\frac{1}{4}''$ Leaves—53. 8 lınes per page and 48 letters per lıne. Scrıpt—Malayālam No of Granthas—1250.

Subject etc —Same as No 1150

॥ गङ्गासहस्रनामादि ॥

GAṄGĀSAHASRANĀMĀDI.

॥ कृष्णकवचम् ॥

1153 A KRSNAKAVACAM

Substance—Palm leaf Size—7" × 1½" Leaves—3
7 lines per page and 20 letters per line
Script—Malayālam No of Granthas—15

Subject—Laudation of Krsna

Beginning

गणपतये नमः । अविघ्नमस्तु ।

प्रणम्य देवं विघ्नेशं प्रणम्य च सरस्वतीम् ।
प्रणम्य च मुनीन् सर्वान् सर्वशास्त्रविशारदान् ॥
श्रीकृष्णकवचं वक्ष्ये श्रीकीर्तिविजयप्रदम् ।
कान्तारे पथि दुर्गे च सदा रक्षाकरं नृणाम् ॥
स्मृत्वा नीलाम्बुदश्यामं नीलकुञ्चितकुन्तळम् ।
बर्हिबर्होल्लसन्माल शरच्चन्द्रनिभाननम् ॥

End·

विश्वरूपधरो जङ्घे प्रपदौ भूमिभारहा ।
पादौ यदूत्तमः पातु पातु कृष्णोऽखिलं वपुः ।
दिवा पातु जगन्नाथः पातु नारायणः स्वयम् ॥
इद कृष्णबलोपेतः कृष्णस्य कवचं स्मरन् ।
सर्वदस्युभयान्मुक्तः कृष्णे भक्तिमवाप्नुयात् ॥

त्रिकालमेवं परिचिन्त्य शार्ङ्गिणं
प्रपूजयेद् यो मनुजो महामनाः ।
स धर्ममर्थं ससुखं श्रियं परा-
मवाप्य देहापदि मुक्तिमाप्नुयात् ॥
हरिः । श्रीकृष्णाय नमः ।

Colophon

Author

Remarks—In RC, MPL it is stated that this Ms contains only Gangāsahasranāma but further scrutiny reveals the inclusion of Krsnakavaca and Visnusahasranāma at its beginning The dissimilarity in the size of the leaves indicates that they are later additions to the codex

---

॥ विष्णुसहस्रनामस्तोत्रम् ॥

1153 B VISNUSAHASRANĀMASTOTRAM

Substance—Palm leaf Size—7″ × 1½″ Leaves—28 7 lines per page and 18 letters per line Script—Malayālam No of Granthas—160.

Subject—A panegyric of Visnu

Beginning

हरिः । श्रीगणपतये नमः ।
शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥

ओन्नमो भगवते वासुदेवाय, ओन्नमो भगवते नारायणाय, । ओन्नमः सर्वलोकगुरवे, ओन्नमो भगवते पुरुषोत्तमाय, ओन्नमः सर्वलोकपित्रे, ओन्नमः सर्वलोकपितामहाय, ओन्नमः सर्वलोकप्रपितामहाय, ओन्नमः सर्वलोकप्रधानाय, ओन्नमः सर्वलोकेश्वराय, ओन्नमः सर्वलोकविशिष्टाय, ओन्नमः सर्वलोकसुखाय, ओन्नमः सर्वलोकसुखकराय, ओन्नमः सर्वलोकसुखप्रदाय, ओन्नमः सर्वलोककर्त्रे, ओन्नमः स्रलोकभर्त्रे, ओन्नमः सर्वलोकहर्त्रे, ओन्नमः सर्वलोकहिताय, ओन्नमः सर्वलोकहितकराय, ओन्नमः सर्वलोकहितप्रदाय, ओन्नमः सर्वलोकशिवाय, ओन्नमः सर्वलोकशिवकराय, ओन्नमः सर्वलोकशिवप्रदाय, ओन्नमः सर्वलोकोद्भवाय ओन्नमः सर्वलोकोद्भवकराय, ओन्नमो विष्णवे, प्रभविष्णवे ।

श्रीवैशम्पायन उवाच—
श्रुत्वा धर्मानशेषेण पावनानि च सर्वशः ।

End

इमं मन्त्रं महादेवि जपन्नेव दिवानिशम् ।
सर्वपापविनिर्मुक्तो विष्णुसायुज्यमाप्नुयात् ॥
यज्ञेशाच्युत गोविन्द माधवानन्त केशव ।
कृष्ण विष्णो हृषीकेश नारायण नमोस्तु ते ॥

ओं केशवाय नमः, ओ नारायणाय नमः । ओ माधवाय नमः । ओं गोविन्दाय नमः । ओ विष्णवे नमः । ओ मधुसूदनाय नमः । ओं त्रिविक्रमाय नमः । ओ वामनाय नमः । श्रीधराय नमः । हृषीकेशाय नमः । ओ पद्मनाभाय नमः । दामोदराय नमः ।

Colophon

Author—Vyāsa

Remarks—The text forms a chapter in the Anuśāsanaparva in the Mahābhārata

---

॥ गङ्गासहस्रनामस्तोत्रम् ॥

1153 C GANGĀSAHASRANĀMASTOTRAM

Substance—Palm leaf Size—7″ × 1¾″ Leaves—29 8 lines per page and 16 letters per line Script —Malayālam No of Granthas—225

Subject—Laudation of Gangādevī

Beginning

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

श्रीसनत्कुमार उवाच—

प्रणिपत्य महादेवं विष्णुं सर्वजगद्गुरुम् ।

गङ्गातीरे शुचिः स्थित्वा द्विजैस्सह महामतिः ॥

तीर्थयात्रादिषु श्रान्तो भार्गवो ज्ञानतत्परः ।

गौतम तपसा श्रेष्ठ भक्त्या पप्रच्छ मोक्षदम् ॥

किं जपन् मुच्यते जन्तुर्दोषैर्वाक्कायसम्भवैः ।

मानसैर्वा तथा सर्वैर्ज्ञानतोऽज्ञानतः कृतैः ॥

अनेकजन्मसम्भूतैर्जन्मदुःखप्रदैस्तथा ।

कुत्र स्नात्वा तु सद्यो वै विशुद्धः स्यात् पुमानिह ॥

कुत्र वा निवसेद्धीमान् किं वा सेव्यं मनीषिभिः ।

ससारतारणं किं वा स्वर्गमोक्षप्रदायकम् ॥

किं ध्येयश्च सदा सद्भिस्तत् सर्वं वक्तुमर्हसि ।
पृच्छतो मम भक्त्या वै सारभूतं महामुने ॥

गौतम उवाच----
परमात्मा शिवो व्यापी वासुदेवो निरञ्जनः ।
नारायणः स ईशानो ध्येयश्चादौ जगन्मयः ॥
स एव देवी सा गङ्गा शिवा नारायणी परा ।
व्यक्ताव्यक्तस्वरूपेण संस्थिता द्विजसत्तम ॥
द्विसप्तभुवनस्यान्तर्बहिश्चापि प्रयत्नतः ।
सारमुद्धृत्य धर्मस्य ज्ञानस्य च महेश्वरः ॥

End

कुर्यात् स्नात्वा नरो भक्त्या गङ्गायाः सुसमाहितः ।
तीरे स्थित्वा पठेदेतत्स्तवराजं प्रयत्नतः ॥
एतत् स्तोत्रं गृहे यस्य लिखित वापि तिष्ठति ।
न तत्र विघ्ना रोगाश्च कालुष्यं पावकज भयम् (?) ॥
सुदूरस्थोऽपि यो नित्यं पठेत् स्तवमिदं ।
भक्त्या परमया वर्षैस्त्रिभिरेतत्फल लभेत् ॥

Colophon

इति श्रीमत्स्कान्दपुराणे ब्रह्माण्डविस्तारे रेवाखण्डे गौतम-भार्गवसंवादो नाम गङ्गामाहात्म्यं श्रीसहस्रनाम समाप्तम् ।

Author

Remarks —The work relates to the glorification of Gangā, occurring in the Skāndapurāṇa



॥ गजेन्द्रमोक्षः ॥

1154 A GAJENDRAMOKSA

Substance—Palm leaf Size—$4\frac{1}{2}'' \times 1\frac{1}{2}''$ Leaves—8
11—13 lines per page and 20 letters per line
Script—Malayālam No of Granthas—120

Subject—Same as No 1144 A

Beginning etc —Same as No 1146 G

॥ माधवस्तवराजः ॥

1154 B MĀDHAVASTAVARĀJA

Substance—Palm leaf Size—$4\frac{1}{2}'' \times 1\frac{1}{2}''$ Leaves—5
12 lines per page and 20 letters per line. Script
—Malayālam No of Granthas—75.

Subject—Same as No 1144 A

Beginning

हरिः। श्रीगणपतये नमः। अविघ्नमस्तु ।
स्तोत्रमेतन्महापुण्यं यत्त्वयोक्तं द्विजोत्तम ।
माधस्तवराजं तु श्रोतुमिच्छामहे वयम् ॥
किं फलं तस्य पठने केन लोके प्रकाशितम् ।
गालवः—
पादौ प्रक्षाल्य चाचम्य कृतन्यासः कृतासनः ।
स्तोत्रमेतत् पठेन्नित्यं माघमासे विशेषतः ॥
आदौ नत्वा गुरून् सर्वान् पश्चात् स्तोत्रं जपेत् सुधीः ।
हृत्पद्मकर्णिकामध्ये भगवन्तमनुस्मरन् ॥

माधस्तवराजस्य गालव ऋषिः । अनुष्टुप् छन्दः । माधवो विष्णुर्देवता ।

End—Same as No 1146 F

Colophon

Author

Remarks—Same as No 1146 F

॥ शिवकेशादिपादस्तवः ॥

1154 C ŚIVAKEŚĀDIPĀDASTAVA

Substance—Palm leaf Size—$4\frac{1}{2}'' \times 1\frac{1}{2}''$ Leaves—7
11 lines per page and 18 letters per line
Script—Malayālam No of Granthas—85
Complete

Subject—A eulogy of Śiva

Beginning

हरिः । श्रीगणपतये नमः । शिवाय नमः ।

देयासुर्मूर्ध्नि राजत्सरमसुरसरित्पारपर्यन्तनिर्य-
त्प्रांशुस्तम्बाः पिशङ्गास्तुलितपरिणतारक्तशालीलता वः ।
दुर्वारापत्तिगर्तश्रितनिखिलजनोत्तारणे रज्जुभूता
घोराघोर्वीरुहाळीदह(न)शिखिशिखाः शर्म शार्वाः कपर्दाः ॥
कुर्वन्निर्वाणमार्गप्रगमपरिलसद्रूप्यसोपानशङ्कां
शक्रारीणां पुराणां त्रयविजयकृतस्पष्टरेखायमाणम् ।

अव्यादव्याजमुच्चैरळिकहिमधराधित्यकान्तास्त्रिधोद्य-
ज्जाह्नव्याभ मृडानीकाभितुरुडुपरुक्पाण्डरं वास्त्रिपुण्ड्रम् ॥

End

गुरुकुचभरद्वन्द्वाभुग्नावलग्नविलासिनः
शिशिरकिरणश्रीचोरास्याः श्रितेपु शिवप्रदाः ।
पृथुलजघनाः प्राणास्त्राणं क्रियासुरुमाह्वया-
श्चकितहरिणीनेत्रान्ता वो हरस्य वहिश्वराः ॥

आरभ्य स्मरजयिनः कपर्दभाग-
दङ्गानां स्तुतिरियमापदाब्जपांसोः ।
ये भक्त्या मुहुरनया नमन्ति देवं
देवश्च स्मरति धिया स्वयश्च तेपाम् ॥

Colophon

केशादिपाद समाप्तम् ।

Author

Remarks—The work deals with the glorification of Śiva, a stanza being devoted to the desciiption of each part of His body

---

॥ विष्णुस्तवः ॥

1154 D VIṢNUSTAVA

Substance—Palm leaf Size—$4\frac{1}{2}'' \times 1\frac{1}{2}''$ Leaves—3
8 lines per page and 16 letters per line
Script—Malayālam No. of Granthas—25.

Subject—Same as No. 1144 A.

Beginning

प्रसीद भगवन्मह्यमज्ञानात् कुण्ठितात्मने ।
तवाङ्घ्रिपङ्कजरजोरागिणी भक्तिमुत्तमाम् ॥
अज प्रसीद भगवन्नमितद्युतिपञ्जर ।
अप्रमेय प्रसीदास्मद्दुःखहन् पुरुषोत्तम ॥
स्वसंवेद्यस्वरूपात्मन्नानन्दात्मन्ननामय ।
अचिन्त्यसार विश्वात्मन् प्रसीदेश निरञ्जन ॥

End

चक्रभिन्नारिचक्राय चक्रिणे शक्रबन्धवे ।
विश्वाय विश्ववन्द्याय विश्वभूतात्मने नमः ॥
नमोऽस्तु योगिध्येयाय नमोऽस्त्वध्यात्मरूपिणे ।
भक्तिप्रदाय भक्तानां नमस्ते मुक्तिदायिने ॥
मनोवाक्कायचेष्टास्यध्यानस्तुतिनमस्क्रियाः ।
देवेश कर्म सर्वं मे भवेदाराधनं तव ॥
हरिः । कृष्णाय नमः ।

Colophon

Author

Remarks—Same as No 1147 B



॥ विष्णुस्तवः ॥

1154 E VIṢNUSTAVA

Substance—Palm leaf Size—$4\frac{1}{2}'' \times 1\frac{1}{2}''$ Leaves—9.

8 lınes peı page and 12 letteıs per lıne. Scrıpt —Malayālam No of Gıanthas—30.

Subȷect—Same as No 1144 A

Begınnıng

मैत्रेयः—

इत्यनुक्रोशहृदयो भगवानाह तान् शिवः ।
बद्धाञ्जलीन् राजपुत्रान् नारायणपरो वचः ॥

रुद्रः--

जितन्त आत्मविद्धुर्याः स्वस्तये स्वस्तिरस्तु व ।
भवता राधसाराद्धः सर्वस्मा आत्मने नमः ॥
नमः पङ्कजनाभाय भूतसूक्ष्मेन्द्रियात्मने ।
वासुदेवाय शान्ताय पूर्णाय निभृतात्मने ॥
स्वर्गापवर्गद्वाराय नित्यं शुचिषदे नमः ।
नमो हिरण्यवीर्याय कूटस्थाय स्वरोचिषे ॥
सङ्कर्षणाय सूक्ष्माय दुरन्तायान्तकाय च ।
नमो विश्वप्रबोधाय प्रद्युम्नायान्तरात्मने ॥
नमो नमोऽनिरुद्धाय हृषीकेशेन्द्रियात्मने ।

End •


य इदं काल्य उत्थाय प्राञ्जलिः प्रश्रयान्वितः ॥
शृणुयाच्छ्रावयेन्मर्त्यो मुच्यते भवबन्धनैः ।
गीतं मयैतन्नरदेवनन्दनाः
परस्य पुंसः परमात्मनः स्तवम् ।
जपन्त एकाग्रधियस्तपो मह-
च्चरध्वमन्ते तत आप्स्यथेप्सितम् ॥

Colophon

इति श्रीभागवते चतुर्थस्कन्धे द्वाविंशोऽध्यायः ।

Author

Remarks—The text is borrowed from the Bhāgavata The opening verse in chapter 23 is seen after the colophon The printed edition commences only from the 32nd verse in the 24th chapter and ends with Rudragītā in the same chapter



॥ गणाष्टकम् ॥

1155 A GAṆĀṢṬAKAM

Substance—Palm leaf Size—7″ 2″ Leaves—2½ 7 lines per page and 22 letters per line Script—Malayālam No of Granthas—25

Subject—A panegyric of Ganapati.

Beginning

श्रीमहागणपतये नमः ।

श्रियमनपायिनीं प्रदिशतु श्रितकल्पतरुः
शिवतनयः शिरोविधृतशीतमयूखशिशुः ॥

अविरतकर्णतालजमरुद्गमनागमनै-
रनभिमतं .... वितनोति च यः ।

सकलसुरासुरादिशरणीकरणीयपदः
करटिमुखः करोतु करुणाजलधिः कुशलम् ॥

प्रचलतरान्तरायतिमिरौघनिराकरण-
प्रसृमरचन्द्रिकायितनिरन्तरदन्तरुचिः ।

End

निजरदशूलपाशनवशालिगिरोरिगदा-
कुवलयमातुलुङ्गकमलेक्षुशरामकरः ।
दधदथ शुण्डया मणिघट दयितासहितो
वितरतु वाञ्छितं झटिति शक्तिगणाधिपतिः ॥

Colophon

पठतु गणाधिपाष्टकमिदं सुजनोऽनुदिनं
कठिनशुचाकुठावलिकठोरकुठारवरम् ।
विमतपराभवोद्भटनिदाघनवी(त?न)घनं
विमलवचोविलासकमलाकरबालरविम् ॥
श्रीगणेशाय नमः ।

Author

Remarks—Same as No 1147 B

॥ स्कन्दाष्टकम् ॥

1155 B SKANDĀSTAKAM.

Substance—Palm leaf Size—7″ x 2″ Leaves—2½
8 lines per page and 18—22 letters per line
Script—Malayālam. No of Granthas—25.

Subject—A panegyric of Subrahmaṇya.

Beginning

हरिः । श्रीगणपतये नमः ।

लक्ष्मीं यः प्रचरीकरीति पदयोगपातुकानां नृणां
सद्यो हन्त महान्तमन्तरुदितं सन्तापमुन्मूलयन् ।
सर्वाभीप्सितदानखर्पीतसुप (?)वीजगर्वाङ्घ्रये
कारुण्यैकनिकेतनाय हरिगीतिशाय तस्मै नमः ।
पाकारातिमुखानपारकरुणो नाकालयान् पालयन्
नीकाराग्निजवैरिणां निरुपमोद्कायनानामघे ।
राकाशीतमयूखभासुरमुखो लोकाधिनाथो जवात्
केकावद्वरवाहनो हरतु मे शोकानुमानन्दनः ॥

End

माहेयो रैवतेयः किल शरवणजो वह्निजो जाह्नवेयः
स्वाहेयो बाहुलेयः पशुपतितनयः पार्वतीनन्दनश्च ।
इत्याख्यायोगभेदैः प्रकृतिषु जनिकर्तुस्तत्राख्यायिकाभि-
र्बह्वीषु ख्यापितास्वप्यकृतकवचसा गीयसे विश्वयोनिः ॥
कायच्छायच्छटाधःकृतघुसृणरजःसौकुमार्ये कुमारे
वृत्रामित्रादिसत्राशनविपुलमनस्तापदक्षेपदक्षे ।
भक्तिः शाक्तीकवर्ये मम जनितमनोनिर्वृतिर्वर्वरीतु
स्फीताधूताङ्घ्रियुग्मप्रणतसकललोकार्तिके कार्तिकेये ॥

Colophon

Author

Remarks—In this work the author eulogises Subrahmanya, the presiding deity in the Harigītāpuram (Haripād) temple in Central Travancore

---

॥ स्कन्दद्ण्डकम् ॥

1155 C SKANDADANDAKAM

Substance—Palm leaf Size—7″ × 2″ Leaves—1½
9 lines per page and 18—22 letters per line
Script—Malayālam No of Granthas—15

Subject—Same as No 1155 B

Beginning

अयि जय जयाम्भोजिनीजानिडिम्भोदयोद्यत्कुसुम्भोल्लस-
त्फुल्लदम्भोपमर्दप्रवीणप्रभाधोरणीपूरिताशावकाश, परानन्दसा-
न्द्रप्रकाश, सहैवोत्तराङ्गीभवत्सौहृदावेशमीशानपञ्चाननीपार्व-
तीवक्त्रसञ्चुम्ब्यमानाननाम्भोजषट्क.

End

कारुण्याम्बुनिधे, समस्तसुमनःसन्तापदानोद्यत
स्फायद्दर्पभरासुरप्रभुसमूलोन्मूलनैकायन ।
बिभ्राण क्षितिभृद्विभेदनचणां शक्ति त्वमाग्नेय मां
पाहि श्रीहरिगीतपत्तनपते देहि श्रिय मे जवात् ॥

Colophon

Author.

Remarks—Same as No 1155 B

॥ श्रीविद्यार्यास्तवः ॥

1155 D. ŚRĪVIDYĀRYĀSTAVA

Substance—Palm leaf Size—7″ × 2″. Leaves—5.

8 lines per page and 22 letters per line
Script—Malayalam No of Granthas—50
Subject—Same as No 1155 B

Beginning

कामितकल्पतरुभ्यः कुर्मः प्रणतिं कुमारनामभ्यः ।
कुलगिरिजाकुतुकेभ्यः केभ्यश्चित्केकिराजकेतुभ्यः ॥
अस्तु मनस्तुष्ट्यै मे वस्तु मुनिस्तुत्यमस्तमितत्तूस्तम् ।
ध्वस्तसमस्तसपत्नं हस्तलमच्छक्ति निस्तुलं(श्वल्यं?श्वर्यम्) ॥
एकं प्रशमितशोकं श्रीकण्ठं स्याच्छ्रिये प्रियं तोकम् ।
आकम्पितारिपुलोकं मा कश्चन लेखमन्यमविवेकम् ॥

End

रे मानस विसृजेमां सीमां शोकस्य तावदुद्दामाम् ।
कौमार स्मर चरण भूमानं भज सुखस्य चामानम् ॥
ईशात्पितुरतिशयितं पञ्चमुखात् षण्मुखं नमस्कुर्मः ।
योऽयमधःकुर्वाणो जयतितरां नीलकण्ठमुरगभुजम् ॥
महितदयाभरितमतिं विहितनतानन्दममितवीर्यनिधिम् ।
विमथितविमतसमूहं नमत महात्रिपुरसुन्दरीसूनुम् ॥

Colophon

इति श्रीविद्यार्यास्तोत्रं सम्पूर्णम् । ओम् । श्री-
सुब्रह्मण्याय नमः ।

Author

Remarks—The verses are in *Āryā* metre and hence the title *Vidyāryāstotram*.

॥ देवीदण्डकम् ॥

1155 E DEVĪDANDAKAM

Substance—Palm leaf Size—7" × 2" Leaves—3. 8 lines per page and 20 letters per line Script —Malayālam No of Granthas—35

Subject—A eulogy of Devī

Beginning

श्रीदेव्यै नमः ।

जय जननि नवीनकादम्बिनीकाळिमाडम्बर(चे?च्छेद)निष्णात-वेणीकलापोल्लसच्चञ्चलाकान्तिचातुर्यपाटच्चराम्लानचाम्पेयदामोप-कण्ठस्थितित्रासडोलायमानालिपोतालिकालीधुरीणालकस्तोमकस्रालि-काकल्पकस्तुरिकाचित्रके ।

End

जगन्नायिके तावके केवलं भावये पादपङ्केरुहे देहि मे भक्ति-मम्ब त्वयि प्रत्यहं स्थेयसी नैव मुञ्चाम्यहं जातुचिद् देवि भाव-त्कसेवारस दीनबन्धो दयापूरसिन्धो सदा पाहि मां, पाहि पाहि, प्रसीद, प्रसीद, प्रसीद । शुभमस्तु ।

Colophon

Author

Remarks—Same as No 1147 B

॥ नारदस्तवः ॥

1155 F NĀRADASTAVA

Substance—Palm leaf, Size—7"×2". Leaves—2½.

9 lines per page and 16—22 letters per line. Script—Malayālam No of Granthas—25.

Subject—A panegyric of Nārada

Beginning

श्रीगणपतये नमः ।

कल्याणं मे विधत्तां कलशजलनिधिक्रोडकल्लोलमाला-
निष्ठ्यूतस्फीतफेनप्रकरधवलिमाडम्बरच्छेदचुञ्चुः ।
नेदीयो नारदीयो दुरितभरतमस्तोमदूरीक्रियायां
निस्तन्द्रं चन्द्रिकाया विभवमभिवहन् देहकान्तिप्रवाहः ॥

श्रेयः श्रीनारदीयो झटिति घटयतादुत्कगणां जटानां
जूटो मे पुष्कल यः कलयति विकसत्कञ्जकिञ्जल्कमञ्जुः ।
प्रत्यूषोदित्वराहस्करकिरणझरीपिञ्जराधित्यकाग्र-
श्रीकण्ठाधारशैलेश्वरशिखरपरिष्कारकुञ्जप्रकारः ॥

End.

जम्भद्विट्कुम्भिशुण्डामदहरणचणं नारदस्योरुयुग्म
कम्र जानुद्वयञ्च स्फटिकमणिसमुद्गाभिमानापहारि ।
जङ्घाद्वन्द्वं स्फुरत्केतकमुकुळगळग्राहिनिर्द्वन्द्वशोभं
बोभूयन्तां भवाम्भोनिधिभयशमन भूयसे श्रेयसे मे ॥

वन्दे वन्दारुवृन्दारकमुकुटतटप्रोतहीरौघतारा-
दाराश्लेषप्रसादोल्लसितनखरसन्दोहराकेन्दुवृन्दे ।
सन्देहाभावमन्देतरमहिमविमर्शातिनम्रोत्तमाङ्गे
तुङ्गातङ्काच्छिदायै द्रुहिणसुतमुनीन्द्रस्य पादारविन्दे ॥

शुभमस्तु । श्रीवासुदेवाय नमः । श्रीरामचन्द्राय नमः ।

Colophon

Author ·

Remarks—The work composed in dignified style

॥ नारदस्तवः ॥

1155 G NĀRADASTAVA

Substance—Palm leaf Size—7″ × 2″ Leaves—2
9 lines per page and 22 letters per line
Script—Malayālam No of Granthas—25.

Subject—Same as No 1155 F

Beginning

लक्ष्मीवल्लभपादपल्लवयुगाविश्रान्तसाश्चिन्तन-
प्रादुर्भूतनिरन्तराळपुळकानुस्राविबाऽपावृतः ।
यो गायन्निह चञ्चुरीति भगवन्नामावली वीणया
देवर्षिप्रवराय दिव्यमहिमावासाय तस्मै नमः ॥

शापः कोऽपि सुतप्रवासकुपितप्राचेतसायोजितः
शश्वद्भिस्वजनैर्निवेष्टितस्ते सौकर्यमाकल्पयन् ।
येनामानितरामनुग्रह इति स्वच्छन्दसञ्चारिणा
देवर्षिप्रवराय दिव्यमहिमावासाय तस्मै नमः ॥

प्राग्जन्मार्जितपुण्यवैभवभवब्रह्मावबोधस्फुर-
त्सान्द्रानन्दमरन्दसिन्धुलहरीगाढावगाढाशयः ।
यो जागर्ति जगत्त्रयीजनहिताधानैकतानः सदा
देवर्षिप्रवराय दिव्यमहिमावासाय तस्मै नमः ॥

End

वात्सल्यैकनिकेतनैकतनयापायोदयद्दुःसह-
क्लेशोद्दामतमाशुशुक्षणिशिखादन्दह्यमानाशयः ।
येनाश्वास्यत चित्रकेतुनृपतिर्वाक्यामृतासेचनै-
र्देवर्षिप्रवराय दिव्यमहिमावामाय तस्मै नमः ॥

यत्पादाम्बुरुहावनेजनजलस्येन्द्रादिवृन्दारक-
स्तोमस्तोककतिप्रतिक्षणमघत्र।तच्छिदाचुश्चुनः ।
यद्वक्त्रेन्दुगळद्वचोमृतझरस्याढ्या चकोरत्यजो
देवर्षिप्रवराय दिव्यमहिमावासाय तस्मै नमः ॥

Colophon

Author

Remarks—Same as No 1147 B

॥ नारदीयस्तोत्रम् (गद्यात्मकम्) ॥

1155 H NĀRADĪYASTOTRAM

Substance—Palm leaf Size—7″ × 2″. Leaves—5
8 lines per page and 20 letters per line
Script—Malayālam No of Granthas—50.

Subject—Same as No 1155 F

Beginning

श्रीगुरुभ्यो नमः ।

जयतु भगवानयं जगत्त्रयपवित्रीकरणचणविचित्रतरचरित्रशा-
ली कालत्रितयसाक्षात्कर्ता दुष्टनिग्रहशिष्टानुग्रहानिरवग्रहधृताग्रह-
स्तत्तद्वसरेषु तत्र तत्र सत्वरमुपागत्य तत्तज्जनांस्तत्तत्कर्मसु

प्रवर्तयन्नयत्नमेव निजनयनैपुण्येन हिरण्याक्षपुरस्सराणाममर्त्य-परिषदमित्राणामत्यन्तमसौ ।

End

नतामरसमाश्रितचरणश्शरणागतसकलकल्याणवितरणस्वर्लोक-शाखी वल्लकीतल्लजमम्मुल्लसितपाणिपल्लवः शारदागमविमलनी-रदमदविदूरीकरणविशारदशरीरशोभः शारदारमणनन्दनः श्रीना-रदमहामुनिः

Colophon

शुभमस्तु । श्रीनारदीयस्तोत्रं संपूर्णम् ।
श्रीगुरुभ्यो नमः ।

Author

Remarks—The work is composed in Sanskrit prose. The sloka quoted below occurs at the close of the Ms

"सल्लोकोडितविश्वविश्रुतभुजस्फीतप्रभावश्रिया
दुर्वारप्रचुरस्मयोद्धतसुपर्वामित्रमर्मच्छिदा ।
कल्लोलद्युतिचिल्लिका वितनुते मोदं सुराणामुमा
माता मे सततं दुरन्तकरुणा या सा मुदा पातु माम् ॥
श्रीभुवनेश्वर्यै नमः ॥

॥ कृष्णराममङ्गलाशंसा ॥

1155 I KṚSNARĀMAMANGALĀŚAMSĀ.

Substance—Palm leaf Size—7″ × 2″ Leaves—7
9 lines per page and 12 letters per line
Script—Malayālam No of Granthas—75.

Subject—Benedictory *stotra* on Krsna and Rāma.

Beginning

श्रीगणपतये नमः ।

मङ्गलं वासुदेवाय माधवाय महात्मने ।
नन्दिताभीरवृन्दाय नन्दपुत्राय मङ्गलम् ॥
पूतनाशकटादिभ्यः पुण्यलोकप्रदायिने ।
पूर्णानन्दस्वरूपाय पुष्कराक्षाय मङ्गलम् ॥
दामोदराय गोगोपान् दावाग्नेः परिरक्षते ।
काळियग्रीष्मतप्तानां काळमेघाय मङ्गलम् ॥
गोवर्धनातपत्राय गोविन्दायेन्द्रधर्षिणे ।
रासक्रीडाप्रसक्ताय राजीवाक्षाय मङ्गलम् ॥

End

बन्धुवीरपरीताय सिन्धुतीरमुपेयुषे ।
विभीषणाभयकृते गम्भीरायास्तु मङ्गलम् ॥
चकिताब्धिवितीर्णाध्वविहिताद्भुतमेतवे ।
मथिताशरयूथाय महावीराय मङ्गलम् ॥
मेघनादगलच्छेदश्लाघनीयानुजन्मने ।
हृतकण्ठससोदर्यदशकण्ठाय मङ्गलम् ॥
सदागयाभिषिक्ताय सदाराध्याय साधुभिः ।
क्षीरोदाभिख्ययशसे धीरोदात्ताय मङ्गलम् ॥
मङ्गलं धर्मभीताय धन्यशीलाय मङ्गलम् ।
मङ्गलं राजरत्नाय रामभद्राय मङ्गलम् ॥

श्रीसर्वमङ्गलायै नमः । शुभमस्तु ।

Colophon

Author .

Remarks—The Ms of Nāradanāmāstottarasataka which was embodied in the codex when RCMPL was prepared is now missing

---

॥ गणाष्टकम् ॥

1156 A GANĀSTAKAM

Substance—Palm leaf Size—$10\frac{3}{4}'' \times 1\frac{3}{4}''$ Leaves—2 9 lines per page and 39 letters per line Script—Malayālam No of Granthas—20

Subject—Same as No 1155 A

Beginning

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

अभिप्रेतार्थसिद्ध्यर्थं पूजितो यः सुरैरपि ।

सर्वविघ्नच्छिदे तस्मै गणाधिपतये नमः ॥

सरस्वति नमस्तुभ्यं वरदे कामरूपिणि ।

विद्यारम्भं करिष्यामि सिद्धिर्भवतु मे सदा ॥

... .

एकदन्तं महाकाय तप्तकाञ्चनसन्निभम् ।

लम्बोदर विशालाक्षं वन्देऽहं गणनायकम् ॥

मूषिकोत्तममारुह्य देवासुरमहाहवे ।

योद्धुकामं महावीर्यं वन्देऽहं गणनायकम् ॥

End—Same as No 1147 B

Colophon·

Author

Remarks—Same as No 1147 B.

॥ सरस्वत्यष्टकम् ॥

1156 B SARASVATYASTAKAM

Substance—Palm leaf Size—10¾ 1¾' Leaf—1
9 lines per page and 30 letters per line
Script—Malayalam No of Granthas—10

Subject—Beginning—Same as No 1147 A3

End

सर्वलोकप्रपूज्या मा पर्वचन्द्रनिभानना ।
मर्वजिह्वाग्रमंस्था (च) मर्वान्नोऽव्यात् मरम्वती ॥
सरस्वत्यष्टकं नित्यं मकृत् प्रातर्जपन्नरः ।
अज्ञैर्विमुच्यते मोऽय प्राज्ञैरिष्टैस्म लभ्यते ॥

Author

Remarks—Though this work is identical with No 1147 A3 the closing portion herein given is different

---

॥ नारायणाष्टकम् ॥

1156 C NĀRĀYAṆĀSTAKAM

Substance—Palm leaf Size—10¾"×1¾" Leaf—1
8 lines per page and 36 letters per line
Script—Malayalam No of Granthas—10

Subject—A eulogy of Nārāyana.

Beginning

पुरुषोत्तम वैकुण्ठ पुण्डरीकाक्ष माधव ।
वासुदेव हृषीकेश नारायण नमोऽस्तु ते ॥

वेदगर्भ विशालाक्ष विश्वरूप धराधर ।
आदिदेव महोदार नारायण नमोऽस्तु ते ॥

End

अम्बुजाक्ष सुरश्रेष्ठ रामकृष्ण जनार्दन ।
सर्वपापहरानन्त नारायण नमोऽस्तु ते ॥
नारायणाष्टकं पुण्य भक्तितो यः पठेन्नरः ।
विमुक्तः सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥

Colophon

Author

Remarks—The refrain adopted in the fourth line is identical in all stanzas except in the last

---

॥ लक्ष्म्यष्टकम् ॥

1156 D LAKSMYASTAKAM

Substance—Palm leaf Size—$10\frac{3}{4}'' \times 1\frac{3}{4}''$ Leaf—1
9 lines per page and 36 letters per line.
Script—Malayālam No of Granthas—10.

Subject—A panegyric of Laksmī

Beginning

पुण्डरीकविशालाक्षि त्रैलोक्यजयसुन्दरि ।
रत्नाभरणसर्वाङ्गि वन्दे लक्ष्मि नमोऽस्तु ते ॥
कुञ्जरेव महातोये अभिषिच्यैव सन्ततम् ।
पुष्पवर्षमह घोर वन्दे लक्ष्मि नमोऽस्तु ते (?)॥

End

प्रणम्य शिरसा देवि भद्रे परमसुन्दरि ।
श्रीकृष्णदयिते देवि वन्दे लक्ष्मि नमोऽस्तु ते ॥
लक्ष्म्यष्टकमिदं नित्यं भक्तितो यः पठेन्नरः ।
मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥

Colophon

Author

Remarks—Same as No 1156 C

॥ गणाष्टकम् ॥

1157 A GAṆĀṢṬAKAM

Substance—Palm leaf Size—7″ × 1¼″ Leaves—1½
7 lines per page and 28—36 letters per line
Script—Malayālam No of Granthas—20

Subject—Same as No 1155 A

Beginning etc —Same as No 1156 A

॥ वागीशीस्तवः ॥

1157 B VĀGĪŚĪSTAVA

Substance—Palm leaf Size—7″ × 1¼″ Leaves—3
6—8 lines per page and 28—32 letters per line
Script—Malayālam No of Granthas—40.

Subject—Same as No 1147 C.

Beginning

॥ श्री ॥

सरस्वति महादेवि त्रिषु लोकेषु पूजिते ।
कामरूपे कलाज्ञाने नमो देवि नमो नमः ॥
पद्मपत्रविशालाक्षी पद्मकेसरवर्णिनी ।
नित्य पद्मालया देवी सा मां पातु सरस्वती ॥
अहमम्ब नमामि त्वामायतानीललोचने ।
सरस्वति सिताकारे पाहि मां मुक्तरक्षणम् ॥

End—Same as No 1147 C

Remarks—Same as No 1147 B

॥ गणाष्टकम् ॥

1158 A GANĀSTAKAM

Substance—Palm leaf Size—4" × 1¼" Leaves—5
10 lines per page and 12—16 letters per line.
Script—Malayālam No of Granthas—45.

Subject—Meditation on Ganapati etc

Beginning.

गणपतिध्यानम् ।

शिवसुतगजवक्त्र रक्तवर्णं त्रिणेत्रम्
अभयवरदहस्तं दिव्यपाशाङ्कुशाढ्यम् ।
अमृतमयशरीरं सर्पयज्ञोपवीतं
गणपतिगणनाथ पादपद्मं नमामि ॥

विघ्नेशं सपरश्वथाक्षवटिकादन्तोल्लसल्लड्डुकै-
र्दोर्भिः पाशसृणि स्वदन्तवरदाढ्यैर्वा चतुर्भिर्युतम् ।

शुण्डाग्राहितबीजपूरमुरुकुक्षि स्य?क्षण संसर्गत्
सिन्दूराभमिभास्यमिन्दुकलशाद्याकल्पमब्जासनम् ॥

End

ശ്രീകൈലാസാദ്രിശൃംഗേ സുരതരുനികരം
ചൂടിമിന്നുന്ന പൊന്നിൻ-
പ്രാസാദാലങ്കൃതേ മണ്ഡപനടുവിൽ മഹാ-
രത്നപീഠേ നിഷണ്ണം
ഏകാന്തേ വാമഭാഗസ്ഥിതഗിരിതനയാ-
കൊങ്കതാങ്ങിക്കരം കൊ-
ണ്ടേകേനാന്യൈശ്ച വേദാഭയപരശുമൃഗം
ചന്ദ്രചൂഡം ഭജേഽഹം

Author

Remarks—The Ms embodies certain Dhyānaslokas relating to Ganapati, Mayūra, Sarasvatī and Śiva Certain verses are composed in Malayālam

---

॥ भैरवध्यानम् ॥

1158 B BHAIRAVADHYĀNAM

Substance—Palm leaf Size—4 × 1¼′ Leaves—4
10 lines per page and 14—16 letters per line
Script—Malayālam No of Granthas—25.

Subject—Meditation on Bhairava.

Beginning

निर्वाणं निर्विकल्पं निरुपममलं निर्विकारं क्षकारं
हुङ्कारं वज्रदंष्ट्रं हुतवहनयनं रौद्रमुन्मत्तभावम् ।
फट्कार बद्धनागं भ्रुकुटितटमुख भैरवं शूलपाणि
खट्वाङ्गं श्यामनीलं डमरुकसहितं क्षेत्रपाल नमामि ॥

नागक्रीडावसक्त शकलशशिधर नागहारं सुकण्ठं
दिग्वास खड्गहस्त कटितटभुजगं नागयज्ञोपवीतम् ।
बं बं ब कालरूप सकलविषहरं वारुणं व्योमतत्त्व
बिम्बोष्ठं चारुहासं फणिगणनमित क्षेत्रपाल नमामि ॥

End

कापाल दण्डहस्तं कळकळ रवं काळकाळान्धकारं
ढङ्कारं बिम्बबाहुं डमरुकसहितं कण्ठनादं कपर्दम् ।
उग्रव्यग्राट्टहासं भयमभयकरं बद्धनागेन्द्रकेशं
बालं बालेन्दुमौलि विकृतविलसितं क्षेत्रपालं नमामि ॥

गदां त्रिशूलं डमरुं चन्द्रहस्तं त्रिलोचनम् ।
कृष्णाभं भैरवं ध्यायेत् सर्वविघ्ननिवारणम् ॥

Colophon

Author ·

Remarks—The Ms is in neat legible hand.

॥ क्षेत्रपालध्यानम् ॥

1158 C KSETRĀPĀLADHYĀNAM.

Substance—Palm leaf. Size—4″ × 1¾″. Leaves—4.

5—9 lines per page and 12—19 letters per line
Script—Malayalam. No. of Granthas—30

Subject—Meditation on Kṣetrapāla

Beginning

करकलितकपाली कुण्डली दण्डपाणि-
स्तरुणतिमिरनीलव्यालयज्ञोपवीतः ।
क्रतुसमयविराजद्विघ्नविच्छेददक्षो
जयतु वटुकनाथस्सिद्धकः साधकानाम् ॥
कालव्यालकपालमण्डितकरं व्यालालिमालाकुलं
कण्ठे तिष्ठति कालकूटगरळ कङ्कालवर्णाधरम् ।
रक्षन्त कुलशासनैकनिरत तङ्गिणा शिक्षित
वन्देऽहं सुरमौलिवन्दितपदं श्रीक्षेत्रपाल वटुम् ॥

End

ध्येयो जटामकुटचन्द्रकलेद्धमूर्धा
त्र्यक्षस्तरक्ष्वजिनपीतदुकूलवासाः ।
ईशाच्युतत्रिशिखचक्रकपालशङ्खान्
बिभ्रत् सितासितवपू रुचितास्मभूषः ॥

Colophon

Author

Remarks—Same as No 1158 B.

॥ स्कन्दध्यानम् ॥

1158 D. SKANDADHYĀNAM

Substance—Palm leaf. Size—4″×1¾″. Leaf—1.
11

9 lines per page and 16—18 letters per line
Script—Malayālam No of Granthas—10

Subject—Meditation on *Subrahmanya*

Beginning

स्फुरन्मकुटपत्रकुण्डलविभूषित चम्पक-
स्रजाकलितकन्धरं करयुगेन शक्ति पविम् ।
दधानमथवा कटीकलितवामहस्तेष्टदं
गुहं घुसृणभासुरं स्मरतु पीतवामोवमम् ॥

End

गाङ्गेयं वह्निगर्भं शरवणजनितं ज्ञानशक्तिं कुमार
ब्रह्मण्यं स्कन्ददेह गुहमचलभिदं रुद्रतेजःस्वरूपम् ।
सेनान्य तारकघ्नं कार्तिकेय षडास्य
सुब्रह्मण्यं मयूरध्वजरथसहितं देवदेवं नमामि ॥

Colophon

Author

Remarks—The Ms contains only four verses.

॥ शास्तृध्यानम् ॥

1158 E ŚĀSTṚDHYĀNAM

Substance—Palm leaf Size—4″ × 1¾″ Leaf—1.
9 lines per page and 11—16 letters per line
Script—Malayālam No of Granthas—10

Subject—Meditation on Śāstā

Beginning

तेजोमण्डलमध्यगं त्रिणयनं पीताम्बरालंकृतं
देवं पुष्पशरेक्षुकार्मुकलसन्माणिक्यपत्राभयम् ।
बिभ्राणं करपङ्कजैर्मदगजस्कन्धाधिरूढं विभुं
शास्तारं सततं नमामि शिरसा त्रैलोक्यसम्मोहनम् ।

End

स्निग्धारालविसारिकुन्तलभरं सिंहासनाध्यासितं
स्फूर्जत्पत्रसुक्लृप्तकुण्डलमथेष्विष्वासभृद्दोर्द्वयम् ।
नीलक्षौमवसं नवीनजलदश्यामं प्रभासत्यक-
स्फायत्पार्श्वयुगं सुरक्तसकलाकल्पं स्मरेदार्यकम् ॥

Colophon

Author

Remarks—Same as No 1147 B

॥ विष्णुध्यानम् ॥

1158 F VISNUDHYĀNAM

Substance—Palm leaf Size—4″ × 1¾″. Leaves—3
9 lines per page and 16 letters per line
Script—Malayālam No of Granthas—25

Subject—Meditation on *Visnu*

Beginning

अशुभमपनयन्तं पक्षजैः सामघोषै-
रचलमिव सपक्षं हैममारुह्य तार्क्ष्यम् ।

सजल इव पयोदः श्यामलः शार्ङ्गधन्वा
शमयतु परितापं सर्वमेत्य स्वयं नः ॥

उद्यत्कोटिदिवाकरप्रतिनिभं शङ्खं गदां पङ्कजं
चक्रं बिभ्रतमिन्दिरावसुमतीसंशोभिपार्श्वद्वयम् ।
कोटीराङ्गदहारकुण्डलधरं पीताम्बरं सुन्दरं
श्रीवत्सोल्लसितं सुपक्षविलसच्छ्रीकौस्तुभाढ्यं भजे ॥

अरुणनलिनसंस्थं काञ्चनोद्दीप्रवर्णं
करधृतदरचक्रं पीतकौशेयवासम् ।
कनककलशरक्ताब्जोत्पलासक्तपाणि
श्रियमपि च भुजाभ्यां बिभ्रतं नौमि विष्णुम् ॥
विष्णुं शारदचन्द्रकोटिसदृशं शङ्खं रथाङ्गं गदा-
मम्भोजं दधतं सिताब्जनिलयं कान्त्या जगन्मोहनम् ।
आबद्धाङ्गदहारकुण्डलमहामौलिस्फुरत्कङ्कणं
श्रीवत्साङ्कमुदारकौस्तुभधरं वन्दे मुनीन्द्रैः स्तुतम् ॥

मूले कल्पतरोः पयोनिधितटे पक्षीश्वरस्योपरि
ध्यायेत् पद्मरथाङ्गशङ्खगदिनं सुस्निग्धहेमप्रभम् ।
उत्संगे स्थितया सरोजकरया लक्ष्म्या दृढालिङ्गितं
देवं दुर्गतिनाशनं भवभयध्वंसोद्यतं श्रीकरम् ॥

हेमाम्भोजे निषण्णं स्वकर~~धृतघटौ~~ चक्रशङ्खौ कराद्यै-
रक्षस्रक्कुण्डिकाख्यैः शशधरशकलं धारयन्तं सुभूषम् ।
हेमाभं पीतवस्त्रं रविशशिदहनं (त्र्य?त्री) क्षणं चित्स्वरूपं
सर्वज्ञं सर्वगं तं विधिहरिहरजं विश्वरूपं नमामि ॥

End

जान्वोरामक्तनीक्ष्णस्वनखरविलसद्राहुमभ्मृष्टकेश:
शङ्खं चक्रश्च दोर्भ्यां दधदनलसमज्योतिपा भग्नदैत्यः ।
ज्वालामालापरीतं रविशशिदहन त्र्य ? क्षण दीप्तजिह्वं
दंष्ट्रोग्रं धौतकेश वदनमपि वहन् पातु मां नारसिंहः ॥

क्रोधादुद्वृत्तनासापुटयुग(ल?)सुपिरध्मातनिःश्वासभृभृ-
त्सङ्घातस्तम्भजातस्फुरदधरलसत्तीक्ष्णदंष्ट्राकरालः ।
दिक्षु प्रक्षिप्तचक्षुः क्षिति फरफर?)भृत्फुल्लतक्षं द्विदक्षो
रक्षोवक्षःक्षतासृक्स्नपितनखमुखः पातु मा नारसिंहः ॥

कल्पान्ताग्निप्रकाशात त्रिभुवनमखिलं तेजसा पूरयन्तं
पिङ्गाक्ष तीक्ष्णदंष्ट्रं रिपुकुलदहन भीतिदं चाट्टहासैः ।
शङ्ख चक्रं गदाब्जं पृथुतरमुसल चापपाशाङ्कुशाब्जं-
बिभ्राण दोर्भिराद्यमनासि मुररिपु भावयेचक्रमंत्रम् ॥

शङ्ख चक्रश्च चाप परशुमसिमिषुं शलपाशाङ्कुशाग्नि
बिभ्राणं वज्रखेट हलमुसलगदाकुन्तमत्युग्रदंष्ट्रम ।
ज्वालाकेशं त्रिणेत्रं ज्वलदनलनिभं हारकेयूरभूष
ध्यायेन् षट्कोणसंस्थं सकलरिपुजनप्राणसंहारचक्रम् ॥

Colophon

Author

Remarks—The name of the Ms as seen in the margin is Nāmatravadhyānam' The portion herein given comprises the complete text.

॥ मदनगोपालस्तवः ॥

1158 G MADANAGOPĀLASTAVA

Substance—Palm leaf Size—4″ × 1¾″ Leaves—3½
9 lines per page and 16 letters per line Script
—Malayālam No of Granthas—30

Subject—A eulogy of *Krsna*

Beginning

कोदण्डमैक्षवमनेकशरञ्च पौष्प
चक्राब्जपाशसृणिकाञ्चनवशनालम् ।
बिभ्राणमष्टमितबाहुभिरर्कवर्ण
ध्यायेद्धरिं मदनगोपविलासवेषम् ॥

श्रीमत्यां द्वारवत्यां नवकनकमये भूतले रत्नद्यो-
र्मध्ये कल्पद्रुमाधो विविधमणिलसन्मण्डपे सन्निविष्टम् ।
चक्रं शङ्खं च वेणुं नळिजमथ गदां योगमुद्रां दधान
वन्दे संसिच्यमान मणिमयकलशैर्वल्लभाभिर्मुकुन्दम् ॥

ध्यायेद्गोपालकृष्णं सुरतरुवसतौ रत्नसिंहासनाग्रे
वेणु पाणिद्वयेनाधरमणिसुधया पूरयन्त वसन्तम् ।
बिभ्राण शङ्खचक्राङ्कितकरयुगळ सत्यभामासमेतं
रुक्मिण्या शोभमान गविकलभमृगीगोमुखास्वादिताङ्घ्रिम् ॥

End

अङ्गनामङ्गनामन्तरे माधवो
माधव माधवञ्चान्तरेणाङ्गना ।
इत्थमाकल्पिते मण्डले मध्यगः
सञ्जगौ वेणुना देवकीनन्दनः ॥

कोदण्डं मसृणं सुगन्धिविशिखं चक्राब्जपाशाङ्कुशं
हैमीं वेणुलतां करैश्च दधतं सिन्दूरपुञ्जारुणम् ।
कन्दर्पाधिकसुन्दरं स्मितमुखं गोपाङ्गनावेष्टितं
गोपालं मदनाधिपं हृदि भजे त्रैलोक्यसम्मोहनम् ॥

Colophon

Author

Remarks—Vijayagopāla's a ... which is referred to in RC, MPI as appended to this MS. is missing. A few miscellaneous verses on Śrī Rāma, Śrī Kṛṣṇa and Hanumān seen after the close of the work are quoted below.

दोर्भिः खड्ग त्रिशूल डमरुमसिधनुश्चर्म बाण कुठारं
शङ्खं चक्रं च पद्मं हलमुसलगदाभिण्डिपालं च पाशम् ।
विद्युद्वह्नि च मुष्टिं वरमभयकरं बिभ्रतं शुभ्रवर्णं
वन्दे रामं त्रिणेत्रं मम सकलरिपून्मर्दयन्तं प्रतापैः ॥

वैदेहीसहितं सलक्ष्मणयुतं कैकासुतं सानुजं
सुग्रीवादिविभीषणादिसहितं नीलं नलं साङ्गदम् ।
विश्वामित्रवसिष्ठगौतमभरद्वाजादिसंसेवितं
रामं मारुतिसेवितं भज मनःसाम्राज्यसिंहासने ॥

उद्यत्कोटिदिवाकरप्रतिनिभं श्रीकौस्तुभालङ्कृतं
योगीन्द्रैः सनकादिभिः परिवृतं कैलासनाथप्रियम् ।
मुक्ताहारकिरीटकुण्डलधरं केयूरहारान्वितं
वैदेहीकुचसन्निवासमनिशं श्रीजानकीराघवम् ॥

उद्याने कुसुमेन कल्पितमहातल्पे शयानो हरिः
श्रीमानष्टभुज प्रसन्नवदनो गायन्मुदा वेणुना ।
गोपस्त्रीकुचकुम्भमर्दितकरः पादेन योनौ मृजन्
नारीलोकमशेषमोहनवपुः पायात् स गोपालकः ॥

श्रीरामपादाम्बुजराजहंसो
दशास्यमत्तेभमृगाधिराजः ।
सीतामनोदुःखसमुद्रसेतुः
पायाद्धनूमान् पवनात्मजो वः ॥

वामे जानुनि वामबाहुमपरं ज्ञानाक्षमुद्राञ्चित
हृद्देशे कलयन् वृतो मुनिगणैर्नासाग्रदत्तेक्षणः ।
आसीनः कदलीवने मणिमये बालार्ककोटिप्रभो
ध्यायन् ब्रह्म परं करोतु मनसः शुद्धिं हनूमान्मम ॥

पञ्चास्यं कपिसिंहगारुडमहाक्रोडाश्ववक्त्रैर्युतं
खट्वाङ्गं सृणिपाशपर्वतगदामुष्टि कपालं तथा ।
शूलं मुद्गरमायुध निजभुजैः प्रीत्या वहन्त मुदा
दिक्पालाष्टकमाञ्जनेयमनिशं श्रीरामदूत भजे ॥

॥ देवीध्यानादि ॥

1158 H DEVĪDHYĀNĀDI

Substance—Palm leaf Size—4″ × 1¾″ Leaves—15.
9 lines per page and 14—16 letters per line
Script—Malayālam No of Granthas—130

Subject—Meditation on several divinities.

Beginning

ब्रह्माणीं चतुराननां क्षमरुत कुम्भं करे ?रे । सुकसुवो
विभ्राणामरुणकान्तिरिन्दुवदना । इन्द्राण्डिनी बालिका ।
हंसारोहणकेलिरम्बरमणेर्बिम्बेऽञ्चिता भूषिता
गायत्री हृदि भ विता हृदङ्गना. नम्रन्ममूर्द्धे सदा ॥
रुद्राणीं नवयौवनां त्रिनयनां वैयाघ्रचर्माम्बरां
खट्वाङ्गत्रिशिराक्षसूत्रव रयाभीतिदिश्वानाम्बिकाम् (?) ।
उद्यन्पिङ्गज(पा?टा)कलापविलसन्कलेन्दुमौलिः श्रियै
सावित्री वृषवा(व?ह)ना सितततनुर्ध्येया यजूरूपिणी ॥

End

सद्यश्छिन्नशिरःकृपाणमभय हस्ते वरं बिभ्रतीं
घोरास्यां शशिशेखरां सुरुचिरामुन्मुक्तकेशावलिम् ।
सृक्कासृक्प्रवहां श्मशाननिलयां श्रुत्योश्शवालंकृतां
श्यामाङ्गीं कृतमेखलां शवकरैर्देवीं भजे कालिकाम् ॥
मुक्तकेशी द्विवसना सर्वाभरणभूषिताम् ।
स्वयोनिदर्शिता मुक्ति पशुवर्गमुपास्महे ॥

Colophon

Author

Remarks—The Dhyānaslokas on several divinities such as Gāyatrī Lakṣmī, Durgā etc are included in this work The two verses quoted below occur after the close

राजायोध्यानगरविलसन्मण्डपे रत्नभित्तौ
तत्तद्दिक्षु स्थितससुमनस्तोरणैर्दिव्यगन्धैः ।

नानादिग्भ्यो धनपतिवनो दिव्यमिहानन्यो
दिव्याकारैरनुजनिवहैः मेलितः स्वर्द्रुमूले ॥

दिव्यैर्माल्यैर्दिवि च सतत स्तूयमानः सुरौघैः
प्रातः प्रान्ते दृढमुनिवरैर्वामदेवादिभिश्च ।
राकाचन्द्रोपमितिसुमुखश्यामलश्चारुलक्ष्म्या
ध्येयस्मद्यो विरचितमहाराजराज्याभिषेकः ॥

॥ स्वयंवराध्यानम् ॥

1158 I SVAYAMVARĀDHYĀNAM

Substance—Palm leaf Size—4" × 1¼" Leaves—3
7—9 lines per page and 15 letters per line
Script—Malayālam No. of Granthas—25

Subject—Meditation on *Svayamvarā*

Beginning

बालार्कायुतसप्रभां करतले लोलम्बमालाकुलां
मालां सन्दधतीं मनोहरतनुं मन्दस्मितोद्यन्मुखीम् ।
मन्दं मन्दमुपेयुषी वरयितुं शम्भु जगन्मोहिनी
वन्दे देवमुनीन्द्रवन्दितपदामिष्टार्थदां पार्वतीम् ॥

End

कल्पद्रुमूलमणिकुट्टिमसन्निविष्टां
मुक्तातपत्रकुचमौक्तिकवृष्टिहृष्टाम् ।
इष्टाभयाङ्कितकरामरुणां त्रिणेत्रा-
मिष्टार्थदां परशिवां परिशीलयामि ॥

प्रकाशमध्यस्थितचित्स्वरूपां वराभये सन्दधतीं त्रिणेत्राम् ।
सिन्दूरवर्णामतिकोमलाङ्गी मायामयी तत्त्वमयी नमामि ॥

Author

Remarks—A desc... on the occasion of He... wedding ... the ...

॥ किन्नराशिवस्तवः ॥

1158 J. KINNARAŚIVASTAVA

Substance—... Leaves—2
9—10 lines ... per line
Script—... —15

Subject—A p... o...

Beginning

श्मशानस्थो ... बहुविधपिशाचैः ...
कपर्दी ... ।
कपालाग्रौ ...
त्रिशूलाग्रे कृत्वा ... किन्नरशिवः ॥
वह्नीन्द्वर्कविलोचनो डमरुकं ... मृगञ्चानलं
बिभ्रच्चन्द्रकलाधरो निजकरैर्...ङ्कवामाश्रितः ।
आरुह्यातुलतुङ्गशृङ्गवृषभं ...
श्रीहस्तामलकस्य दर्शनमदाज्ज्योतिस्स्वभानात्मकः ॥

End

हेमाम्भोजे निषण्ण स्रवदमृतघटौ चक्रशङ्खौ कराब्जे-
ष्वक्षस्रक्कुण्डिका... शशिशकलधरं धारयन्त सुभूषम् ।
हेमाभं पीतवस्त्र रविशशिदहन (त्र्य?त्री)क्षण दीप्तजिह्व
सर्वज्ञ सर्वकान्त विधिहरिहरज विश्वरूप नमामि ॥

Colophon

Author.

Remarks—Here in the first verse is furnished a description of Rudra (as Śmaśānavāsi) with His entourage The second stanza dealing with the delineation of the divine form of Śiva as appeared before Hastāmalakācārya is probably composed by him.

॥ दुर्गास्तोत्रम् ॥

1158 K DURGĀSTOTRAM

Substance—Palm leaf Size—4″ × 1¼″ Leaves—3
9—10 lines per page and 14—16 letters per line
Script—Malayalam No of Granthas—18

Subject—Same as No 1155 E

Beginning

लक्ष्मीशे योगनिद्रां प्रभजति भुजगाधीशतल्पे सदर्पा-
वुत्पन्नौ दानवौ तच्छ्रवणमलमयाङ्गौ मधुं कैटभञ्च ।
दृष्ट्वा भीतस्य धातुर्मुनिभिरभिनुतामाशु तौ नाशयन्तीं
दुर्गां देवीं प्रपद्ये शरणमहमशेषापदुन्मूलनाय ॥
युद्धे निर्जित्य दैत्यः सकलसुरगणान् यस्तदीयेषु धिष्ण्ये-
ष्वास्थाप्य स्वान् विधेयान् पुनरगमदगों शक्रतां विक्रमेण ।
तं मामात्यापमित्र महिषमपि निहत्यास्य मूर्धाधिरूढां
दुर्गां देवीं प्रपद्ये शरणमहमशेषापदुन्मूलनाय ॥

End

एत सन्तः पठन्तु स्तवमखिलविपज्जालतूलानलाभ
हृन्मोहध्वान्तभानुप्रतिममखिलसंकल्पकल्पद्रुकल्पम् ।
दौर्गं दौर्गत्यघोरातपतुहिनकरप्रख्यमंहोगजेन्द्र-
श्रेणीपञ्चास्यदेश्य विपुलभयदकालाहिताक्ष्यप्रभावम् ॥

Colophon

Author

Remarks—The closing leaf of the codex contains the following verses glorifying *Mukunda*

> चञ्चदायतदृगञ्चलेन य-
>
> श्चारु चोरयति गोपिकामनः ।
>
> एष घोषनवनीतमोषके
>
> सोमुपैतु मम शेमुषीमलम् ॥

> പൊന്നിൻ കിങ്കിണിയും ചിലമ്പിതാലിയും ചുരുള-
>
> യും പീലിയും
>
> മിന്നും കനകവും കസ്തൂരിപ്പൊട്ടും ചിന്നുന്ന
>
> കാർക്കുന്തളം
>
> ഉണ്ണിക്കണ്ണന്റെ കറുത്ത നിറവും മാഴ്കുന്ന-
>
> നേത്രങ്ങളും
>
> ഇങ്ങ ശ്രീമുഖചന്ദ്രനും മുരളിയും തോന്നേണ-
>
> മെന്മാനസേ

> आनीलालिकलम्बिकेशमतसीसूनप्रभं बालकं
>
> काञ्चीकङ्कणनूपुरोज्ज्वलतनुं नन्दात्मजं सुन्दरम् ।
>
> मातॄणां पुरतश्चरन्तममलं योगीन्द्रसेव्यं सदा
>
> फुल्लाब्जायतपत्रनेत्रमनिशं वन्दे जगन्मोहनम् ॥

॥ गरुडनामाष्टोत्तरशतम् ॥

1159 GARUDANĀMĀSTOTTARAŚATAM

Substance—Palm leaf Size—14″ × 1¾″ Leaves—3.

7 lines per page and 42 letters per line Script—Malayālam No of Granthas—45

Subject—A eulogy of Garuda

Beginning

श्रीगणपतये नमः । अविघ्नमस्तु ।

देव्युवाच—

देव देव महादेव सर्वज्ञ करुणानिधे ।
श्रोतुमिच्छामि तार्क्ष्यस्य नामाष्टशतमुत्तमम् ॥

ईश्वर उवाच—

शृणु देवि परं गुह्यं गरुडस्य महात्मनः ।
नाम्नामष्टोत्तर पुण्यं पवित्रं पापनाशनम् ॥
चतुष्षष्टिकलाविद्याप्रदं मोक्षप्रद शुभम् ।
गद्यपद्यमया वाणी(?)माशु माधुर्यमिद्धिदम् ॥
अप्रकाश्यमिदं देवि गुह्याद् गुह्यतर शुभम् ।
पुरा महाब्धिमथने पतगेन्द्र महाबलम् ॥
आराध्य गरळ तूर्णमोक्षभन्नमृतं (?) यथा ।
तव स्नेहात् प्रवक्ष्यामि समाहितमनाः शृणु ॥

End

शत्रुचोरमहायुद्धघोरसिंहमहामृगे ।
मन्नद्धे स्मरणादेव चण्डमारुततूलवत् ॥
इद तु दिव्यं परम रहस्य सदा सुजप्यं परमात्मयोगिभिः ।
मनोहरं हर्षकर नराणां फलप्रदं मोक्षपदप्रदञ्च ॥

Colophon

इति गरुडस्तोत्रं संपूर्णम् ।

Author

Remarks—The MS appears to be a detached portion of another work. It commences with the 37th Fol.

॥ गुरुभक्तिमाहात्म्यम् ॥

1160 A GURUBHAKTIMĀHĀTMYAM

Substance—Palm leaf Size—4½ × 1½ Leaves—26
7—9 lines per page and 10—12 letters per line
Script—Malayalam No. of Granthas—150

Subject—Glorification of devotion to one's preceptor.

Beginning

हरिः । श्रीसूत उवाच—

कैलासशिखरे रम्ये भक्तानुग्रहतत्परं ।
प्रणम्य पार्वती भक्त्या शङ्करं परिपृच्छति ॥

श्रीदेव्युवाच—

ओं नमो देवदेवेश परात्पर जगद्गुरो ।
सदाशिव महादेव गुरुदीक्षां प्रदेहि मे ॥

केन मार्गेण भो स्वामिन् देही ब्रह्ममयो भवेत् ।
तत् कृपां कुरु मे स्वामिन् नमामि चरणौ तव ॥

ईश्वर उवाच—

मम रूपासि देवि त्वं त्वद्भक्त्यर्थं वदाम्यहम् ।
लोकोपकारकः प्रश्नः न केनापि कृतं पुरा ॥

दुर्लभं त्रिषु लोकेषु तच्छृणुष्व वदाम्यहम् ।
गुरुर्ब्रह्म विना नान्यत् सत्यं सत्यं वरानने ॥

End

सर्वशान्तिकरं नित्यं सर्वोपद्रवनाशनम् ।
पठनात् सर्वसिद्धिः स्यात् सर्वज्ञत्वादिसिद्धिदम् ॥
महायोगीश्वरो भूत्वा मुक्तिं पञ्चविधां लभेत् ।
सदाशिवो भवत्येव सत्यं सत्यं न संशयः ॥
न गुरोरधिकं न गुरोरधिकं न गुरोरधिकं न गुरोरधिकम् ।
शिवशासनतः शिवशासनतः शिवशासनतः शिवशासनतः ॥
शिवमस्तु ।

Author

Remarks—The work is written in the form of a dialogue between Pārvati and Paramesvara

---

॥ तत्त्वलक्षणम् (केरलभाषाव्याख्योपेतम्) ॥

1160 B TATTVALAKṢANAM

with Malayālam commentary

Substance—Palm leaf Size—$4\frac{1}{4}'' \times 1\frac{1}{2}''$ Leaves—4
7—9 lines per page and 8—14 letters per line
Script—Malayālam No of Granthas—20.
Incomplete

Subject—Description of spiritual truths

Beginning

श्रीगुरुभ्यो नमः ।

पञ्चेळादिदशेन्द्रियाणि विषयैः प्राणाः षडूर्याश्रया
 गगास्ते करणानि चाष्टविप(यैः?या) मप्ताप्यमी धातवः ।
नाडीमण्डलदूषणपणगुणापस्थे शता पत्रिका
 कोशाः पञ्च तनुश्च प(ड)ङ्गपरि(क?त)तत्त्वं हि जीवात्मनाम् ॥(?)

പൃഥിവീ, അപ്പ്, അഗ്നി, വായു, ആകാശം പഞ്ചഭൂതങ്ങളും
ശ്രോത്രം, ത്വക്ക് ചക്ഷുസ്സ്, ജിഹ്വാ ഘ്രാണം, ജ്ഞാനേ
ന്ദ്രിയം വാക്ക്, പാണി പാദം പായു ഉപസ്ഥം കർമ്മേന്ദ്രിയ
ങ്ങളും ശബ്ദം, സ്പർശം, രൂപം രസം ഗന്ധം ജ്ഞാനേന്ദ്രിയ
വിഷയങ്ങളും വചനം ദാനം, ഗമനം, വിസർഗ്ഗം ആനന്ദം
കർമ്മേന്ദ്രിയവിഷയങ്ങളും പ്രാണൻ അപാനൻ, ഉദാനൻ,
സമാനൻ, വ്യാനൻ പഞ്ചപ്രാണന്മാർ

End

ആദ്ധ്യാത്മികം, ആധിഭൗതികം, ആധിദൈവികം, താപ
ത്രയം അന്നമയം, പ്രാണമയം, മനോമയം വിജ്ഞാനമയം,
ആനന്ദമയം പഞ്ചകോശങ്ങൾ സ്ഥൂലശരീരം, സൂക്ഷ്മശരീ
രം, കാരണശരീരം ഇവ രൂപാത്മാവിന്റെ നാശം തൊണ്ണൂ
റററു

Colophon

Author.

Remarks—On the last Fol occur the following few lines

च्ह्रां च्ह्रीं च्ह्रूं छमलवरयूं शुक्रशापं मोचय मोचय । मां
मीं मूं ममलवरयूं शुक्रशापं मोचय मोचय । यां यीं यूं यमलवरयूं
शुक्रशापं मोचय मोचय ।

श्रीनाथादिगुरुत्रयं गणपतिं पीठत्रयं भैरवं
सिद्धौघं वटुकत्रयं पदयुग मूर्तिक्रमं मण्डलम् ।
वीराद्यष्टचतुष्कषष्टिनवकं वीरावलीपञ्चक
श्रीमन्मालिनिमन्त्रराजसहितं वन्दे गुरोर्मण्डलम् ॥

This portion has been noticed as a separate work, namely मन्त्रविशेष, in RCMPL

॥ कृष्णकवचम् ॥

1160 C KRSNAKAVACAM

Substance—Palm leaf Size—4½" × 1½" Leaves—5
7—9 lines per page and 9—12 letters per line
Script—Malayalam No of Granthas—25

Subject—Same as No 1144 A

Beginning

श्रीवेदव्यास ऋषिः । गायत्री छन्दः । श्रीविश्वरूपो महाविष्णुर्देवता ॥

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं
विश्वाकारं गगनसदृशं मेघवर्णं शुभाङ्गम् ।
लक्ष्मीकान्तं कमलनयनं योगिहृद्ध्यानगम्यं
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥

हरिः ।

प्रणम्य देवं विघ्नेशं प्रणम्य च सरस्वतीम् ।
प्रणम्य च मुनीन् सर्वान् सर्वशास्त्रविशारदान् ॥

श्रीकृष्णकवचं वक्ष्ये श्रीकीर्तिविजयप्रदम् ।
कान्तारे पथि दुर्गे च सदा रक्षाकरं नृणाम् ॥

End

दिवा पायाज्जगन्नाथो रात्रौ नारायणः स्वयम् ।
सर्वकालमुपास्ये च सर्वकामार्थसिद्धये ॥
इदं कृष्णबलोपेत यः पठेत् कवचं नरः ।
सर्वदार्त्तिभयान्मुक्तः कृष्णभक्ति समाप्नुयात् ॥

Author

Remarks—Same as No 1147B

॥ अद्वैतपञ्चरत्नम् ॥

1160 D ADVAITAPAÑCARATNAM

Substance—Palm leaf Size—$4\frac{1}{4}'' \times 1\frac{1}{2}''$ Leaf—1 10—11 lines per page and 12—14 letters per line Script—Malayālam No of Granthas —8

Subject—Same as No 539 (Vol II)

Beginning

हरिः ।

नाहं देहो नेन्द्रियाण्यन्तरङ्गं
नाहंकारः प्राणवर्गो न बुद्धिः ।
दारापत्यक्षेत्रवित्तादिदूरः
साक्षी नित्यः प्रत्यगात्मा शिवोऽहम् ॥

रज्ज्वज्ञानाद्भाति रज्जुर्यथाहिः
स्वात्माज्ञानादात्मनो जीवभावः ।
आलोक्याहिभ्रान्तिनाशे स रज्जु-
र्जीवो नाहं देशिकोक्त्या शिवोऽहम् ॥

End

मत्तो नान्यत् किञ्चिदत्रास्ति दृश्यं
सत्यं बाह्यं वस्तु मायोपक्लृप्तम् ।
आदर्शान्तर्भासमानस्य तुल्य-
मस्मिन् द्वैते भाति तस्माच्छिवोऽहम् ॥

Colophon

इति पञ्चरत्नम् ।

Author—Śaṅkarācārya

Remarks—The text (noticed under No 539, Vol II) alone is embodied in this Ms

॥ कृष्णविषयश्लोकाः ॥

1160 E KRSNAVISAYAŚLOKA

Substance—Palm leaf Size—4¼″×1½″ Leaves—2
9—11 lines per page and 12—14 letters per line
Script—Malayālam No of Granthas—18

Subject—Same as No 1144 A

Beginning

गुरुभ्यो नमः ।
जीवस्य तुर्यं हि शिवस्य जाग्रं
शिवस्य तुर्यं हि परस्य जाग्रम् ।

परस्य तुर्यं परतत्त्वमेतत्
ततः परं वस्तु न विद्यते क्वचित् ॥

सच्चिदानन्दमद्वैतमप्रमेयमकल्मषम् ।
श्रीसूर्यनारायणगुरुं वन्दे सर्वशुभाप्तये ॥

श्रीसूर्यनारायणगुरोः पादपङ्कजरेणुभिः ।
पुनातु हृदयादर्शं नमामि लोकनाथ वः (?) ॥

सानन्दरूपं सकलप्रबोध-
मानन्ददानामृतपारिजातम् ।
मानुष्यपक्षेपु रविस्वरूप
प्रणौमि तुङ्गत्तेषु (ഇങ്ങുമിത്തേ) सार्यमूर्तिम् ॥

End

कृष्णो रक्षतु मां चराचरगुरुः कृष्णं नमस्ये सदा
कृष्णेनैव सुरक्षितोऽहमसकृत् कृष्णाय दत्तं मनः ।
कृष्णादेव समुद्भवो मम विभो कृष्णस्य दासोऽस्म्यहं
कृष्णे भक्तिरचञ्चलास्तु भगवन् हे कृष्ण तुभ्यं नमः ॥

आताम्रादिमनोहराधरपुटे विन्यस्तवंशं मुदा
रन्ध्रव्यापृतकोमलाङ्गुलिदलं साचीकृतास्याम्बुजम् ।
व्यत्यस्ताङ्घ्रिसविभ्रमोन्नमितवामभ्रूलतान्तस्थितं
चित्ते मे स्फुरतादिदं मुररिपोर्विश्वैकसम्मोहनम् ॥

Colophon

Author

Remarks—The designation herein given is evidently based on the closing two stanzas The work commences with the invocation of preceptors

in general It is written in Skt and Malayālam The work comprised in four leaves after the close deals with a different topic and is noticed separately

---

॥ वर्णदेवतास्तवः ॥

1160 F VARNADEVATĀSTAVA

Substance—Palm leaf Size—4¾″ × 1½″ Leaves—4
9 lines per page and 12—15 letters per line
Script—Malayālam No of Granthas—30

Subject—A panegyric of the deities presiding over nerve-centres in the human body

Beginning

आधारे लिङ्गनाभौ हृदयसरसिजे तालुमूले ललाटे
द्वैपत्रे षोडशारे द्विदशदशदळे द्वादशार्द्धे चतुष्के ।
वासान्ते बालमध्ये डभकरसहिते कण्ठदेशे स्वराणा
हंसं तत्त्वार्थयुक्तं सकळदळयुतं वर्णरूपं नमामि ॥
आधारस्तु चतुर्द्दळारुणलसद्वासान्तवर्णाश्रितं
स्वाधिष्ठानमनल्पविद्युतनिभं बालान्तषट्पत्रिकम् ।
रक्ताभ मणिपूरक दशदळ डाद्यं फकारान्तिक
पत्रैर्द्वादशकैरनाहतरुचि हैमकरणावृतम् ॥

End

विश्वव्यापिनमादिदेवममल नित्योदित निष्कलं
नित्योद्बुद्धसहस्रपत्रकमलैर्लिप्यक्षरैर्मण्डितैः ।
नित्यानित्यमनन्तपूर्णपरचित्स्वच्छात्मनित्यकं(?)
स्वच्छात्मानमनेकविश्वकुहर ध्यायामि तद् ब्रह्मकम् ॥

नमो गणेशाय नमो विधात्रे
नमो मुकुन्दाय नमश्शिवाय ।
नमो रमेशाय गुरुस्वरूपिणे
नमो नमः श्रीपरमात्मने नमः ॥


Colophon

Author

Remarks—The following twelve names of Hanumān are quoted at the end of the codex

हनूमानञ्जनासूनुर्वायुपुत्रो महाबलः ।
रामेष्टः फल्गुनसखः पिङ्गाक्षोऽतुलविक्रमः ॥
उदधिक्रमणश्चैव सीताशोकविनाशनः ।
लक्ष्मणप्राणदाता च दशग्रीवस्य दर्पहा ॥
द्वादशैतानि नामानि हनूमान् तत्कृताञ्जलिः (?) ॥

The work is based on the yogic truth that varnas imprinted in nerve centres function as deities



॥ आत्मबोधः ॥

1160 G ĀTMABODHA

Substance—Palm leaf Size—$4\frac{1}{4}'' \times 1\frac{1}{3}''$ Leaf—1
11 lines per page and 14 letters per line
Script—Malayālam No of Granthas—8

Subject—Beginning—Same as No 554 (Vol II)

End

संसारः स्वप्नतुल्यो हि रागद्वेषादिसंकुलः ।
स्वकाले सत्यवद् भाति प्रबोधे सत्यसद् भवेत् ॥

तावत् सत्य जगद्भाति शुक्तिकारजत यथा ।
यावन्न ज्ञायते ब्रह्म सर्वाधिष्ठानमव्ययम् ॥

Colophon

Author—Same as No 551 (Vol II)

Remarks — This work has been published with Malayalam commentary as No 11 in SCMMS

॥ दक्षिणामूर्त्यष्टकम् ॥

1160 H DAKSINĀMŪRTYASTKAM

Substance—Palm leaf Size—4¼" 1" Leaves—3½ 9 lines per page and 12—13 letters per line Script—Malayalam No of Granthas —25

Subject—A eulogy of Daksinamurti

Beginning

विश्वं दर्पणदृश्यमाननगरीतुल्यं निजान्तर्गतं
पश्यन्नात्मनि मायया बहिरिवोद्भूतं यथा निद्रया ।
यः साक्षात्कुरुते प्रबोधसमये स्वात्मानमेवाद्वयं
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥

बीजस्यान्तरिवाङ्कुरो जगदिदं प्राङ्निर्विकल्पं पुन-
र्मायाकल्पितदेशकालकलनावैचित्र्यचित्रीकृतम् ।
मायावीव विजृम्भयत्यपि महायोगीव यः स्वेच्छया
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥

End

मर्वात्मत्वमिति स्फुटीकृतमिद यस्मादमुष्मिन्स्तवे
तेनास्य श्रवणात्तथा च मननाद् ध्यानाच्च सङ्कीर्तनात् ।
सर्वात्मत्वमहाविभूतिसहित स्यादीश्वरत्वं स्वतः
मि(द्ध्येत्?ध्येत्) तत्पुनरष्टधा परिणतं चैश्वर्यमव्याहतम् ॥

Colophon

इति दक्षिणामूर्त्यष्टक समाप्तम् । गुरवे नमः ।

Author—Śankarācārya

Remarks—The Ms is printed in N S Press Bombay

॥ अद्वैतविषयश्लोकाः ॥

1160 I ADVAITAVIṢAYAŚLOKA

Substance—Palm leaf Size—$4\frac{1}{4}'' \times 1\frac{1}{2}''$ Leaf—1 12 lines per page and 12—16 letters per line Script—Malayālam No of Granthas—10

Subject—Monism

Beginning

अल विकल्पैरहमेव दैवतं
मयि स्थितं विश्वमिदं चराचरम् ।
इदं रहस्यं मम येन दर्शितं
तद्दर्शनीयो गुरुरेव केवलः ॥

पाण्डित्यादर्थलोभाद्वा प्रमादाद्वा प्रयच्छति ।
तस्यावश्य महाघोर डाकिनीशापमापतेत् ॥

सुखस्य दुःखस्य न कोऽपि दाता
परो ददातीति कुबुद्धिरेषा ।
अहं करोमीति वृथाभिमानः
स्वकर्मसूत्रग्रथितो हि लोकः ॥

End

[illegible]

[illegible]

नवप्रादेशमात्रोऽस्य हस्तपादादिमानहम् ।
इति निश्चयवाल्लोके जीवात्मेत्यभिधीयते ॥

Colophon

Author

Remarks—The Nirvāṇāṣṭaka quoted at the end of the work is noticed as No 1160 J

॥ निर्वाणाष्टकम् ॥

1160 J NIRVĀṆĀṢṬAKAM

Substance—Palm leaf Size—4¼" 1½" Leaf—1 11 lines per page and 14 letters per line Script—Malayālam No of Granthas—10

Subject—Same as No 1160 I

Beginning

हरिः ।

मनोबुद्ध्यहङ्कारचित्तानि नाहं
न चक्षुर्न जिह्वा न च घ्राणश्रोत्रे ।

न भूमिर्न तोयं न तेजो न वायु-
श्चिदानन्दरू(प?पः) शिवोऽहं शिवोऽहम् ॥
न मृत्युश्च शङ्का न मे जातिभेदः
पिता नैव मे नैव माता न जाता ।
न बन्धुर्न मित्रं गुरुश्चैव शिष्या
चिदानन्दरू(प?पः) शिवोऽहं शिवोऽहम् ॥

अहं निर्विकल्पो निराकाररूपी
विभूत्यादि सर्वत्र सर्वेन्द्रियाणाम् ।
न चासंगमद् नैव मुक्तिर्न शोभा
चिदानन्दरू(प?पः) शिवोऽहं शिवोऽहम् ॥
शुश्रूषा श्रवणश्चैव ग्रहणं धारण तथा ।
ऊहापोहार्थविज्ञान तत्त्वज्ञान तु धीगुणाः ॥

Colophon

Author—Śankarācārya

Remarks—This work is printed in Śankaragranthāvali Serie Devīmāhātmya which is said to be appended to this Ms in RCMPL, is missing herein

॥ आत्मबोधः (केरलभाषाव्याख्योपेतः) ॥

1160 K ĀTMABODHA
with Malayālam commentary

Substance—Palm leaf Size—$4\frac{1}{4}'' \times 1\frac{1}{2}''$ Leaves—37.

7—9 lines per page and 11—16 letters per line Script—Malayalam No of Granthas —225

Subject—Same as No 554 (Vol II)

Beginning

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु । श्रीगुरुभ्यो नमः ।

तपोभिः क्षीणपापानां शान्तानां वीतरागिणाम् ।

मुमुक्षूणामपेक्ष्योऽयमात्मबोधो विधीयते ॥

തപസ്സുകളെക്കൊണ്ടു ... ശാന്തന്മാരായി രാഗാദികളോടു വേർപെട്ടു ... വക്കായിക്കൊണ്ടു ആത്മബോധം ...

बोधोऽन्यसाधनेभ्यो हि साक्षान्मोक्षैकसाधनम् ।

पाकस्य वह्निवज्ज्ञानं विना मोक्षो न सिध्यति ॥

End

दिग्देशकालाद्यनपेक्ष्य सर्वगं

शीतादिहृन्नित्यसुखं निरञ्जनम् ।

यः स्वात्मतीर्थं भजते विनिष्क्रियः

स सर्ववित् सर्वगतोऽमृतो भवेत् ॥

യാവനൊരുത്തൻ ദിഗ്ദേശകാലാദികളോടു വേർപെട്ടു എല്ലാടവും വ്യാപിച്ചു ശീതാദികളെ കളഞ്ഞു നിത്യസുഖവുമായി ഒരു സമ്പർക്കത്തോടുംകൂടാതെയിരിക്കുന്ന ആത്മാവാകുന്ന തീർത്ഥത്തെ സേവിക്കുന്നു അവൻ നിർവ്യാപാരനായി എല്ലാ വസ്തുവിനേയും അറിഞ്ഞു എല്ലാടവും വ്യാപിച്ചു ആത്മസ്വരൂപനായി തീരും ഇതു അജ്ഞാനമാദിയായിരിക്കുന്ന രാഗാദികളെ നീക്കി സ്വജ്ഞാനത്തെ ബോധിപ്പാൻ ഉള്ള ആത്മബോധമാകുന്നതു.

Author

Remarks—The Ms is published as No 11 SCMMS The Malayālam commentary on verses 62—68 herein embodied differentiates it from the printed edition The following verse is added at the close of the Ms

आचार्य.रूपावस्थागमिगमनुमिऽच्छिद्यरू गोत्तरार-
ण्यावेर्य.. मितेन स्फुटतरपरिबोधाग्निना दह्यमाने ।
कर्मालीवासना रकृततनुभवदुभ्रान्तिकान्तारपूरे
दाह्याभावादनिद्याशिखिनि च विरते त्वन्मयी खल्ववस्था ॥

॥ गुरुपादुकापूजाक्रमः ॥

1160 L GURUPĀDUKĀPŪJĀKRAMA

Substance—Palm leaf Size—$1\frac{1}{4}' \times 1\frac{1}{2}''$ Leaves—4 6—9 lines per page and 14—16 letters per line Script—Malayālam No of Granthas—25 Incomplete

Subject—Description of the worship of sandals of one's preceptor

Beginning

हरिः । श्री । ओ श्री स्वस्ति । श्रीपरमशिवशक्तिश्रीना-
थाद्यशेषगुरुपारम्पर्यक्रमेण अस्मद्गुरुचरणारविन्दं यावत् ता-
वत् पूजयामि । गु गुरुभ्यो नमः । गं गणपतये नमः ।
दुं दुर्गायै नमः । क्ष क्षेत्रपालाय नमः । सं सरस्वत्यै नमः । प
परमात्मने नमः । परमगुरवे नमः । परापरगुरवे नमः । परमे-

त्रिगुरवे नमः । परमगुरुश्रीपादुकां पूजयामि । परापरगुरु-
श्रीपादुकां पूजयामि ।

End

घट ब्रह्म रमो विष्णु पुष्पित रुद्रमेव च ।
आमोदमीशानदोन्कं ओं जीव मदाशिवम् ॥
ച്ചുന്ന ധ്യാനിച്ചു ഓം ഹ്രീം ക്ലീം സൌം വിദ്യാഗിരീന്ദ്രൻ വി
സർജ്ജയാമി ന്നു വിഷമവിട്ടു കളെഞ്ഞു അറ ന്താം ഓം ചർം

Author

Remarks—The following verse is added at the close of the Ms

क्षुद्र चरं सुमनसां चरणे मिलित्वा
रक्त पडङ्घ्रिगणमासमु लुब्धकर्णम् ।
अग्रे वृक्षानमुतुपोऽविगणश्च यान्तं
पृष्ठे मृगं मृगयुलुब्धकबाणभिन्नम् ॥

॥ पञ्चाक्षरचक्रम् ॥

1160 M PAÑCAKSARACAKRAM

Substance—Palm leaf Size—1¼" 1½" Leaf—1
9 lines per page and 14 letters per line
Script—Malayalam No of Granthas—8

Subject—The method of drawing 'Pancaksara-cakra'

Beginning

नकारं स्तम्भनम् । मकार मोहनम् । शिकारमुच्चाटनम् ।
वकारं वशीकरम् । यकारं संहारम् । ओं प्राणाय प्राणाय

प्राणप्रदिष्टाय प्राणालिङ्गाय ऐं क्लीं मौः मौः क्लीं ऐं मे बलं वे मुक्त स्वाहा ।

End

नमः शिवाय । य नमः शिव । वयनमः शि ।

Author

Remarks—The Ms contains also the diagram of Pañcākṣaracakra

॥ गरुडपञ्चाक्षरी ॥

1160 N GARUDAPAÑCĀKṢARĪ

Substance—Palm leaf Size—$4\frac{1}{4}'' \times 1\frac{1}{2}''$ Leaves—2
7 lines per page and 10—14 letters per line
Script—Malayālam No of Granthas—5

Subject—Mantra for procuring the favour of Garuda

Beginning

हरिः । अस्य श्रीगरुडपञ्चाक्षरीमहामन्त्रस्य । काश्यप ऋषिः । अनुष्टुप् छन्दः । श्रीमहाविष्णुर्देवता । क्षां बीजं क्षीं शक्तिः । क्षूं कीलकम् । मम इष्टकाम्यार्थसिद्धिरस्तु ।

End

अमृतकलशहस्त कान्तिसम्पूर्णदेह
सकलविबुधवन्द्य वेदशास्त्रं विशुद्धम् ।
विकटमणिमकूटं धूयमानाण्डगोळं
मकलविबुधवन्द्यं चिन्तये पक्षिराजम् ॥

शुभमस्तु ।

Author

Remarks—The lines quoted below occur at the close of the Ms

തടങ്ങ താമര [illegible] കണ്ട
[illegible] ന്നി
[illegible]
[illegible]

ഓം ഗുരു[illegible] ന്താൻ
ആശാൻ താൻ [illegible] ഗുരു
വെന്നിൽ [illegible] തൊഴുതു
ത്തുകൊണ്ടേൻ [illegible] കൊണ്ടേൻ
ഏറി [illegible] ശ്രീ[illegible] തിരുവടി
ശംഖ, ചക്രം [illegible] ളിയ
നീരും [illegible] ളിയ
നീരും

चण्डीसप्तति: ॥

1161 CANDĪSAPTATI.

Substance—Palm leaf Size—7″ × 1½″ Leaves—18 8 lines per page and 22 letters per line. Script—Malayālam No of Granthas—185. Complete.

Subject—A panegyric of Devi.

Beginning etc.—Same as No 1147 H.

Remarks—The Ms is somewhat decayed The introductory portion under No 1163 discloses that the work was composed by one Bhattikāna The work is noticed on p 136, TCM Vol I Part I A with commentary

—

॥ चण्डीसप्ततिः ॥

1162 CANDĪSAPTATI

Substance—Palm leaf Size—7" x 1½" Leaves—12 10 lines per page and 22 letters per line Script—Malayālam No of Granthas—185

Subject etc —Same as No 1161

Remarks—The Ms is much worn out The seventh Fol is missing Both the beginning and the end are damaged

॥ चण्डीसप्ततिः (सव्याख्या) ॥

1163 CANDĪSAPTATI

with commentary

Substance—Palm leaf Size—6½" 1" Leaves—141 4—6 lines per page and 18 letters per line Script — Malayālam. No of Granthas—800 Complete

Subject—Same as No 1161

Beginning

हरिः श्रीगणपतये नमः । श्रीदुर्गायै नमः ।

इह खलु स्वभावादेव मानुनां प्रवृत्तिरुपकारिणीति न्याय परमगुरुतरकरुणाभरभरितहृदयो भगवान् भट्टबाणनामा आचार्यः सर्वलो(क?कानु)जिघृक्षया झटिति परदेवताप्रसादकरमहिततर भवानीपदकमलसपर्यामुपहाररूपस्तोत्ररत्नं ससाति श्लोक(स?सं)ग्रहरूपं समचीकरत् ।

मा भाङ्क्षीर्विभ्रम रत्नतनिग्रहः ॥

अस्य श्लोकस्यार्थं क्रियाकारकसम्बन्धः श्रद्धाप्रेरितेन मया यथाश्रवण संक्षेपतो दर्श्यते ।

End

इत्थं महिषभयां सदन्या समरमतियुद्धमधिकृत्य सममेवोच्यमाना पुनरपि विशिनष्टि देवपक्षपातेन दानव दारयन्ती विनाशयन्तीत्यर्थः ॥

Colophon

Author—Text Bhattabana.

Remarks — The commentary is exhaustive and lucid The portion missing in No 1162 is furnished here *in toto* The commentary is identical with that noticed on pp 2146—2147, TCM Vol II, Part I C. From the following portion, " या गोविन्दपूर्वासूतदिव्यना(यन्? ज्ञा)कृता कृतिर्विष्णुशिवार्चना स्यात् " occurring at the close thereof it is clear that the commentator was Govindamita

॥ तुलसीकवचम् ॥

1164 A TULASĪKAVACAM

Substance—Palm leaf Size—$14\frac{1}{2}'' \times 1\frac{1}{2}''$ Leaves—3
6 lines per page and 40—44 letters per line
Script—Grantha No of Granthas—50

Subject—Glorification of the goddess Tulasī

Beginning

ध्यायेत् पीताम्बरधरां पीनवृत्तपयोधराम् ।
पद्मकल्हारवरदाभयहस्तां चतुर्भुजाम् ॥
श्यामां पद्मपलाशाक्षीं नीलकुञ्चितमूर्द्धजाम् ।
स्फुरत्कुण्डलसंयुक्तां पूर्णचन्द्रनिभाननाम् ॥
मञ्जुग्रैवेयमञ्जीरमेखलादामशोभिताम् ।
शुक्लवस्त्रोत्तरीयां तां दिव्यगन्धानुलेपनाम् ॥
उमादेव्या सरस्वत्या वामभागे समाश्रिताम् ।
धरण्या च महालक्ष्म्या दक्षिणे पार्श्वके स्थिताम् ॥
अप्सरोभिरनेकाभिः सेव्यमानां समन्ततः ।
ध्यानं तुळस्या द्विविधं सौम्यमुग्रं प्रकीर्त्तितम् ॥
सौम्यां सुधाकुम्भधरां द्विभुजामभयप्रदाम् ।
शुक्लमाल्याम्बरधरां ध्यायेद्देवीं मनोहराम् ॥
उग्रं तु शङ्खचक्रे च बाणं चापं च बिभ्रतीम् ।
कोपरक्तान्तनयनां पीतवस्त्रां च चिन्तयेत् ॥

श्यामां पद्मपलाशसुन्दरदृशं शातोदरीं शाश्वतां
धीरोदार ... ... शातकुम्भवपनां सातता (?) पराजिताम् ।

श्रीमन्छारद अन्द्रमण्डलगुर्वं नां गारदगिरिता
कान्तास्था ? शरणं व्रजामि तत्कर्मा श्रीपद्मनाभप्रियाम् ॥

End

गोमयेन मृदा चैव निर्माय प्रतिवादिनम् ।
लम्बमानां तस्य जिह्वां छित्वा चैवालिखेत्तदा ॥
वामपादेन चाक्रम्य तर्जन्या कवचं जपेत् ।
अचिरात्तस्य जिह्वायाः स्तम्भो भवति निश्चयः ॥
अन्यथा कर्षणं चैव मरणं द्वेषणं तथा ।
विन्यस्तकवचं यस्तु मन्त्रराजेन मन्त्रितम् ॥
रक्षयेत्कर्मी यस्य चक्षयेत् पन्नगंशय (?)ः ।

Colophon

इति श्रीस्कन्दपुराणे

Author—Vyasa

Remarks—The opening Fol contains the methods of using the Salagramatirtha and a verse from Mamsapancaka Unlike in other *Stutis* the invocatory verses point herein out first the rites of meditation etc and then follow the Rsi, and metre connected therewith The whole work is composed in verses of *anustup* metre At the end a *sloka* relating to *kavaca* is cited The text is borrowed from the Skandapurāna.

॥ सूर्यद्वादशनामस्तवः ॥

1164 B SŪRYADVĀDAŚANĀMASTAVA

Substance—Palm leaf Size—14½″ × 1½″. Leaf—½

8 lines per page and 34 letters per line Script—Grantha No of Granthas—10

Subject—Invocation of Sūrya

Beginning

अस्य श्रीसूर्यनारायणद्वादशनामस्तोत्रमन्त्रस्य भगवान् दुर्वासा महर्षिः । अनुष्टुप् छन्दः । श्रीसूर्यनारायणो देवता । श्रीसूर्यनारायणप्रीत्यर्थे विनियोगः ।

ॐ

आदित्यं प्रथम नाम द्वितीय च दिवाकरम् ।
तृतीय भास्कर प्रोक्तं चतुर्थ तु प्रभाकरम् ॥
हरिदश्वं पञ्चम च षष्ठ त्रैलोक्यलोचनम् ।
सप्तमं तु सहस्रांशु त्वष्टमं तु विभावसुम् ॥
नवमं दिनपति चैव दशमं तु सुरेश्वरम् ।
एकादश तु त्रैलोक्यरूप्य(?)द्वादश सूर्यमेव च ॥
द्वादशैतानि नामानि प्रातःकाले पठेन्नरः ।
दुःस्वप्ननाशनं विद्यात् सर्वदुःखप्रणाशनम् ॥
या दुष्कष्ट(?)हरश्चैव दारिद्र्यव्याधिनाशनम् ।

जयतु जयतु सूर्यः सप्तलोकैकदीपः
किरणदहितपापं (?) क्लेशदुःखस्य मोक्षम् ।
अरुणमयमगम्यमादिमादित्यमूर्ति
परमपरमदूरं भास्करं तं नमामि ॥

ॐ

Author

Remarks—Rsi and metre are also noted in the work along with the *stava* The work is identical

with R No 9342, DCSM Vol XVII But two verses in the beginning are omitted herein

॥ आदित्यहृदयम् ॥

1164 C ĀDITYAHṚDAYAM

Substance—Palm leaf Size—11½" × 1½" Leaves—1½ 19 lines per page and 32 letters per line Script—Grantha No of Granthas—20

Subject—Same as No 1147 A

Beginning

ध्येयः सदा सवितृमण्डलमध्यवर्ती
नारायणः सरसिजासनसन्निविष्टः ।
केयूरवान्मकरकुण्डलवान् किरीटी
हारी हिरण्मयवपुर्धृतशङ्खचक्रः ॥

(य: ?यैः)प्राप्यते तावकभक्तियोगः
(ते?तैः)प्राप्यते सूर्यमहत्स्वरूपम् ।
आयुष्यमारोग्यमनन्तरूप
कालान्तरे मोक्षफल प्रसिद्धम् ॥

विकर्तनो विवस्वांश्च मार्त्ताण्डो भास्करो रविः ।
लोकप्रकाशकः श्रीमान् लोकचक्षुर्ग्रहेश्वरः ॥

लोकसाक्षी त्रिलोकेशः कर्ता हर्ता तमिस्रहा ।
तपनः पवनश्चैव शुचिः सप्ताश्ववाहनः ॥

गभस्तिहस्तो ब्रह्मण्यः सर्वलोकनमस्कृतः ।
नमोष्टास्वर्चिषि (?) ब्रह्मा क्रमारार्कौ (?)नमो नमः ॥

End

आदित्यं भास्करं भानु रवि सूर्यं दिवाकरम् ।
षडेतानि पठेन्नित्य चक्षुस्तस्य महीयते ॥
आदित्यस्य नमस्का(री?र) ये कुर्वन्ति दिने दिने ।
तेषां जन्मसहस्राणि दारिद्र्य नोपजायते ॥
आयुरारोग्यमैश्वर्यं नरवर्यं सविस्तरम् ।
सवितृप्रभाकरं त(स्य?प्रसादा)आदित्यहृदयं जपेत् ॥

Colophon

इति महाभारते भीष्मपर्वणि श्रीकृष्णार्जुनसंवादे आदित्यहृदयम् ।

Authoı—Vyāsa

Remaıks—Several lacunæ occuı ın the Ms off and on The woık ıs boıowed fıom the Mahābhāıata



॥ सूर्यार्घ्यश्लोकाः ॥

1164 D SŪRYĀRGHYAŚLOKA

Substance—Palm leaf Size—14½" × 1½" Leaves—1½ 15 lines peı page and 32 letteıs peı line Script—Malayālam No of Gıanthas—15

Subject—Same as No 1164 B

Beginning

उपरि सूर्यार्घ्यम्—
जन्ममृत्युजराव्याधिसंसारभयनाशनम् ।

उदयं ब्रह्मरूपश्च मध्याह्ने तु महेश्वरम् ॥
अस्तमान स्वय विष्णुः त्रिमूर्तिर्दिवाकरः? ।

यन्मण्डलं व्याधिविनाशदक्ष
यदृग्यजुःसामसु संप्रदीप्तम् ।
प्रकाशिता येन च भूर्भुवः स्वः
पुनातु मा तत् सवितुर्वरेण्यम् ॥

यन्मण्डल वेदविदो वदन्ति
गद्योगिभिर्योगिजनैशगम्यम् ।
यत् कल्पकल्पाक्षय?कारणं च
पुनातु ॥

End

यन्मण्डल कालविभाय(त)मंज्ञं(?)
प्रवर्तयन्नूर्ध्वगति प्रमाणम् ।
यस्मिन् जगस्य सकलाखिलेय(?)
पुनातु मां ॥

यन्मण्डलं स्तोत्रमिद पवित्रं
नारायणाब्जासनरुद्रवन्दितम् ।
सुरासुरैः किन्नरगीयमान
गायन्ति यश्चादितनुप्रमेयम् ॥

Colophon

इति सूर्यार्घ्यम् ।

Author

Remarks—These stanzas are borrowed from Smṛti



॥ सूर्यनमस्कारश्लोकाः ॥

1164 E SŪRYANAMASKĀRAŚLOKA

Substance—Palm leaf Size—$14\frac{1}{2}'' \times 1\frac{1}{2}''$ Leaves—$1\frac{1}{2}$ 6 lines per page and 32 letters per line Script—Grantha No of Granthas—18

Subject—Same as No 1164 B

Beginning

सूर्यनमस्कारः ।

त्रैलोक्याय त्रिपूरुपाय कालकर्महराय च ।
सुपुण्यधररूपाय भास्कराय नमो नमः ॥
भवरोगघ्नवैद्याय सर्वरोगहराय च ।
एकानेकस्वरूपाय भास्कराय नमो नमः ॥
कुष्ठव्याधिविनाशाय दुष्टव्याधिविनाशिने ।
इष्टकाम्यार्थसाध्याय भास्कराय नमो नमः ॥
पापक्लेशापहर्त्रे च तापव्याधिनिवारिणे ।
पद्मनाभस्वरूपाय भास्कराय नमो नमः ॥

End

सौभाग्यं धनलाभं च आयुःश्रीबलवर्धनम् ।
चण्डमारुतसंहारदारिद्र्यं दुःस्वप्ननाशनम् ॥
अपस्मारभयं कुष्ठदुर्दोषभयनाशनम् ।
दुःस्वप्नशोकदुःखानां दुर्निमित्तनिवारणम् ॥
संवत्सरमुपासीत सर्वकार्यार्थसिद्धये ।
सूर्यलोके महीयते ॥

इति । शुभमस्तु ।

Colophon

Author

Remarks—Same as No 1147 A 7

॥ सरस्वतीद्वादशनामस्तवः ॥

1164 F SARASVATĪDVĀDASANAMASTAVA

Substance—Palm leaf Size—14″ 1½″ Leaves—1½ 8 lines per page and 32 letters per line Script—Grantha No of Granthas—8

Subject—Same as No 1147 A 3

अस्य श्रीसरस्वतीद्वादशनाममन्त्रस्य । वेदव्यासो भगवान् ऋषिः । अनुष्टुप् छन्दः । श्रीसरस्वती देवता । ह्रां बीजम् । ह्रीं शक्तिः । ह्रूं कीलकम् । मम श्रीसरस्वतीस्तोत्रमन्त्रपठने विनियोगः ।

ओम्—

वाग्ब्रह्ममूर्त्तिममलां परब्रह्मस्वरूपिणीम् ।
शाश्वितं (?) सर्वदेवानां नमस्यामि सरस्वतीम् ॥
नमस्ते भारति ब्राह्मि वागीश्वरि सरस्वति ।
प्रथमं भारतीनाम द्वितीयं तु महेश्वरी ॥
तृतीय शारदादेवी चतुर्थं कंसमार्द्दिनीम् ।
पञ्चमं वेदगर्भा च षष्ठं चैव सरस्वतीम् ॥
सप्तमं चैव कौमारीमिष्टमं ब्रह्मचारिणीम् ।
नवमं चैव वाराहीं दशमं ब्रह्मपुत्रिका ॥

एकादशं तु वागीशाणी द्वादशं वरदाम्बिका ।
एतानि द्वादश नामानि त्रिसन्ध्य यः पठेन्नरः ॥
तस्य सारस्वतं मन्त्रं षण्मासेनैव सिध्य(ते?ति) ।
पुरुषश्च वराहस्ते वरदां बाहूलता (?) ॥
कर्पूरामलगेहे वागीश्वरी बुद्धिचोदय (?) ।
शारदार्पणमस्तु ।

Author

Remarks—The Ms is rather inaccurate For further information see No 9328, DCSM Vol XVII

॥ भैरवाष्टकम् ॥

1164 G BHAIRAVĀSTAKAM

Substance—Palm leaf Size—$14\frac{1}{2}'' \times 1\frac{1}{2}''$ Leaves—2 6 lines per page and 34 letters per line Script—Grantha No of Granthas—25

Subject—Same as No 1154 C

Beginning

श्रीनाथ ब्रह्मरुद्रं दिनकरकिरणं चन्द्रबिम्बं ललाटे
आनन्दं दिव्यपीठ बहुविधचरितं सर्वमन्त्राधिकारम् ।
नाथ्यं प्रत्यक्षयोग ग्रहगणसहितं पावकं क्रूरदंष्ट्रं
नानारौद्रावतारं मम भयहरणं क्षेत्रपालं नमामि ॥
एकं खट्वाङ्गहस्तं पुनरपि भुजगं पाशमेकं त्रिशूलं
कापालं खड्गहस्तं डमरुकसहितं वामहस्ते पिनाकम् ।

चन्द्रार्कं केतुमालं वि(क्रु?भ्रू)तकरशिरस्समर्पयज्ञोपवीत
कालं कालान्धकारं मम भयहरणं क्षेत्रपालं नमामि ॥

End:

ब्रह्मा विष्णुश्च रुद्राः सुरगणनिकराः सोमसूर्याग्निरूपम्
आकाशं वायुभूमिर्जलमिव सकलं यस्य मूर्तिस्स्वरूपम् ।
देवार्थन्तत्वरूथं ? सकलतनुमय सर्वरूपप्रशान्तं
सर्वज्ञानोपविष्टं मम भयहरणं क्षेत्रपालं नमामि ॥
क्षेत्रे पीठोपकण्ठे सुरनगनिलये दिव्यचन्द्रोपचन्द्रे-
श्चामुण्डैर्वीरभद्रैर्गणपतिमहितैर्मन्त्रिणीप्रेतभूतैः ।
सिद्धार्याचार्यवर्यैरुपचरणयुतैर्मन्त्रतन्त्रैः समस्तै-
र्वर्धन्ते सर्ववीरं त्रिभुवननमितं क्षेत्रपालं नमामि ॥

Colophon

भैरवाष्टकमिदं पुण्यं यः पठेत् सततं नरः ।
सर्वसिद्धिमवाप्नोति सर्वकामफलप्रदम् ॥

Author

Remarks — The work is composed in ornate diction For further information see No 10951 DCSM Vol XIX (*Kṣetrapālāṣṭakam*)

॥ अर्धनारीश्वराष्टकम् ॥

1164 H. ARDHANĀRĪŚVARĀṢṬAKAM.

Substance—Palm leaf. Size—14⅛" × 1½". Leaf—1

6 lines per page and 34 letters per line. Script—Grantha. No. of Granthas—12.

Subject—Same as No 1154 C.

Beginning

अम्भोधरश्यामलकुन्तलायै तटित्प्रभातुङ्गजटाधराय ।
गिरीश्वरायै निखिलेश्वराय नमः शिवायै च नमः शिवाय ॥

कस्तूरिकाचन्दनलेपनायै श्मशानभस्माङ्गविलेपनाय ।
कृतस्मरायै विकृतस्मराय नमः शिवायै च नमः शिवाय ॥

End

प्रपञ्चसृ(ष्टिमु?ष्ट्युन्मु)खला(स्य?भि)कायै
समस्तसंहारकताण्डवाय ।
वामेक्षणायै विषमेक्षणाय ।
नमः शिवायै च नमः शिवाय ॥

अन्तर्बहिश्चोर्ध्वमधश्च मध्ये पुरश्च पश्चाच्च विदिक्षु दिक्षु ।
सर्वाङ्गकायै सकलाङ्गकाय नमः शिवायै च नमः शिवाय ॥

Colophon

उपमन्युकृतं स्तोत्रमर्द्धनारीश्वराष्टकम् ।
यः पठेच्छृणुयाद्वापि शिवलोके महीयते ॥

अर्धनारीश्वराष्टकं सम्पूर्णम् ।

Author—Upamanyu

Remarks—The epithets used in this panegyric refer respectively to Pārvatī and Parameśvara For further information refer to R. No. 610 H.

(TCM Vol I, Part I Skt C) entitl d Umamahesvarastotram

॥ दधिवामनस्तवः ॥

1164 I DADHIVĀMANASTAVA

Substance—Palm leaf Size—14½″ × 1½″ Leaves—2 6 lines per page and 34 letters per line Script —Grantha No of Granthas—25

Subject—A panegyric of Vāmana

Beginning

अस्य श्रीदधिवामनस्तोत्रमन्त्रस्य । भगवान् वसिष्ठ ऋषिः । गायत्री छन्दः । श्रीदधिवामनो देवता । नारायणायेति बीजम् । लक्ष्मीरिति शक्तिः । मम गृहे शाल्यन्नक्षीरदधिघृतासिद्ध्यर्थं श्रीदधिवामनप्रीत्यर्थे जपे विनियोगः ।

ओम्—

हेमाद्रिशिखराकारं शुद्धस्फटिकसन्निभम् ।
पूर्णचन्द्रनिभं देवं द्विभुजं वामनं स्मरेत् ॥
पद्मासनस्थं देवेशं चन्द्रमण्डलमध्यगम् ।
ज्वलत्कालानलप्रख्यं तटित्कोटिसम(प्रभम्) ॥
सूर्यकोटिप्रतीकाशं चन्द्रकोटिसुशीतलम् ।
चन्द्रमण्डलमध्यस्थं विष्णुमव्ययमच्युतम् ॥

End

इदं स्तोत्रं जपेन्नित्यं प्रातःकाले द्विजोत्तमः ।
अक्लेशादन्नसिद्ध्यर्थं ज्ञानसिद्धि .. , ॥

अभ्रश्यामः शुभ्रयज्ञोपवीती
सत्कौपीनः पीतकृष्णाजिनश्रीः ।
छत्री दण्डी पुण्डरीकायताक्षः
पायाद्देवो वामनब्रह्मचारी ॥
अजिनदण्डकमण्डलुमेखलारुचिरपावनवामनमूर्तये ।

Colophon

इति दधिवामनस्तुतिः समाप्ता ।

Author—Vasista

Remarks—The text is borrowed from Vāmana-purāna The recital of this *Stava* is conducive to the procurement of prosperity in general and of square meals in particular Refer also to No 9996, DCSM Vol XVIII

॥ लक्ष्मीनृसिंहस्तवः ॥

1164 J LAKSMĪNRSIMHASTAVA

Substance—Palm leaf Size—$14\frac{1}{2}'' \times 1\frac{1}{2}''$ Leaves—2 6 lines per page and 32 letters per line Script—Grantha No of Granthas—25

Subject—A panegyric of Laksmīnrsimha

Beginning

करावलम्बम्—

सत्यज्ञानसुखस्वरूपममलं क्षीराब्धिमध्यास्थितं
योगारूढमतिप्रसन्नवदनं (भू)षासहस्रोज्ज्वलम् ।

त्र्यक्षं चक्रपिनाकसाभयकरं बिभ्राणमर्कच्छविं
छत्रीभूतफणीन्द्रमिन्दुधवलं लक्ष्मीनृसिंहं भजे ॥

श्रीमत्पयोनिधिनिकेतन चक्रपाणे
भोगीन्द्रभोगमणिरञ्जितपुण्यमूर्ते ।
योगीश शाश्वत शरण्य भवाब्धिपोत
लक्ष्मीनृसिंह मम देहि करावलम्बम् ।

ब्रह्मेन्द्ररुद्रमरुदर्ककिरीटकोटि-
सङ्घट्टिताङ्घ्रियुगलामलकान्तिकान्त ।
लक्ष्मीलसत्कुचसरोरुहराजहंस
लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥

End

लक्ष्मीश केशव गदाधर वासुदेव
यज्ञेश यज्ञ मधुसूदन पुष्कराक्ष ।
ब्रह्मण्य केशव जनार्दन वासुदेव
लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥

Colophon

यन्माययार्जितभवप्रचुरप्रवाह-
मग्नार्तमर्त्यनिवहोरुकरावलम्बम् ।
लक्ष्मीनृसिंहचरणाब्जमधुव्रतेन
स्तोत्रं कृतं सुखकरं भुवि शङ्करेण ॥

अहो वीर्यमहो शौर्यमहो बाहुपराक्रमः ।
नृसिंहः परमं दैवमहो बलमहो बलम् ॥

एकेन चक्रमितरेण करेण शङ्ख-
मन्येन सिन्धुतनयामवलम्ब्य तिष्ठन् ।

वामेतरेण वरदाभयपद्मचिह्नम्
लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥

Author—Śankarācārya

Remarks—Certain verses of meditation on Nrsimha extraneous to this composition are quoted at the beginning This *stava* is also known as Karāvalambastava It is available in print but the Ms contains additional slokas A Fol describing the method of using the *sālagrāma tīrtha* is inserted in the middle



॥ विघ्नेशद्वादशनामस्तवः ॥

1164 K VIGHNEŚADVĀDAŚANĀMASTAVA.

Substance—Palm leaf Size—14½″ × 1½″ Leaves—1½ 6 lines per page and 38 letters per line Script—Grantha No of Granthas—8

Subject—Glorification of *Ganapaty*

Beginning

प्रणम्य शिरसा देवं गौरीपुत्रं विनायकम् ।
भक्त्या हि संस्मरेन्नित्यमायुष्कामार्थसिद्धये ॥
प्रथम वक्रतुण्डं च एकदन्तं द्वितीयकम् ।
तृतीयं कृष्णपिङ्गं च गजकर्णं चतुर्थकम् ॥
पञ्च लम्बोदरं चैव षष्ठं विकटमेव च ।
सप्तमं विघ्नराजेन्द्रं धूम्रवर्णं तथाष्टमम् ॥

नवम फालचन्द्रं च दशम तु विनायकम् ।
एकादशं गणपति (चैव?) द्वादशं हस्तिना मुखम् ॥

End

एतानि द्वादश नामानि त्रिसन्ध्यं श्रद्धयान्वितः ।
न च विघ्नो भवेत्तस्य सर्वसिद्धिप्रदो भवेत ॥
विद्यार्थी लभते विद्या धनार्थी लभते धनम् ।
कन्यार्थी लभते कन्यां मोक्षार्थी लभते गतिम् ॥
जपन् गणपतिस्तोत्रं षड्भिर्मासैर्लभेमहि? ।
संवत्सरेण सिद्ध्यन्ति लभते नात्र संशयः (?) ॥

Colophon

विघ्नेश्वरद्वादशम् ।

Author

Remarks—The citations given above comprise the complete text

॥ भैरवनामाष्टोत्तरशतकम् ॥

1164 L BHAIRAVANĀMĀSTOTTARAŚATAKAM.

Substance—Palm leaf. Size—14½" × 1½" Leaves—4
6 lines per page and 32 letters per line
Script—Grantha. No. of Granthas—50

Subject—Enumeration of the names of Bhairava

Beginning

पार्वत्युवाच—
कैलासशिखरे रम्ये सुखासीनं त्रियम्बकम् ।
शङ्करं परिपप्रच्छ पार्वती परमेश्वरम् ॥

अथैष भैरवो नाम आपदुद्धारको मतः ।
त्वया च कथितो देवो भैरवः कल्प उत्तमः ॥
तस्य नामसहस्राणि प्रयुतान्यर्बुदानि च ।
सारमुद्धृत्य तेषां वै नामाष्टशतकं वद ॥
यानि सङ्कीर्तयन्मर्त्यः सर्वदुःखविवर्जितः ।
सर्वान् कामानवाप्नोति साधकः सिद्धिमेव च ॥

महेश्वर उवाच—

शृणु देवि प्रवक्ष्यामि भैरवस्य महात्मनः ।
आपदुद्धारकस्याहं नामाष्टशतमुत्तमम् ॥

End

विप्रकाश्यं परं गुह्यं न देयं यस्यकस्यचित् ।
सत्कुलीनाय शान्ताय ऋजवे धर्मशालिने ॥
दद्यात् स्तोत्रमिदं पुण्यं सर्वकामफलप्रदम् ।
एवं कृत्वा तथा देवि नामाष्टशतमुत्तमम् ॥
भैरवस्य प्रहृष्टाश्र श्वस्याचे च महेश्वरम्? ।

Colophon

इत्युमामहेश्वरसंवादे ईश्वरप्रोक्तम् आपदुद्धारकस्तोत्रं सम्पूर्णम् । शुभमस्तु ।

Author

Remarks—The work is in the form of instructions received from Paramesvara by Pārvatī and the Rsi Metre etc, connected therewith are set forth in a verse For further information see No 9234, DCSM Vol XVII The text is borrowed from *Rudrayāmala*

॥ गरुडकवचम् ॥

1164 M GARUḌAKAVACAM

Substance—Palm leaf. Size—14½"×1¾". Leaves—6.
7 lines per page and 30 letters per line.
Script—Grantha. No. of Granthas—60.

Subject—Glorification of Garuḍa.

Beginning:

पुरा कैलासशिखरे विचरन्नुमया सह ।
गिरीशः कथयामास कथां चित्रां चिरन्तनः ॥
स कदाचित् प्रसंगेन सर्पाणां दर्पनाशनम् ।
गारुडस्यागमं हृष्टो जगाद गिरिकन्यकाम् ॥
गारुडं हरिमाहात्म्यं विज्ञातुं केन शक्यते ।
तपःप्रभावाद्विदितं तत् सर्वं केवलं मया ॥
परस्य ब्रह्मणो रूपं प्रसिद्धं गरुडात्मनः ।
विनतायामभूदादौ काश्यपस्य प्रजापतेः ॥
अङ्गसंगाच्चतुर्वेदी भास्तिरस्कृतभास्करः ।
यस्य ध्वजनिवर्तन (?)शब्दः शास्त्रात्मनः श्रुतम् ॥
कालकूटादिकविषैः काद्रवेयैरहीश्वरैः ।
क्रान्तं जगत् पुरा कृत्स्नमुदजीवयदुद्भवे ॥
स्मृते कथाप्रसंगेन यस्य नाम्नि महौजसः ।
भ्रूणानि भोगिसुभ्रूणां भ्रंशन्ति भ्रान्तचेतसाम् ॥
जन्मना यस्य जातीयपक्षिरूपानुवर्तिनः ।
पतत्रिणामिदं सर्वं पवित्रितमभूत् कुलम् ॥

End ·

- आराधयन् विधानेन गारुडं कवच विभुः ।
आशीविषैः सेव्यमानो जयत्यासप्तम कुलम् ॥
न चापमृत्युश्चरति कुलेऽमुष्य कदाचन ।
राजक जायते नास्य भय दैविकमेव च ॥
अन्नं च षड्रसोपेत लभते जपता सदा ।
तदिदं कवच गौरि यथावत् कथितं मया ॥
असत्सु नोपदेष्टव्य सत्सु वाच्यं विशेषतः ।
जपतः कवच दिव्यमिद त्रैविष्टपा जनाः ॥
अनेन लब्धकामार्था मोदन्तेऽद्यापि पार्वति

Colophon

इति गरुडकवचं संपूर्णम् ।

Author

Remarks—The work commences with a dialogue between Pārvatī and Paramesvara It is considered to be much efficacious by poison-curers For further information see Nos 6149—6955, DCSM Vol XII

॥ गायत्रीहृदयम् ॥

1164 N GĀYATRĪHṚDAYAM.

Substance—Palm leaf Size—$14\frac{1}{2}'' \times 1\frac{1}{2}''$ Leaves—

8½. 6 lines per page and 32 letters per line Script—Grantha. No of Granthas—100.

Subject—The rites connected with the chanting of Gāyatrī and the effects thereof

Beginning

गायत्रीहृदयमहामन्त्रस्य ब्रह्मा ऋषिः । गायत्री छन्दः । अग्निर्देवता । अं बीजम् । स्वाहा शक्तिः । गायत्रीप्रसादसिद्ध्यर्थे विनियोगः अं हृ×नमः । इं शि×हा । उं शिखा । एं क × हुं । ओ ने×वौषट् । अं अ+ट्र । एवं हृद(यादि)न्यासः ।

ध्यानम् ।

अचलमलमवर्णं वर्णरूपादिहीनं
निखिलगुणमगुह्य गुण्यमेक सुसूक्ष्मम् ।
अमलममलतत्त्वाद्देवि पश्यन्ति ये मे
हृदयकमलमध्ये सन्ततं चिन्तयामि ॥

ओं नमस्कृत्य भगवान् याज्ञवल्कयः स्वयम्भुं परिपृच्छति । त्वं ब्रूहि ब्रह्मन् गायत्र्या उत्पत्तिं श्रोतुमिच्छामि । ब्रह्मज्ञानोत्पत्तिं प्रकृतिं परिपृच्छामि । ब्रह्मोवाच प्रणवेन व्याहृतयः प्रवर्त्तन्ते ।

End ·

अनेन हृदयेनाधीतेन क्रतुशतेनेष्टं भवति । षष्टिर्गायत्र्याः शतसहस्राणि जप्त्वानि ? फलानि भवन्ति । अष्टौ ब्राह्मणान् सम्यग् ग्राहयेत् । अथ सिद्धिर्भवति ।

इदं नित्यमधीयानो ब्राह्मणः प्रयतः शुचिः ।
सर्वपापैः प्रमुच्येत ब्रह्मलोके महीयते ॥

ब्रह्मलोके महीयते इत्याह भगवान् याज्ञवल्क्यः ।
शुभमस्तु ।

Colophon

Author

Remarks—This work is included in the Brahmana Section of the Veda Refer also to Nos 6222—6235, DCSM Vol XII

॥ गायत्रीकवचम् ॥

1164 O GĀYATRĪKAVACAM

Substance—Palm leaf Size—$14\frac{1}{2}'' \times 1\frac{1}{2}''$ Leaves—2 7 lines per page and 42 letters per line Script—Grantha No of Granthas—35

Subject—A protective *mantra*

Beginning

गायत्रीकवचमन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः । ऋग्यजुस्सामाथर्वाणि छन्दांसि । गायत्री प्रणवस्वरूपिणी ब्रह्मशक्तिर्गायत्री देवता । ओ तद् बीजम् । भर्गः शक्तिः । धियः कीलकम् । मम गायत्रीप्रसादसिद्ध्यर्थे जपे विनियोगः । सवितुर्ब्रह्मात्मने अङ्गुष्ठाभ्यां नमः । वरेण्यं ब्रह्मात्मने तर्जनीभ्यां नमः । भर्गो देवस्य ब्रह्मात्मने मध्यमाभ्यां नमः । धीमहि ब्रह्मात्मने अनामिकाभ्यां नमः । धियो यो नः ब्रह्मात्मने कनिष्ठिकाभ्यां नमः । प्रचोदयाद् ब्रह्मात्मने करतलकरपृष्ठाभ्यां नमः । भूर्भुवः सुवरो इति दिग्बन्धः ।

ध्यानम् ।

हंसासीना तरङ्गामुपसिनिवृ?तैश्चामरैः सेव्यमानां
स्निग्धैर्वक्त्रैरनेकैः श्रुतिवचनदलैश्चारुपाठैः सुपर्णाम् ।
अक्षस्रक्कुण्डिकांगामभयवरदधत स्वर्णयज्ञोपवीत
हारं कान्तं दधाना कनकयुगभुजा रक्तवासा नमामि ॥

End

स्त्रीगोब्रह्मवधभ्रूणहत्याराजहत्यास्वर्णस्तेयसुरापानगुरुतल्पतत्संयोगाश्च कर्मभ्रष्टजातिभ्रष्टाश्रमभ्रष्टपरान्नदोषपरस्त्रीगमनपङ्क्तिपावन? वीरहत्याद्यखिलपातको मुच्यते नात्र संशयः । पुनः षडङ्गध्यानं उत्तरमुद्राः

सुरभिज्ञानचक्रं च वाराह पद्ममेव च ।
ब्रह्मलिङ्गं च निर्याणं दर्शयेज्जपपूर्तये ॥

उपरि उपस्थानम् करिष्ये उपस्थान करिष्ये ।

Colophon

Author

Remarks—The work is borrowed from Vāsiṣṭha-saṃhita



॥ सन्ध्यावन्दनाविधिः ॥

1104 F SANDHYĀVANDANAVIDHI

Substance—Palm leaf Size—12" × 1" Leaves—2
6 lines per page and 34 letters per line
Script—Grantha. No. of Granthas—25.

Subject — Religious functions preliminary to *Sandhyāvandana*

Beginning

सन्ध्याविधिरुच्यते—अस्माकमुपात्तदुरितक्षयार्थं परमेश्वरप्रीत्यर्थं प्रातःसन्ध्यामुपासे । एव माध्यन्दिन करिष्ये । सायं सन्ध्यामुपासे । आपोहिष्ठेति मन्त्रस्य । सिन्धुद्वीप ऋषिः । गायत्र छन्दः । आपो देवता । प्रोक्षणार्थे विनियोगः । प्रणवं जले लिखित्वा आपो वा इदं सर्वमित्यभिमन्त्र्य प्रोक्षणम् । जलेरात्मानं व्याहृतिभिः परिषिच्य ।

End

सायंतनस्य मन्त्रस्य विश्वमात्मा ? र्षि । उष्णिक् छन्दः । अग्निर्देवता । न तस्य मायया च नरिपुरीशीतमर्त्यो अग्नये ददाश हव्यदादिभिः ।

Colophon

Author

Remarks—The Ms is rather inaccurate

॥ ब्रह्मास्त्रप्रयोगमन्त्रः ॥

1164 Q BRAHMĀSTRAPRAYOGAMANTRA

Substance—Palm leaf Size—12″ × 1⅓″ Leaf—1 8 lines per page and 36 letters per line Script —Grantha No of Granthas—10

Subject—Application of the arrow attributed to Brahma.

Beginning

ब्रह्मास्त्रमन्त्रस्य । वसिष्ठभगवान् ऋषिः । गायत्रं छन्दः । ब्रह्मा देवता । असुरसंहरणार्थे विनियोगः । ओं भूः हृदयाय नमः । ओं भुवः शिर+हा । ओं स्वः शि+ट् । ओं महः क+हुम् । ओं जनः नेत्र+ट । ओं तपः ओं सत्यात्मने अस्त्राय फट् ।

ध्यानम्—

End

तत् सवितु+यात् भूर्भुवःस्वरोमिति ब्रह्मास्त्र दत्रा ध्यायेत् । परोरजसे सावदो रवे। रव्यो। रव्योहम् ।

Colophon

Author

Remarks—Same as No 1161 P

॥ ब्रह्मास्त्रोपसंहारमन्त्रः ॥

1164 R. BRAHMĀSTROPASAMHĀRAMANTRA.

Substance—Palm leaf Size—12″ 1½″ Leaf—1. 12 lines per page and 36 letters per line Script—Grantha No of Granthas—14.

Subject—Details regarding the withdrawal of the arrow shot

Beginning

अस्त्रोपसहारमन्त्रस्य । ब्रह्मगायत्र्या सवितृभगवान् ऋषिः । गायत्रं छन्दः । त्रयमूर्तिर्देवता । अस्त्रोपसंहरणार्थे विनियोगः । अघोरास्त्राय हृद+नमः । शार्ङ्गाय शि+स्वाहा । सदाशिवाय

शिखा+ट्। अघोरास्त्राय का+हुम्। शाङ्गाय नेत्र+ट्। सदाशिवाय अस्त्राय फट्। स्रां हृ+मः। सं। शि+हा। स्रूं शि+ट्। सैं क+हुं। सौं ने+ट्। सः अ+ट्। सोऽहमर्कमयं ज्योतिः हृ+मः। अर्कज्योतिरहं शिवः शि+हा। आत्मज्योतिरह शुक्रः शि+ट्। सर्वज्योतिस्सोम-हो क+हुम्। आपायव्यावायव्या नेत्र×षट्। ओवीवायव्यावा अ×ट् ध्यानम्।

End

ऐ सूर्याय। ऐ हिरण्यगर्भः समवर्त्ततागे भूतस्य जातः पतिरेक आसीत् ×हविषा विधेम ॥

उत्तिष्ठ देव गन्तव्यं पुनरागमनाय च ।
विशस्व देव तुष्टस्त्व प्रविश्य हृदयं मम ॥

Colophon

Author

Remarks—Same as No 1164 P

॥ गायत्रीसन्ध्यावन्दनम् ॥

1164 S GĀYATRĪSANDHYĀVANDANAM

Substance—Palm leaf Size—12″ × 1½″ Leaves—6
6 lines per page and 36 letters per line
Script—Grantha No of Granthas—80

Subject—Rites connected with Sandhyāvandana.

Beginning

अथ मध्याह्न उद्वर्गोऽसि पाप्मानं मे विद्धि। ओं तत् सत् विष्ण्वात्मने नमः। क्ली सूर्याय क्ली हिरण्य×धेम। माध-संयद्धो-

ऽस्मि पाप्मानं मे विद्धि । ओं तत् सत् स्वरूपात्मने नमः । सो सूर्याय सों हिरण्य×धेम । व्याहृतिभिरात्मान जलेन परिषिच्य प्रदक्षिणीकृत्य असावादित्यो ब्रह्म। इति ततस्तर्पणं कुर्यात् । ब्रह्मार्पणम् । अथ वन्दनम् । आसनमन्त्रस्य । पृथिव्या मेरुपृष्ठर्षिः । सुतल छन्दः। कूर्मो देवता । आसने विनियोगः ।

End

द्विः प्रणवं जपित्वा हौं नमः पराय परमेष्ठ्यात्मने नमः । भ्रुवादिमस्तकपर्यन्तं व्योममण्डलं निष्कलङ्काङ्कितवृत्ताकारं नीलवर्णं सदाशिवदेवत्यं हौंबीजेन परमात्मनि संयोजयामि ।

Colophon

Author

Remarks — *Digupasthana* and *Atmodrasana* separately noticed in RCMPL, relate to two functions in Sandhyāvandana and hence their inclusion in this work

॥ शोषणदाहनप्लावनमन्त्रः ॥

1164 T ŚOSANADĀHANAPLĀVANAMANTRA

Substance—Palm leaf Size—12″ 1½″ Leaf—1 7 lines per page and 38 letters per line Script —Grantha No of Granthas—18

Subject — Purificatory *mantras* preliminary to *Sandhyāvandana* etc.

Beginning ·

एकं प्रणवं जपित्वा ।
ब्रह्महत्याशिरोपेतं स्वर्णस्तेयभुजद्वयम् ।
सुरापानहृदा युक्तं गुरुतल्पकटिद्वयम् ॥
तत्मयागपदद्वन्द्वं रक्तश्मश्रुविलोचनम् ।
उपपातकरोमाणमङ्गप्रत्यङ्गसंयुतम् ॥
खड्गचर्मधरं कृष्ण कुक्षौ पाप विचिन्तये ।
शोषणदहनप्लावनं करिष्ये—

वायुबीजस्य किष्किन्ध ऋषिः । अनुष्टुप् छन्दः । महाभूतवायुः देवता । अस्मिन् मनोवाक्कायकृतपापपुरुषशोषणार्थे विनियोगः । आवातवाहि+द्रप । य धूम्रवर्णेन महावातात्मना सर्वपापैः सह शरीरं शोषयामि ।

End

र पिङ्गलवर्णेन वैश्वानराग्निना सर्वपापैः सह शरीर दाहयामि । ल अमृतबीजस्य हिरण्यगर्भर्षिः । अनुष्टुप् छन्दः । सोमो देवता । अस्मिन् मनोवाक्कायप्लावनार्थे विनियोगः । यदतो वादते ग्रहे+आवह । वं अमृतवर्णेन चन्द्रात्मना शरीरं प्लावयामि ।

Colophon

Author

Remarks—This Ms is divided into 3 works in RCMPL, but is noticed here as a single work in view of thematic identity

॥ भूतशुद्धिः ॥

1164 U BHŪTAŚUDDHI.

Substance—Palm leaf Size—15' 1½" Leaf—1
16 lines per page and 32 letters per line
Script—Grantha No of Granthas—16

Subject—Purification of the five elements

Beginning

ॐ

भूतशुद्धिं करिष्ये। ह्रींश्व ते+पाण । लं पृथिवीबीजेन कठिनी- करोमि । यं वायुबीजेन व्यूह्यामि । ह्रीं मायाबीजेन शरीरे करचरणाद्यवयत्र करोमि । तस्माद्वा एतस्मादात्मन आकाशः संभूतः । व्योमबीजस्य सज्योतिषिः । विराट् छन्दः । परमात्मा देवता । हं दशवारं जपित्वा,आकाशशरीरं ब्रह्म +पास्व । आकाशाद्वायुः । वायुबीजस्य वामदेवर्षिः । गायत्रं छन्दः । परमात्मा देवता । यं दशवारं जपित्वा

End

सोऽहमास्मि सोऽहमस्मीति कश्चित्कालं ध्यायेत् ।
अच्युतोऽहमनन्तोऽहं गोविन्दोऽहमहं हरिः ।
आनन्दोऽहमशेषोऽहमजोऽहममृतोऽस्म्यहम् ॥

नित्योऽहं निर्विकल्पोऽहं निराकारोऽहमव्ययम् ।
सच्चिदानन्दरूपोऽहं परिपूर्णोऽस्म्यहं सदा ॥

Colophon

Author

Remarks—The *mantras* contained in this Ms are chanted by Brahmins at the time of worship

---

॥ प्राणप्रतिष्ठामन्त्रः ॥

1164 V PRĀNAPRTISTHĀMANTRA

Substance—Palm leaf Size—12″ × 1½″ Leaves—1½ 14 lines per page and 38 letters per line Script—Grantha No of Granthas—16

Subject—Identification of one's soul with the invoked God

Beginning

अस्य श्रीप्राणप्रतिष्ठामन्त्रस्य । ब्रह्मविष्णुमहेश्वरा ऋषयः । ऋग्यजुःसामाथर्वाणि छन्दांसि । सकलजगत्सृष्टिकरणपरा प्राणशक्तिर्देवता । आम् बीजम् । ह्रीं शक्तिः । क्रों कीलकम् । मम प्राणप्रतिष्ठार्थे विनियोगः । अं कं खं गं घं ङं पृथिव्यप्तेजोवाय्वाकाशात्मने आम् हृदयाय नमः । इं चं छं जं झं ञं शब्दस्पर्शरूपरसगन्धात्मने ईं शिरसे स्वाहा । उं टं ठं डं ढं णं वाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्राणप्राणात्मने ऊं शिखायै वौषट् । एं तं थं दं धं नं वाक्पाणिपादपायूपस्थात्मने ऐं कवचाय हुम् । ओं पं फं बं भं मं मनोबुद्ध्यहंकारचित्तज्ञानात्मने औं नेत्रत्रयाय वौषट् । अं यं रं लं वं शं षं सं हं ळं क्षं वचनादानविसर्गानन्दात्मने अस्त्राय फट् ।

ध्यानम्

End

मम सर्वेन्द्रियाणि वाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्राणप्राणा इहैवागत्य सुखं चिरं तिष्ठन्तु स्वाहा । मां रक्ष रक्ष ।

Colophon

Author

Remarks—The rite herein described is preliminary to the consecration of all other idols as well.

॥ अजपागायत्रीमन्त्र. ॥

1164 W. AJAPĀGAYATRĪMANTRA

Substance—Palm leaf. Size—12" × 1½". Leaves—3½.
6 lines per page and 36 letters per line.
Script—Grantha. No. of Granthas—50.

Subject—Rites connected with the chanting of the Ajapāgayatri.

Beginning

षट्शताधिकैकविंशतिसहस्रसंख्यया अजपानामगायत्र्या हंसः सोहंरूपाभ्यां उच्छ्वासनिश्वासाभ्यां अहोरात्राणि करिष्ये । अस्य श्री अजपानामगायत्रीमन्त्रस्य हंस ऋषिः । अव्यक्तं गायत्रं छन्दः । परमहंसो देवता हं बीजं सः शक्तिः । सोहं कीलकम् । परमहंसप्रसादसिद्ध्यर्थे विनियोगः । हंसां सूर्यात्मने अङ्गु×नमः । हंसिं सोमात्मने त×मः । हंसु निरञ्जनात्मने मध्य×मः । हंसैं निराभासात्मने अना×मः । हंसौं अतनुतनुसूक्ष्मप्रचोदयात् कनि×मः । हंसः अग्नीषोमाभ्यां वौषट् करतल×मः । एवं षडङ्गम् ।

ध्यानम् ।

End

आराधयामि मणिसन्निभमात्मलिङ्गं
मायापुरीहृदयपङ्कजसन्निविष्टम् ।
श्रद्धानदीविमलचित्तजलाभिषेकै-
र्नित्यं समाधिकुसुमैरपुनर्भवाय ॥

हंसो हंसकय्यविद्महे सोहं हंससुधीमहि
हंसः सोहं प्रचोदयात् । २४ जपः

Colophon

Author

Remarks—These rites are practised both by ascetics and the seekers of salvation The following verses are quoted at the close

सौवर्णे स्थालिवर्ये मणिगणखचिते गोघृताक्तान् सुपक्कान्
भक्ष्यान् भोज्यांश्च लेह्यान् मधुगुलसहितांश्चोष्यमन्नं निधाय ।
नानाशाकैरुपेतं घृतदधिसहित क्षीरपानीययुक्तं
ताम्बूलं चात्मलिङ्ग प्रतिदिवसमहं मानसं पूजयामि ॥

अरुणकनकवर्णं पद्मसंस्थं च गौरी
परिणवमित(?)चिह्नं सौम्यतान्यूनपादम् ।
भवतु भवदभीष्टं प्राप्यते पाशटङ्क-
मभयवरदचित्रं रूपमर्धाम्बिकेशम् ॥



॥ शुद्धमातृकासरस्वतीमन्त्रः ॥

1164 X ŚUDDHAMĀTṚKĀSARASVATĪMANTRA

Substance—Palm leaf. Size—12″ × 1½″. Leaf—½.

8 lines per page and 36 letters per line
Script—Grantha No of Granthas—10

Subject—Same as No 1147 A 3

Beginning

शुद्धमातृकासरस्वतीमन्त्रस्य ब्रह्मा ऋषिः । गायत्री छन्दः । शुद्धमातृकासरस्वती देवता । अंबीज क्ष शक्तिः ब्रह्म बीज प्रकृतिः । शक्तिः । जीवो बीजं बुद्धि. शक्तिः । उदानो बीजं सुषुम्नानाडी-सरस्वती शक्तिः । शुद्धमातृकासरस्वतीप्रीत्यर्थे विनियोगः । ओं अं कं खं गं घं ङं आं हृन्मः । ओं इं चं छं जं झं ञं ईं शि+स्वाहा । ओं उं टं ठं डं ढं णं ऊं शि+ट् । ओं ऍं तं थं दं धं नं ऐं कवचाय हुम् । ओं ओं पं फं बं भं मं औं नेत्र+ट् । ओं अं यं रं लं वं शं पं सं ळं क्षं अः अस्त्राय फट् ।

ध्यानम्

पञ्चाशद्वर्णभेदैर्विहितवदनदोःपादयुक्कुक्षिवक्षो-
देहां भास्वत्कपर्दीं कलितशशिकलामिन्दुकुन्दावदाताम् ।
अक्षस्रक्कुम्भचिह्नामभयवरकरां त्रीक्षणां पद्महस्ता-
मच्छाकल्पामतुच्छस्तनजघनभरां भारतीं ता नमामि ॥

End

मातृकादेवी च विद्महे सरस्वती च धीमहि ।
तन्नो वाग्मिप्रचोदयात् ।

कानननृत्तद्वयक्षिश्रुतिनासागण्डोष्ठदन्तमूर्धास्ये दोःपत्सन्ध्य-ग्रेषु पार्श्वद्वयवरगळकक्षेन हृदादिपाणिपादयुगळे व्यापकं विन्यस्य ।

Colophon·

Author:

Remarks—For bringing the holy functions to a successful issue this *Mantra* is considered to be highly efficacious



॥ तुरीयगायत्रीमन्त्रः ॥

1164 Y TURĪYAGĀYATRĪMANTRA

Substance—Palm leaf Size—$12'' \times 1\frac{1}{2}''$ Leaves—5 6 lines per page and 32 letters per line Script—Grantha No of Granthas—60

Subject—Methods of chanting *Gāyatrī*

Beginning

सप्तव्याहृतीनाम् अत्रिभृगुकुत्सवसिष्ठगौतमकाश्यपाङ्गीरसा ऋषयः । गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगतीछन्दांसि अग्नि वाय्वर्कवागीशवरुणेन्द्रविश्वेदेवा देवता ।

ब्राह्मी स्वाहा च वागीशी तथा नित्यविलासिनी ।
प्रभावती च लोला च महाव्याहृतिशक्तयः ॥

End

गोकर्णाकृतिहस्तेन माषमग्नं जलं पिबेत् ।
तन्न्यूनमधिकं पीत्वा पुनराचम्य शुध्यति ॥
सन्ध्याआदौ द्विराचम्य सन्ध्यान्ते च तथैव च ।
एकाचमो भवेन्मध्य इति शातातपोऽब्रवीत् ॥

Colophon

Author .

Remarks—The Ms contains the invocatory *mantras* relating to *Gāyatrī* and certain authoritative citations to illustrate the importance of *Sandhyāvandana*, ending with *Arghyapradāna* At the close the following verse bearing upon Yoga Śāstra is quoted

"गङ्गायमुनयोर्मध्ये बालरण्डा तपस्विनी ।
बलात्कारेण गृह्णीयात् तद्विष्णोः परमं पदम्" ॥

-

॥ गायत्रीपादन्यासः ॥

1164 Z GĀYATRĪPĀDANYĀSA

Substance—Palm leaf Size—12"×1" Leaf—½ 5 lines per page and 32 letters per line. Script—Grantha No of Granthas—5

Subject — Enumeration of the Ṛṣis assigned to each pāda in Gāyatrī

Beginning

ओं तत् सवितुर्वरेण्यमित्यस्य विश्वामित्र ऋषिः । गायत्रं छन्दः । ब्रह्मा देवता । भर्गोदेवस्य धीमहीत्यस्य गौतम ऋषिः । गायत्रं छन्दः । विष्णुर्देवता । धियो यो नः प्रचोदयादित्यस्य वसिष्ठभगवान् ऋषिः । गायत्रं छन्दः । रुद्रो देवता । अग्निर्मुखम् । ब्रह्मा शिरः ।

End

रुद्रः शिखा । विष्णुर्देवताहृदयं पृथिवी कुक्षिः त्रैलोक्यं चरणं त्रयी-शरीरंसांख्यायन त्र शुक्लवर्णः । पञ्चमहापातक-नाशनद्वारा धर्मार्थकाममोक्षार्थे वा विनियोगः ।

Colophon

Author

Remarks—Nyāsas akin to *Japa* are described in this Ms

॥ गायत्र्यक्षरन्यासः ॥

1164 A1 GĀYATRYAKSARANYĀSA

Substance—Palm leaf Size—12″ × 1½″ Leaves—6½
6—7 lines per page and 32 letters per line
Script—Grantha No of Granthas—85

Subject — An account of Rsi etc pertaining to each pāda of the *Gāyatrī*

Beginning

ओं तत्कारस्य प्रह्लाद ऋषिः । गायत्र छन्दः । अग्निर्देवता । अ बीजं मादिनी शक्तिः । चम्पकपुष्पवर्णम् । पृथिवी तत्त्वम् । उदात्तः स्वरः । सुमुखमुद्रा अङ्गुष्ठयो-(र्न्या)सः महापातकनाशने विनियोगः ।

तत्कार चम्पकापीत ब्रह्मविष्णुशिवात्मकम् ।
शान्तं पद्मासनारूढं ध्यात्वा दहति पातकम् ॥
सकारस्य अत्रि ऋषिः ।

End

ओं यात्कारस्य काश्यपि ऋषिः । देवी गायत्री छन्दः । ब्रह्मा देवता । सु बीजम् । भद्ररूपा शक्तिः । प्रकृतिस्तत्त्वं स्फटिकवर्णम् । स्वरितः स्वरः । पल्लवमुद्रा शिरसि ब्रह्मस्थाने न्यासः । ब्रह्मज्ञानप्राप्तौ विनियोगः ।

यत्कारस्तु शिवः प्रोक्तश्चतुर्वदनसप्रभः ।
प्रत्यक्षफलदो ब्रह्मा विष्णुरुद्र इति स्थितिः ॥

Colophon

Author

Remarks—Same as No 1164 Z

॥ दिग्बन्धनमन्त्रः ॥

1164 A2 DIGBANDHANAMANTRA

Substance—Palm leaf Size—12" × 1" Leaf—1
3 lines per page and 32 letters per line Script
—Grantha No of Granthas—3

Subject—Fortification of the four directions by the efficacy of *mantras*

Beginning

अघोरास्त्राय शार्ङ्गिणे सदाशिवात्मने महागाय सुदर्शनाय महाज्वालाय महादीप्ताय महस्त्रारोफट्स्वाहा । प्राचीं दिशं चक्रेण बध्नामि ।

End

दक्षिणां दिशं चक्रेण । दिग्बन्धनम् । भूर्भुवः स्वरोमिति च । इति चम्पकन्यासः समाप्तः ।

Colophon :

Author :

Remarks—The *mantra* is recited in order to ward off evils at the time of *Japa* etc.

॥ गायत्र्यन्वयक्रमः ॥

1164 A3 GĀYATRYANVAYAKRAMA

Substance—Palm leaf Size—12″×1½″ Leaf—1
6 lines per page and 36 letters per line
Script—Grantha No of Granthas—10

Subject—Analysis of words occurring in the *Gāyatrīmantra*

Beginning

तदित्यवाङ्मनोगम्यं ध्येयं यत् सूर्यमण्डले ।
सवितुः सकलोत्पत्तिस्थितिसंहारकारिणः ॥
वरेण्यमाश्रयणीयं यदाधारमिदं जगत् ।
भर्गः स्वसाक्षात्कारेण ह्यविद्याशक्तिभञ्जनम् ॥

End

प्रचोदयात् प्रेरयति तं वरेण्यमुपास्महे ।
देवस्य सवितुर्मध्ये यो भर्गो नो धियः स्वयम् ॥
प्रचोदयात् तं वरेण्यं धीमहीत्यन्वयक्रमः ।

Colophon

Author

Remarks—The prose order of Gāyatrī is given here in verse

॥ गायत्र्यक्षरपुष्पमाला ॥

1164 A4 GĀYATRYAKSARAPUSPAMĀLĀ

Substance—Palm leaf Size—12″×1½″ Leaves—6.

6 lines per page and 36 letters per line
Script—Grantha No of Granthas—50

Subject—Glorification of Gāyatri

Beginning

सर्वशास्त्रपुराणेतिहासखण्डनपण्डितः ।
हंसानन्दयतीन्द्रोऽयं वेदमार्गप्रवर्तकः ॥

त्रितरणमतिदाता विश्वभूतं च नित्य
मनसि कुशलविद्यादेशिकेन्द्रो यतीन्द्रः ।
गुहपतियजुषितं(?) विश्वकर्मप्रदेक-
श्रातिकरविदुषादीन् (?) ताटनार्थे? समर्थः ॥

सावित्र्या प्रतिपदमालाभिः प्रतिपदच्छन्दांसि प्रतिपाद्यन्ते ।

ॐ

तदन्नायोद्यन्तं परात्परैर्विराट् ते ज्योतिषीत्युच्यते
तामेवानलभूमिरापगगनं तद्ब्रह्मविद्ये शिवे ।
तद्वेदाग्निनिशिप्रतिघृणिवरो नक्षत्रतारागणै-
स्तत्तेजः सर्वभजति गुहपति भारतीं तां नमामि (?) ॥

End

यद् ब्रह्मादि पुरा त्रिलोकजनिता आकाशभूसश्चरन्(?)
यदाकाशा सर्वं तदपरमनोज्ञानवाग्दृश्यज्योतिम्(?) ।
याः कारार्णवैः स एकजननी सर्वात्मना पालिनी
आत्मज्ञानिसमी प्रत्यक् सदाहा सोवरैक्य पदम्(?) ॥

विराट्देवी तवपदमनोलङ्घनादन्यपदा-(?)
स्तेषां विप्रो नहि नहि कर्मचाण्डालबीजम्? ।

वेदानां मातुः कटाक्षवीक्षणं भुक्तिमुक्तिकरस्थ?
हंसानन्दयतीशवाक्यषड्दर्शनस्तान्निरोधः(?) ॥

Colophon

इति अक्षरपुष्पमाला समापिता ।

Author—Hamsānandayatīndra

Remarks—The letters in *Gāyatrī*, each representing a flower, are linked together herein like a garland with a view to propitiating Devī The effects arising from such propitiation are described in 24 *ślokas*

॥ गायत्रीहृदयकल्पः ॥

1164 A5 GĀYATRĪHṚDAYAKALPA

Substance—Palm leaf Size—12" × 1½" Leaf—1
11 lines per page and 32 letters per line
Script—Grantha No of Granthas—12

Subject—The complexion of the deities presiding over the letters composing *Gāyatrī*

Beginning

ओंकारस्य त्रयोरूपं श्वेतं पीतं च लोहितम् ।
चक्षुर्दृष्टे कृतं पापमोङ्कारो दहते क्षणात् ॥
तत्कारं पापवर्णं स्याद् ब्रह्मविष्णुशिवात्मकम् ।
ब्रह्महत्याकृत पाप तत्कारो दहते क्षणात् ॥

सकारं श्वेतवर्णं च केशवेन सदार्चितम् ।
गोहत्या च कृतं पापं सकारो दहते क्षणात् ॥

End

यकारं रक्तवर्णं च भास्करेण सदार्चितम् ।
गुर्वङ्गनाकृतं पापं यकारो दहते क्षणात् ॥
भकारं केतकीवर्णं प्रजापतिसदार्चितम् ।
संसर्गजानि पापानि भकारो दहते क्षणात् ॥
... . अर्चित गुणदेवतम् ।
अन्नदोषकृतं पापं प्रकारो द ... ... ॥
... . . मेन्दुवर्णं च लक्ष्मणेन सदार्चितम् ।
तत्कालं च कृतं पापं ... ... ॥
दकारं जम्बुवर्णं च कृष्णेनापि सदार्चितम् ।
नानाविधिकृत ... ... क्षणात् ॥
यात्कारं बिम्बवर्णं च यमेनापि सदार्चितम् ।
... ... यात्कारो दहते क्षणात् ॥
गायत्रीहृदयं कल्पं गोवि ... . ।
. ...त्रैव सर्वत्र सुखमुद्भवेत् ॥

Colophon

इति गायत्रीहृदयक... ... ...
हरिः । श्रीगुरुभ्यो नमः । सरस्वत्यै नमः । शारदागणेशाय नमः ।

Author .

Remarks—A study of this work is essential for rendering *Gāyatrījapa* efficacious.

॥ गायत्र्यष्टोत्तरशतनामस्तोत्रम् ॥

1164 A6 GĀYATRYAṢṬOTTARAŚATA-NĀMASTOTRAM

Substance—Palm leaf Size—12" × 1½" Leaves—2
6 lines per page and 37 letters per line
Script—Grantha No of Granthas—30

Subject—Enumeration of 108 appellations of *Gāyatrīdevī*

Beginning

मन्त्रपारगः ।
श्रोतुमिच्छामि तत्त्वेन गायत्र्यष्टोत्तरं शतम् ॥
विश्वामि वंशसमुद्भव ।
गायत्र्याश्चैव सावित्र्याः सरस्वत्यास्तथोदितम् ॥
.,.. .... .त्वेन साम्प्रतम् ।
पठतां पातकहरमज्ञानतिमिरापहम् ॥
गा.... ....त्रीत्यभिधीयते ।
अतः शृणु महाबाहो सर्वान् कामानवाप्स्यसि ॥

. नामस्तोत्रमन्त्रस्य । ब्रह्मविष्णुमहेश्वरा ऋषयः ।
ऋग्यजुस्साम.... .... सावित्रीसरस्वत्यो देवताः । हलो बीजानि ।
स्वराः शक्तयः । सर्वा... ष्टसिद्ध्यर्थे विनियोगः । ऐं ह्रीं श्रीं
श्रीं ह्रीं ऐं इति षडङ्गन्यासः ।

ध्यानम् ।
तरुणादित्यसङ्काशा सहस्रकिरणोज्ज्वला ॥
विचित्रमाल्यवसना तुहिनाचलसंस्थिता ।
वरदाभयहस्ता च रे तीरनिवासिनी ।

End

दिने दिने पठेद्यस्तु गायत्र्याः स्तवमुत्तमम् ।
स नरो मुक्तिमाप्नोति पुनरावृत्तिवर्जिताम् ॥
पुत्रप्रदमपुत्राणां दरिद्राणां धनप्रदम् ।
रोगिणां रोगशमनं सर्वैश्वर्यप्रवर्द्धनम् ॥
किमत्र बहुनोक्तेन स्तोत्र सर्वफलप्रदम् ॥

Colophon

इति विश्वामित्रसंहितायां गायत्र्यष्टोत्तरशतनामस्तोत्रं सम्पूर्णम् । अष्टोत्तरशतनामस्तोत्र समाप्तम् ।

Author

Remarks—The front Fol is partly torn Immediately after the colophon occur the subjoined lines

"वन्दे चिरन्तनगिरां करुणानिधाने
सन्देहजेतरि महस्यपि दृश्यमाने ।
सन्देहिनस्तदितराण्यपि दैवतानि
किं देहिनः शरणयन्ति कृतप्रयासाः ॥

रामाय रामभद्राय रामचन्द्राय वेधसे ।
रघुनाथाय नाथाय सीतायाः पतये नमः ॥

सरस्वत्यै नमः । श्रीशारदागणेशाय नमः । श्रीदक्षिणामूर्तये नमः । श्रीगुरुभ्यो नमः ।

॥ प्राणाग्निहोत्रविधिः ॥

1164 A7 PRĀNĀGNIHOTRAVIDHI

Substance—Palm leaf Size—12"×1½" Leaves—3
5—7 lines per page and 32 letters per line
Script—Grantha No of Granthas—40

Subject—Spiritualistic importance of meals from sacrificial point of view

Beginning

नारद उवाच—

विनयेनोपसंक्रम्य ब्रह्माणं नारदोऽब्रवीत् ।
प्राणाग्निहोत्रं विधिवद्वद लोकपितामह ॥

ब्रह्मोवाच—

प्राणाग्निहोत्रं वक्ष्यामि सर्वयज्ञेषु दुर्लभम् ।
यज्ज्ञात्वा मुच्यते जन्तुर्जन्ममृत्युजरादिभिः ॥

परिज्ञानेन मुच्यन्ते नराः पातककिल्बिषैः ।
विधिना भुज्यते येन मुच्यते च ऋणत्रयात् ॥

कुलानुद्धरते विप्रो नरकादेकविंशतिम् ।

End

उच्छिष्टोच्छिष्टसंस्पृष्टः शुना शूद्रेण वा द्विजः ।
उपोष्य रजनीमेकां पञ्चगव्येन शुद्ध्यति ॥

अनुच्छिष्टेन संस्पृष्टः स्नानमेव विधीयते ।
एकाहुतिप्रदानेन कोटियज्ञफलं लभेत् ॥

पञ्चभिः पञ्चकोट्यस्तु अनन्तं तृप्तिदं भवेत् ।
दातुश्चैव तु यत् पुण्यं भोक्तुश्चैव तु यत् फलम् ॥

तत् फलं लभते सद्यो विष्णोः सायुज्यमाप्नुयात् ।
भोक्ता भोजयिता चैव उभौ तौ स्वर्गगामिनौ ॥
उभौ तौ स्वर्गगामिनाविति ।

Colophon

शुभमस्तु ।

प्राणाग्निहोत्रविधिः समाप्तः ।

Author

Remarks—The work is composed in the form of a dialogue between Brahmā and Nārada At the close the following *mantras* relating to the collection of Tulasī flowers etc immediately after meals, are quoted

उत्तरापोशनात् पश्चात् पात्रात् पात्रं न संस्पृशेत् ।
यदि स्पृशेत्तु मोहेन सचेलं स्नानमाचरेत् ॥
पीत्वा भुक्त्वा च यो मर्त्यः शून्यं पात्रं परित्यजेत् ।
स भूयः क्षुत्पिपासार्त्तो भवेज्जन्मनि जन्मनि ॥
एकपङ्क्त्युपविष्टानां विप्राणां सहभोजने ।
यद्येकोऽपि त्यजेत् पात्रं शेषमन्नं न भोजयेत् ॥
मोहाद् भुञ्जीत चेद्विप्रः पङ्क्त्यामुच्छिष्टभोजनम् ।
प्रायश्चित्तं चरेद्विप्रः कृच्छ्रं सान्तपनं चरेत् ॥
पञ्चप्राणाहुतीः कुर्यात् शुद्धान्नैरभिघारितैः ॥
उच्छिष्टे न घृतं दद्यात् प्राग्घृते लवणान्वितम् ।
होमे पर्युक्षणे श्राद्धे सन्ध्याकर्मसु मार्जने ॥
आचामे भोजने पात्रं तोय वामेन संस्पृशेत् ।
तुळस्यमृतजन्मासि सदा त्वं केशवप्रिये ॥

केशवार्थं लुनामि त्वां वरदा भव शोभने ।
मोक्षैकहेतोर्धरणीप्रसूते विष्णोः समस्तस्य गुरोः प्रिये ते ॥
आराधनार्थं पुरुषोत्तमस्य लुनामि पत्रं तुळसि क्षमस्व ।
तुळसि श्रीसखि शुभे पापहारिणि पुण्यदे ।
नमोऽस्तु नारदनुते नारायणमनःप्रिये ॥
नारायणाराधनार्थं त्वां हरामि हरिप्रिये ।
क्षमस्व हस्तस्पर्शं मे दयया पापचेतसः ॥

॥ सुभाषितरत्नावलिः ॥

1164 A8 SUBHĀSITARATNĀVALI

Substance—Palm leaf Size—12" 1½" Leaves—50 5—6 lines per page and 28—36 letters per line Script—Grantha No of Granthas—550

Subject—Apophthegmatic verses

Beginning

श्रुतिस्मृतिपुराणानां यदेकं वाच्यमव्ययम् ।
तस्मै शिवैकमूलाय नमो मुग्धेन्दुमौलये ॥

शम्भुस्स्वयम्भुहरयो हरिणेक्षणानां
येनाक्रियन्त सतत गृहकुम्भदासाः ।
वाचामगोचरचरित्रपवित्रिताय
तस्मै नमो भगवते मकरध्वजाय ॥

स्मितेन भावेन च लज्जया गुणैः
पराङ्मुखैरर्धकटाक्षवीक्षणैः ।

वचोभिरीर्ष्याकलहेन लीलया
समस्तभावैः खलु बन्धनं स्त्रियः ॥

End

मातर्मेदिनि तात मारुत सखे तेजः सुबन्धो जल
भ्रातर्व्योम निबद्ध एष भवतामन्तः प्रणामाञ्जलिः ।
युष्मत्सङ्गवशोपजातसुकृतस्फारस्फुरन्निर्मल-
ज्ञानापास्तसमस्तमोहमहिमा लीये परब्रह्मणि ॥
शुभमस्तु ।

Colophon

इति भर्तृहरियोगीन्द्रकृतौ सुभाषितरत्नावल्यां वैरा
ग्यशतकं समाप्तम् ।

ॐ श्रीगणाधिपतये नमः । श्रीमद्गुरुभ्यो नमः ।
श्रीदक्षिणामूर्तये नमः । श्रीसरस्वत्यै नमः । शुभमस्तु ।

Author—Bhartrhariyogindra

Remarks—The triple centuries of verses are arranged in the order of Śṛṅgāra, Nīti and Vairāgya The work is printed in N S Press, Bombay

॥ शनैश्चरस्तोत्रम् ॥

1164 A9 ŚANAIŚCARASTOTRAM

Substance—Palm leaf Size—12″ × 1½″ Leaves—8
5—6 lines per page and 32 letters per line

Script—Grantha No of Granthas—88

Subject—Glorification of *Śani*

Beginning

रघुवंश अतिख्यातो राजा दशरथो बली ।
चक्रवर्ती स विज्ञेयः सप्तद्वीपाधिपस्तथा ॥

कृत्तिकान्ते शनिर्यातो दैवज्ञैर्ज्ञापितो हि सः ।
रोहिणी भेदयित्वा तु शनिर्यास्यति साम्प्रतम् ॥

उक्तं शकटभेदेन देवासुरभयङ्करम् ।
द्वादशाब्दं तु दुर्भिक्षं भविष्यति सुदारुणम् ॥

देशाश्च नगरग्रामा भयभीताः समन्ततः ।
द्रवन्ति सर्वलोकानां भयमेतत् सनातनम् ॥

एवमुक्तस्ततो वाक्यं मन्त्रिभिः सह पार्थिवः ।
आकुलं तु जनं दृष्ट्वा पौरजानपदादिकम् ॥

पप्रच्छ प्रयतो राजा वसिष्ठप्रमुखानृषीन् ।

End

पुत्रकामो लभेत् पुत्रं धनकामो लभेद्धनम् ।

राज्यकामो लभेद्राज्यं जयार्थी विजयी भवेत् ।
आयुष्कामो लभेदायुः श्रीकामः श्रियमाप्नुयात् ।

यद्यदिच्छति तत् सर्वं भगवान् भक्तवत्सलः ॥
चिन्तितान्यस्य कर्माणि क्षमा यान्ति विशेषतः ।

शनिनाथाभ्यनुज्ञातः स्वस्थानं स गतो नृपः ॥
स्वस्थानं स ततो गत्वा प्राप्तकामोऽभवत्तदा ।

Colophon

इति दशरथेन कृतं शनैश्चरस्तोत्र सम्पूर्णम् ।

श्रीशनैश्चराय नमः । नवग्रहादिदेवताभ्यो नमः ।

शुभमस्तु ।

Author —Dasaratha

Remarks -Theists are accustomed to recite this stotra for the propitiation of Sani For further information refer to p 7412, DCSM Vol XIX

॥ शनैश्चरजपन्यासः ॥

1164 A10 ŚANAISCARAJAPANYĀSA

Substance—Palm leaf Size—12″ 1½″ Leaf—1 8 lines per page and 32 letters per line Script —Grantha No of Granthas—8

Subject—Same as No 1164 A9

Beginning

शनैश्चरमन्त्रस्य निमिष ऋषिः । गायत्र छन्दः । शनैश्चरो देवता । शं बीजम् । नि शक्तिः । कृष्णं वर्णम् । मम सर्वग्रहदोषशान्त्यर्थे विनियोगः ।

शनैश्चराय अङ्गु+नमः । मन्दगतये त+नमः । अधोक्षजाय म+नमः । सौराय अना+नमः । शुष्कोदराय कनि+नमः । छायात्मजाय कर+नमः । शनैश्चराय हृ+नमः । मन्दगतये शिर+हा । अधोक्षजाय शि+ट् । सौराय कव+हुम् । शुष्कोदराय ने+ट् । छायात्मजाय अस्त्राय फट् ।

End.

शनैश्वराय शान्ताय सर्वाभीष्टप्रदायिने ।
द्वादशाष्टमजन्मस्थद्वयानां स्थानमेव च ॥
तत्तद्ग्रहस्थिता दोषाः मेऽपि नश्यन्तु ते प्रभो ।
उपरि मन्त्रम् । शन्नो देवीरिति मन्त्रम् ।

Colophon

Author

Remarks—Same as No 1164 Z

॥ पञ्चाक्षरस्तवः ॥

1164 A11 PAÑCĀKṢARASTAVA

Substance—Palm leaf Size 12" x 1½" Leaf—½
8 lines per page and 32 letters per line Script
—Grantha No of Granthas—8

Subject—Same as No 1147 G

Beginning

नक्षत्रनाथोज्ज्वलशेखराय
नगात्मजालाञ्छितविग्रहाय ।
नताभिलाषप्रदवैभवाय
तस्मै नकाराय नमः शिवाय ॥

मन्दाकिनीमन्दिरशेखराय
मनोभवध्वंसविलोचनाय ।
मन्दस्मितालीढपुरत्रयाय

End :

यक्षेश्वरेष्टाय यमान्तकाय
यमादि(म?मा)ष्टाङ्गकलाङ्कुराय ।
यज्ञद्रुमद्रोहपरश्वथाय
तस्मै यकाराय नमः शिवाय ॥

Colophon

पञ्चाक्षरस्तोत्रमुमापतेश्च
पठन्ति ये पन्नगभूषणस्य ।
लभन्ति ते पुत्रकलत्रमित्र-
सौभाग्यपूर्वाणि सदा फलानि ॥

Author

Remarks—The five verses of praise begin successively with letters 'न-म-शि" etc contained in the Pancāksaramantra

॥ व्यासाष्टकम् ॥

1164 A12 VYĀSĀSTAKAM

Substance—Palm leaf Size—12" × 1½" Leaves—1½ 6 lines per page and 30 letters per line. Script—Grantha No of Granthas—16

Subject—Same as No 1147 G

Beginning

यस्यास्ति शक्तिः स तु वावदीतु
प्रोर्ध्वं करैरङ्गुलिकां पुरो मे ।

कः पूजितः स्वाच्छशिशेखरेण
नागाधितो भूतपतिस्तु वा कैः ॥
किं वा न दृष्ट हि पितामहेन
सुरासुरैर्वा मधुसूदनेन ।
क्षीरोदमन्थोद्भवकालकूट
कण्ठे धृतं केन हरं विहाय ॥

End

इदं पवित्रं स्तवनं हरस्य व्यासेन भक्त्या परमेश्वरस्य ।
विमोक्षणायान्मभुजद्वयस्य निश्चष्टक॰छोपलमन्निभस्य ॥

Colophon

व्यासाष्टकमिदं पुण्यं यः पठेच्छिवमन्निधौ ।
तस्य मृत्युभयं नास्ति शिवलोके महीयते ॥
ॐ ।

Author—Vyāsa

Remarks—The work is styled after the author's name unlike the other Astakas whose titles connote the Gods eulogised therein No 11185 DCSM Vol XIX is identical with this work
The following verse occurs after the colophon

पादायुधं परमकोपभरे कृतान्ते
कोपायुधं कुटिलबोधहते च दक्षे ।
नेत्रायुधं निखिलमोहमयादिमारे
शूलायुधं किमपि दैवतमाश्रयामि ॥

॥ उपनिषद्विशेषः ॥

1164 A13 UPANIṢADVIŚEṢA

Substance—Palm leaf Size—12″ × 1½″ Leaves—14
6 lines per page and 28 letters per line
Script—Grantha No of Granthas—125

Subject— Discussion on the spiritualism of the Supreme Spirit

Beginning

वृषादर्विकुलं हविः शिपिकुलं बभूव । तस्यायमितिहासः कुलविद्या बभूव । तद्यो हस्मेममधीयते स ह स्म राजा भवति । स किञ्चित् प्राग्यान्तर्हितः सोऽब्रवीत् । यो मामितिहासं ग्राहयेत् वरमस्मै दद्यामिति । ततो ब्राह्मणः संयोगं संयुजेत । तमादित्यात् पुरुषो भास्करवर्णो निष्क्रम्य स एनं ग्राहयाञ्चकार ।

End

सर्वाण्येवमेवैन ददामीति होवाच वृषादर्वी । तादिदामिति हासं ब्रह्मादित्यपुरोगाय पुरोगः काश्यपाय काश्यपो भरद्वाजाय भरद्वाजो बृहद्भिरनेकमहाराजाय । ततः प्राच्यवनानां धनपते द्विजो ब्राह्मणकुले जातिस्मरो भवति ।

Colophon

Author

Remarks—The work is borrowed from a portion relating to Brāhmana literature The last four

ममजन्मकृतात् पापान्मुच्यतेयस्तु पर्वभिः ।
कन्यागते यदा सूर्ये पितृ? तिष्ठन्ति स्वे गृहे ॥
शून्या प्रेतपुरी तत्र यावद्वृश्चिकदर्शनात् ।
वृश्चिकादर्शनं यान्ति निराशाः पितरो गताः ॥
तत्रस्थभुवनं यान्ति शापं दत्वा सुदारुणम् ।
अपुत्र अपशुश्चैव लोके भवति निन्दितः ॥
रौरवे नरके घोरे यावदाभूतसंप्लवम् ।
एष्टव्या बहवः पुत्रा यद्येकोऽपि गया व्रजेत् ॥
यजेत वाश्वमेधं वा नीलं वा वृषमुत्सृजेत् ।
गौरीं वा वरयेत् कन्यामनश्नन्ति जपति महिनायां ?
फलमवाप्नोतीत्याह भगवान् ब्रह्मा । अष्टौ ब्राह्मणान् ग्राहयित्वा वर्षशतं च जपेत् ।
वृद्धो वसूनि प्रोवाच पुत्रेभ्यः परम निधिम् ।
एतद्योयनावार्याणां ? मन्त्राश्चैव व्रतानि च ।
मन्त्रांश्चैव व्रतानि च नमो नमः ।
दिने दिने गयातुल्ये भरण्या गयपश्चके ।
दशतुल्यं व्यतीपाते पक्षमध्ये तु विंशतिम् ॥
द्वादशीं शतमित्याहुरमावास्यायां सहस्रशः ॥

॥ दक्षिणामूर्त्यष्टकम् (लघुव्याख्योपेतम्) ॥

1165 A DAKSINĀMŪRTYASTAKAM
with commentary.

Substance—Palm leaf Size—9½″ × 1¾″. Leaves—

8 12—14 lines per page and 56 letters per line Script—Malayālam No of Granthas —330 Complete

Subject—A panegyric of Dakṣiṇāmūrti

Beginning

श्रीगणपतये नमः ।

मौनव्याख्याप्रकटितपरब्रह्मतत्त्वं युवानं
वर्षिष्ठान्तेवसदृषिगणैरावृतं ब्रह्मनिष्ठैः ।
आचार्येन्द्रं करकलितचिन्मुद्रमानन्दमूर्तिं
स्वात्मारामं मुदितवदनं दक्षिणामूर्तिमीडे ॥

कैवल्यानन्दयोगीन्द्रशुद्धानन्दयतीश्वरौ ।
नत्वारभे लघुव्याख्यां दक्षिणाशामुखस्तुतेः ॥

इह खलु सर्वज्ञो भगवान् भाष्यकारो लोकानुग्रहैकप्रयोजनकृतशरीरपरिग्रहः सन् सकलवेदान्तदुग्धोदधौ न्यायमन्दरेण विचारनिर्मन्थनादाविर्भूताद्वैतामृतस्य विन्यासकलशभूतं दक्षिणामूर्तिस्तोत्रं सकललोकानुजिघृक्षया भोक्तृजीवभोग्यजगद्भोगप्रदपरमेश्वरमोक्षप्रदगुरूणामत्यन्ताभेदबोधकं सकृत्पाठश्रवणार्थमननादिमात्रेण परमपुरुषार्थप्रापकमारभमाणस्तस्य वेदान्तसारभूतनवनीतपिण्डात्मकत्वेन तदीयविषयादिभिरेव तद्वत्तासिद्धिमभिप्रेत्यादौ प्रतीचः सकलजगदधिष्ठानत्वेन परमेश्वरतां दर्शयन् दक्षिणाशामुख परमेश्वरं मनसा पूजयति— विश्वमिति ।

End

इदानीमुक्तरूपब्रह्मापरोक्षज्ञाने मन्दाधिकारिणामष्टमूर्त्युपासनं क्रममुक्तिदायकम् उत्तमाधिकारिणां श्रोतव्यादिश्रुतिसिद्धवेदान्ततद्विषयब्रह्मविचारं साधनमित्यभिप्रेत्याह ।

भूरम्भांस्यनलोऽनिलाम्बरमहर्नाथो हिमांशुः पुमा-
नित्याभाति चराचरात्मकमिदं यस्यैव मूर्त्यष्टकम् ।
नान्यत् किञ्चन विद्यते विमृशतां यस्मात् परस्माद्विभो-
स्तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥

सर्वात्मत्वमिति स्फुटीकृतमिदं यस्मादमुष्मिंस्तवे
तेनास्य श्रवणात् तदर्थमननात् ध्यानाच्च सङ्कीर्तनात् ।
सर्वात्मत्वमहाविभूतिसहितं स्यादीश्वरत्वं सदा
सिध्येत् तत्पुनरष्टधा परिणतं चैश्वर्यमव्याहतम् ॥

Colophon

Author—Text Śankara
Com Svayamprakāśayati

Remarks — The script is legible For further information refer to p 192, DCSM, Vol I, Part I A

॥ हरिमीडेस्तोत्रम् ॥

1165 B HARIMĪDESTOTRAM.

Substance—Palm leaf Size—9½" × 1¾" Leaves—3 10—12 lines per page and 38 letters per line Script — Malayālam No of Granthas—60 Complete

Subject—A panegyric of Viṣṇu.

Beginning

श्रीगणपतये नमः । अविघ्नमस्तु ।

स्तोष्ये भक्त्या विष्णुमनादिं जगदादिं
यस्मिन्नेत(त्सा?त्सं)सृतिचक्रं भ्रमतीत्थम् ।
यस्मिन् दृष्टे नश्यति तत् संसृतिचक्रं
तं संसारध्वान्तनिरामं हरिमीडे ॥

यस्यैकांशादित्थमशेषं जगदेतत्
प्रादुर्भूतं येन पिनद्धं पुनरित्थम् ।
येन व्याप्तं येन विबुद्धं सुखदुःखै-
स्तं संसारध्वान्तनिरामं हरिमीडे ॥

End

इत्थं स्तोत्रं भक्तजनेड्यं भवभीति-
ध्वान्तार्काभं भगवत्पादीयमिदं यः ।
विष्णोर्लोकं पठति व्रजति ह्यधुनाज्ञो
ज्ञानं ज्ञेयं स्वात्मनि चाप्नोति मनुष्यः ॥

कृष्णाय वासुदेवाय हरये परमात्मने ।
प्रणतक्लेशनाशाय गोविन्दाय नमो नमः ।

Colophon

Author—Śrī Śankara, (vide p 7211 DCSM. Vol XVIII)

Remarks—Each verse is brought to a close with the expression "हरिमीडे" and hence the title.

॥ दाक्षिणामूर्त्तिपञ्जरम् ॥

1165 C DAKSINĀMŪRTIPAÑJARAM

Substance—Palm leaf Size—$9\frac{1}{2}'' \times 1\frac{3}{4}''$ Leaves—3
11 lines per page and 32 letters per line
Script—Grantha No of Granthas—65 Incomplete

Subject—Same as No 1165 A

Beginning

प्रणम्य साम्बमीशानं शिरसा वैणिको मुनिः ।
विनयावनतो भूत्वा पप्रच्छ स्कन्दमादरात् ॥
भगवन् परमेशान संप्राप्ताखिलशास्त्रक ।
स्कन्द सेनापते स्वामिन् पार्वतीप्रियनन्दन ॥
यत्प्रसादात् कविता विद्या शिवे भक्तिश्च शाश्वती ।
अवाप्तिरणिमादीनां सम्पदां प्राप्तिरेव च ॥
भूतप्रेतपिशाचानामगम्यत्वमरोगता ।
महाविज्ञानसंप्राप्तिर्महाराजसुपूजनम् ॥

End

तस्मादवाप्य विज्ञानं प्राप्य रुद्रत्वमेव च ।
विलयं याति तत्पादे नात्र कार्या विचारणा ॥
तस्मात् सर्वप्रयत्नेन मोक्षार्थी सर्वदा पुमान् ।
इममावर्तयेन्नित्य दक्षिणामूर्तिपञ्जरम् ॥

वटविटपिसमीपे भूमिभागे निषण्णं
सकलमुनिजनानां ज्ञानदातारमारात् ।
त्रिभुवनगुरुमीशं दक्षिणामूर्तिदेवं
जननमरणदुःखच्छेददक्षं नमामि ॥

Colophon :

इति ब्रह्माण्डपुराणे गुहनारदसंवादे दक्षिणामूर्तिपञ्जरं नाम अष्टादशोऽध्यायः ।

Author

Remarks—The work is borrowed from Brahmāṇḍa-purāṇa Just after the colophon occurs the following *mantra* relating to Dakṣiṇāmūrty together with the definition of *Śrīcakra*

श्रीदक्षिणामूर्तये नमः । अस्य श्रीदक्षिणामूर्तिमहामन्त्रस्य । ब्रह्मा ऋषिः । गायत्री छन्दः । मेधादक्षिणामूर्तिर्देवता । मेधा बीजम् । स्वाहा शक्तिः । सकलविद्याप्राप्त्यर्थे विनियोगः । ओं नमो भगवते दक्षिणामूर्तये शिर . । मह्य मेधां शिखा । विद्या कवचाय । प्रयच्छ नेत्रम् । स्वाहा अस्त्रम् । भूर्भुवः स्वरोमिति दिग्बन्धः ।

ध्यानम् ।

भस्मव्यापाण्डराङ्गः शशिशकलधरो ज्ञानमुद्राक्षमाला-
वीणापुस्तैर्विराजत्करकमलयुतो योगपट्टाभिरामः ।
व्याख्यापीठे निषण्णो मुनिवरनिकरैः सेवितः सुप्रसन्नः
सव्यालः कृत्तिवासाः सततमवतु नो दक्षिणामूर्तिरीशः ॥

ओं नमो भगवते दक्षिणामू ये मह्यं मेधां विद्यां प्रयच्छ स्वाहा ।
इति मन्त्रः । शिवाय नमः ।

व्यासे देवीकृते तत्तन्मगलविगते चाषभागेष्वसूत्रान्
कृत्वा पूर्वदलान्ते गवलवमुभयोर्वातयोस्तोयभागात् ।
धन्यां शैविमार्जार प्रथयतु परुणाग्राणि सूत्रद्वयानि
प्राक्पातं सोधिगानं विधिमथि धुगिन दिव्यसूत्रुश्चिर प्राक्(?)॥

बिन्दुत्रिकोणवसुकोणदशारयुग्म
मन्वश्रनागदलषोडशकर्णिकाग्म् ।
वृत्तत्रयं च धरणीसदनत्रयं च
श्रीचक्रमेतदुदितं परदेवतायाः ॥

॥ दक्षिणामूर्त्यष्टकम् (लघुव्याख्योपेतम्) ॥

1166 DAKSINAMURTYASTAKAM

with commenta

Substance—Palm leaf Size—$14\frac{1}{2}''\times 2''$ Leaves—$8\frac{1}{2}$
12 lines per page and 52 letters per line
Script—Malayalam No of Granthas—330
Complete

Subject—Beginning—Same as No 1165 A

End

इत्युक्तप्रकारेणामुष्मिन् स्तवे अस्मिन् स्तोत्रे इद श्रुतिषु इदं सर्व यद्यमात्मेत्यादिषु श्रूयमाणं सर्वात्मत्वं प्रत्यगात्मनः सर्वरूपत्वं स्फुटीकृतं स्फुटमावेदितं यस्मात्तेनास्य स्तोत्रस्य श्रवणात् गुरुतः विधिवच्छ्रवणात् तदर्थमननात् तदर्थस्य श्रुतस्य सम्यगुक्तिभिरनुचिन्तनाद् ध्यानाच्छ्रवणमननाभ्या निर्णीतस्य तथैव सोऽहं सर्वात्मा परमेश्वरोऽस्मीति विजातीयप्रत्ययतिरस्कारेण सजातीयप्रत्ययैर्विषयीकरणात् सङ्कीर्तनात् सम्यक् पाठात् परेभ्यः कथनाद्वा सर्वात्मत्वमहाविभूतिसहितं सर्वात्मत्वमेव महती विभूतिः विभूतिर्महती सिद्धिः । अणिमाद्यपेक्षया तस्यां त्रिविधपरिच्छेदशून्यत्वात्तया सहितं मुक्तिमीश्वरत्वं सत्यज्ञाना-

नन्दलक्षणपरमेश्वरत्वं तच्छ्रुतिप्रसिद्धं स्वत एव नित्य विद्यमानं स्यात् भवेदधुना ज्ञायत इत्यर्थः । पुनर्भूयः अष्टधा अष्टप्रकारेण परिणतं मायापरिणामरूपमैश्वर्यं चाणिमादीति सकलविद्वज्जनप्रसिद्धम् । अव्याहत क्वचिदप्यप्रतिहतं सिद्ध्येत् । सा एकधा भवति द्विधा भवति स यदि पितृलोककामो भवति । सङ्कल्पादेवास्य पितरः समुत्तिष्ठन्तीत्यादिश्रुत्युक्तं सर्वं भवेदित्यर्थः ।

Colophon

एवमेषा कृता व्याख्या दक्षिणाशामुखस्तुतेः ।
यथामति तथा तुष्टो दक्षिणामूर्तिरस्तु नः ॥

दाक्षिणामूर्तिस्तोत्रव्याख्या समाप्ता ।

इति श्रीकैवल्यानन्दयोगीन्द्रपादकमलभृङ्गायमाणस्वयम्प्रकाशयतिना विरचिता दक्षिणामूर्तिस्तोत्रव्याख्या समाप्ता ।

श्रीदक्षिणामूर्तये नमः । श्रीगुरुभ्यो नमः । श्री उमामहेश्वराभ्यां नमः ।

Author—Same as No 1165 A

Remarks—The two opening lines in No 1165 A are omitted herein This Ms commences with "सकललोकानुजिघृक्षया" The conclusion also differs from that of No 1165 A The introductory portion of Vedāntasāra is just begun after the colophon. The commentary is known by the title, Tattvasudhā, as disclosed

by the colophon under No 10992 DCSM Vol XIX which ends "दक्षिणामूर्तिस्तोत्रव्याख्या तत्वसुधाख्या समाप्ता"

॥ दशावतारस्तवः ॥

1167 A DAŚĀVATĀRASTAVA

Substance—Palm leaf Size—$4\frac{1}{2}'' \times 1\frac{1}{2}''$ Leaves—2 8 lines per page and 4 letters per line Script —Malayālam No of Granthas—12 Complete

Subject—Glorification of the ten incarnations of Viṣṇu

Beginning

श्रीगणपतये नमः । अविघ्नमस्तु ।

शुभमस्तु ।

श्रीशमीनाजरामान्तपरमावाविभोदर ।

श्रीशमीनाजरामान्तपरमावाविभोदर ॥

विकलेसत्प्रभोमेशकमठावापराभव ।

विकलेसत्प्रभोमेशकमठावापराभव ॥

End

सुरामरदकेशान्त श्रीबुद्धावरमाधव ।

सुरामरदकेशान्त श्रीबुद्धावरमाधव ॥

समाजरक्षमाकल्कीन् सुरसादरदानर ।

समाजरक्षमाकल्कीन् सुरसादरदानर ॥

Colophon

वेङ्कटेशाचार्यसूनुकोनेरिविदुषा कृता ।
रमेशदशरूपाणां समुद्गयमकैः स्तुतिः ॥

इति दशावतारस्तुतिः समाप्ता । श्रीवेङ्कटेशाय नमः ।

Author—Koneri Pandita, son of Venkatesacarya

Remarks—The Ms is held fast by means of ivory boards This work is composed in *Samudga-yamaka* style

---

॥ दशावतारस्तवव्याख्या ॥

1167 B DAŚĀVATĀRASTAVAVYĀKHYĀ

Substance—Palm leaf Size—4½″ 1½″ Leaves—23 7 lines per page and 14 letters per line Script — Malayālam No of Granthas—140

Subject—Same as No 1167 A

Beginning

वसवे वसवेशाय चक्रवेपिनचक्रवे ।
विधवे विधवेनाय सुहृदेसुहृदे नमः ॥
वेङ्कटेशार्यनाम्ने सुकृतिने कृतिने सदा ।
गुणसङ्घाब्धये सम्यगुरवे गुरवे नमः ॥

अथ मदग्रजः कोनेरिपण्डिताचार्यः स्वेष्टदायकान् दशावतारान् दशभिः समुद्गयमकाख्यैः—

"पञ्चम लघु सर्वेषु सप्तमं द्विचतुर्थयोः ।
षष्ठं च गुरु सर्वेषामेतच्छ्लोकस्य लक्षणम् ॥"
इति लक्षणलक्षितैरनुष्टुभैः श्लोकैः प्रार्थयते ।

End

तेन रमेशदशरूपाणां रमेशस्य हरेर्दशरूपाणां दशावताराणां समुद्गयमकैः समुद्गानि च तानि यमकानि च तैः समुद्गयमकैः। तल्लक्षणं तु "अर्धाभ्यासः समुद्गः स्यात्" इति । स्तुतिः स्तोत्र, ष्टुस्तुता, वित्यस्मात् क्तिन् । क्तौ च संज्ञायामिति क्तिन् । "स्तवः स्तोत्रं स्तुतिर्नुति"रित्यमरः । कृता रचितमित्यशेषमतिमङ्गलम् ।

Colophon

कोनेरिविबुधार्येण कृताः श्लोकवरा मया ।
तस्यानुजेन रामेण व्याख्यातास्ते मुदे हरेः ॥
दशावतारस्तुतिटीका समाप्ता ।
कृष्णेन लिखितमिदम् । शुभमस्तु ।

Author—Rāma

Remarks—The work is a commentary on No 1167 A It discloses that the commentator was none but the author's brother.

॥ दुर्गास्तुतिः ॥

1168 A DURGĀSTUTI.

Substance—Palm leaf. Size—6′ × 1″. Leaves—2.

7 lines per page and 32 letters per line Script — Malayālam No of Granthas—20

Subject—A panegyric of Durgā

Beginning etc —Same as No 1158 K

Remarks—At the close occur the following lines

“न वरं परं केवलं किं ते वार्थहाशोकनिन्दासम्भ्रमवि-
स्मयेष्वहं भयादिविकारे यदि नाम यदि वरं प्रकृतादन्यथात्वे ।

॥ श्यामलादण्डकम् ॥

1168 B SYĀMALĀDANDAKAM

Substance—Palm leaf Size—6″×1″ Loaves—9 5 lines per page and 16 letters per line Script —Malayālam No of Granthas—45. Complete

Subject—Same as No 1168 A

Beginning

जय जननि सुधासमुद्रान्तरुद्यन्मणिद्वीपसंरूढबिल्वाटवीम-
ध्यकल्पद्रुमाकल्पकादम्बकान्तारवासप्रिये कृत्तिवासःप्रिये

End

सर्वमन्त्रात्मिके सर्वतन्त्रात्मिके सर्वयन्त्रात्मिके सर्वतत्त्वात्मिके
सर्वमुद्रात्मिके सर्वयोगात्मिके सर्वलोकात्मिके पाहि मां पाहि मां
श्रीमतङ्गेशि तुभ्य नमो देवि तुभ्यं नमः ।

Colophon

Author—Kālidāsa

Remarks—Same as No 1147 B

॥ सप्तस्वरदेवतास्तुतिः ॥

1168 C SAPTASVARADEVATĀSTUTI

Substance—Palm leaf Size—6" × 1" Leaves—3
7 lines per page and 22 letters per line
Script — Malayālam No of Granthas—14
Complete

Subject—A panegyric of the Gods assigned to each of the seven notes in music

Beginning

हरिः ।

वीणाक्वणच्छ्रवणजातकुतूहलेन
देवेन कामरिपुणा परिरभ्यमाणाम् ।
पाशाङ्कुशाङ्कितकरामरुणाब्रभामां
षाड्जी समस्तजननीमनिश नमामि ॥

निस्सीमवाङ्मनसयोरतिदूरवर्ति
यस्या महत्त्वमवधारयितुं प्रवृत्तः ।
पद्मासनोऽपि परिहास्यदशां प्रयाति
तामार्षभीं शुकनिभामनिशं नमामि ॥

End

वर्णैरशेषजनताहृदयंगमाभां
सर्वैः समस्तगुणविभ्रमनिर्भराङ्गीम् ।
शर्वप्रियां शशिकलाकलितावतंसा
नैषादिदेवि भवतीमनिशं नमामि ॥

सरिगमपधनिसरूपां
सप्तद्वीपेषु सन्निधिमुपेताम् ।
सप्तसु धातुषु संस्थां
सप्तस्वरदेवतां भजे भूत्यै ॥

Colophon

Author

Remarks—One stanza is devoted to each presiding deity assigned to each Svara.

॥ मातङ्गीस्तवः ॥

1168 D MĀTANGĪSTAVA

Substance—Palm leaf Size—6″ 1″ Leaves—3. 7 lines per page and 20 letters per line. Script—Malayālam No of Granthas — 15

Subject—Same as No 1168 A

Beginning

सरसिजसुन्दरवदनाम्बुरमिजभरनम्रकम्रमध्यलताम् ।

परभृतसुमधुरवचनां मरतकसुषमां नमामि मातङ्गीम् ॥
रिपुमण्डलमदभङ्गामभिनवदूर्वादलाभिरामाङ्गीम् ।
उपनिषदम्बुजभृङ्गी त्रिभुवनरमणी नमामि मातङ्गीम् ॥

End

सरिगमपधनिमयाक्षरविरचितपन्मण्डपान्तरारूढाम् ।
उरसिरुहसमालिङ्गितमरतकवीणां नमामि मातङ्गीम् ॥
सप्तस्वरपरिरचितं पद्यं यो वा सुखेन पठति सदा ।
तस्य मुखाम्बुजरङ्गे नृत्यति वरदा चिराय मातङ्गी ॥

Colophon

मातङ्गीस्तवः ॥

Author

Remarks—The first 8 verses define the seven classes of sounds and the remaining seven are composed with सरिगमपधनिस as initial letters of each of the successive verses



॥ वागीशीस्तवः ॥

1168 E VĀGĪŚĪSTAVA

Substance—Palm leaf Size—6″ × 1″ Leaves—2 5—6 lines per page and 20 letters per line. Script—Malayālam No of Granthas—15. Incomplete

Subject etc.—Same as No. 1147 C,

Remarks—A lacuna is noticeable in the introductory portion of the Ms

॥ सौराष्टकम् ॥

1168 F SAURĀSTAKAM

Substance—Palm leaf Size—6" × 1" Leaves—2 5 lines per page and 25 letters per line Script—Malayalam No of Granthas—15 Complete

Subject etc —Same as No 1147 E

Remarks—The leaves are much damaged

॥ पञ्चस्तवः ॥

1168 G PAÑCASTAVA

Substance—Palm leaf Size—6" 1" Leaves—2 5 lines per page and 20 letters per line Script—Malayalam No of Granthas—6

Subject—Same as No 1147 A

Beginning

त्वगसृङ्मांसमेदोस्थिमन्ततां व्याधिमन्ततिम् ।
छिन्धि दीधितिशस्त्रैर्नः श्रीसूर्याय नमो नमः ॥

End

पञ्चस्तवमिमं सौरं श्रीमत्पञ्चामृतामृतम् ।
पठतो व्याधयो भीताः पलायन्ते दिशो दश ॥

Colophon

पञ्चस्तवः ।

Author

Remarks—The title is based on the fact that the work comprises 5 stanzas

---

॥ अन्नपूर्णास्तवः ॥

1168 H ANNAPŪRṆĀSTAVA

Substance—Palm leaf Size—6″ × 1″ Leaves—1½ 5 lines per page and 20 letters per line Script —Malayālam No of Granthas—14 Complete

Subject etc —Same as No 1147 H

॥ नवग्रहस्तुतिः ॥

1169 A NAVAGRAHASTUTI

Substance—Palm leaf Size—8¼″×1¾″ Leaves—2½ 8 lines per page and 22 letters per line Script —Malayālam No of Granthas—25

Subject—A panegyric of the nine planets

Beginning

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

वेदैर्ज्योतिर्मयत्वे जगति परिणमाद्भिः सदात्मप्रसूतै-
र्ध्वान्तं निर्मूलयाद्भिर्बुधवरहृदये बोधभावं दधानैः ।
त्रैलोक्यं भासयन्तं रविमखिलसुरैः स्तूयमानप्रभावं
मृत्युग्रस्तात्मनां नो हृदयरुगगदङ्कारमाद्यं प्रपद्ये ॥

पुंसामुद्दामजन्मान्तरसुकृतपरीपाकयोगैकलभ्यः
सम्पद्विद्यायुरोजांस्यविकलकरुणो यत्कटाक्षः करोति ।
सारः सर्वग्रहाणामनिमिषमदमास्वादनीयस्वरूपः
सोमस्त्राणाय नः स्तादुरुतरमहिमा रोहिणीप्राणनाथः ॥

End

ब्रह्मण्याः कमलोद्भवस्य तनया निर्धूमवैश्वानर-
ज्वालाजालसहोदरोरुमहसः सर्वग्रहाग्रेसराः ।
आनन्दोदयहेतवो रिपुजनप्रोत्साहजीवातवो
दुःखैकार्णवसेतवः प्रणमतां ते केतवः पान्तु नः ॥

Colophon

श्रीसूर्यादिसर्वग्रहेभ्यो नमः ।

Author

Remarks — Each planet is glorified in a single stanza A Fol preceding the work is devoted to the discussion on the compatibility or otherwise of different planets.

॥ गणाष्टकम् ॥

1169 B GANĀSTAKAM

Substance—Palm leaf Size—$8\frac{1}{4}'' \times 1\frac{1}{4}''$ Leaves—4
8 lines per page and 18—24 letters per line
Script—Malayālam No of Granthas—20

Subject—Same as No 1155 A

Beginning etc —Same as No 1156 A.

॥ सरस्वत्यष्टकम् ॥

1169 C SARASVATYAṢṬAKAM

Substance—Palm leaf Size—8¼" 1¾" Leaves—2
8 lines per page and 21 letters per line
Script—Malayālam No of Granthas—9

Subject etc —Same as No 1147 A3

— —

॥ वागीशीस्तवः ॥

1162 D VĀGĪŚĪSTAVA

Substance—Palm leaf Size—8¼" × 1¾" Leaves—2
7 lines per page and 20 letters per line
Script—Malayālam No of Granthas—17

Subject etc —Same as No 1147 C

— —

॥ मार्ताण्डपञ्चकम् ॥

1169 E MĀRTĀṆḌAPAÑCAKAM

Substance—Palm leaf Size—8¼" × 1¾" Leaves
—1½ 10 lines per page and 20 letters per line
Script—Malayālam No of Granthas—6

Subject—Same as No 1147 A.

Beginning .

हंसाय भानवेऽर्काय रवये तिग्मरोचिषे ।
सहस्ररश्मये तुभ्यं श्रीसूर्याय नमो नमः ॥

तमःप्रध्वंमनोत्थाय ममस्तजगदात्मने ।
... हृतये तुभ्य भास्कराय नमो नमः ॥

End

इष्टानामिष्टदानाय जङ्गमामरशाखिने ।
नमो नमो जगत्पित्रे सहस्रकिरणाय ते ॥

Colophon

मार्ताण्डपञ्चकं नित्य भक्तितो यः पठेन्नरः ।
निर्मुच्य सर्वपापेभ्यः सूर्यलोक स गच्छति ॥

Author

Remarks—Lacunæ occur in the middle of the Ms.

॥ मङ्गलस्तोत्राष्टकम् ॥

1169 F MANGALASTOTRĀṢTAKAM

Substance—Palm leaf. Size—8¼″ × 1¼″ Leaves—5
7 lines per page and 22 letters per line Script
—Malayālam No of Granthas—24

Subject—Invocation of deities for the attainment of prosperity

Beginning

ब्रह्मा विष्णुर्गिरीशः सुरपतिरनलः प्रेतराड्यातुनाथ-
स्तोयाधीशश्च वायुर्धनदगुहगणेशार्कचन्द्राश्च रुद्राः ।
विश्वादित्याश्विसाध्या वसुपितृमरुतः सिद्धविद्याध्रयक्षा
गन्धर्वाः (कि)न्नराद्याखिलगगनचरा मङ्गलं मे दिशन्तु ॥

वाणी लक्ष्मीर्धरित्री हिमगिरितनया चण्डिका भद्रकाली
ब्राह्म्याद्या मातृसंघा अदितिदितिमितीत्यादयो दक्षपुत्र्यः ।
सावित्री जह्नुकन्या दिनकरतनयारुन्धती देवनार्यः
पौलोम्याद्यास्तथान्यः खचरयुवतयो मङ्गलं मे दिशन्तु ॥

End

लोका द्वीपाः समुद्राः क्षितिधरपतयो मेरुकैलाससुख्या.
कावेरीनर्मदाद्याः शुभजलसहिताः (सुद्रु?सद्रु)मा दिग्गजेन्द्राः ।
मेघा ज्योतींषि नानामृगपशु पक्ष्यादयः प्राणिनोऽन्ये
सर्वौषध्यश्च वृक्षाः सकलतृणलता मङ्गलं मे दिशन्तु ॥

भक्त्या सयुक्तचित्ताः प्रतिदिवसमिमान्मङ्गलस्तोत्रबद्धा-
नष्टौ श्लोकान् प्रभाते दिवसपरिणतौ ये च मर्त्याः पठन्ति ।
ते नित्यं पूर्णकामा इह भुवि सुखिनश्चार्थवन्तोऽपि भूत्वा
निर्मुक्ताः सर्वपापैर्वयसि च चरमे विष्णुलोकं प्रयान्ति ॥

Colophon

Author

Remarks — The Ms comprises 9 verses only For further information see R No 1936 B, TCM. Vol II, Part I C

॥ मुकुन्दाष्टकम् ॥

1169 G MUKUNDĀSTAKAM

Substance—Palm leaf. Size—$8\frac{1}{4}'' \times 1\frac{3}{4}''$ Leaves—2.

8 lines per page and 24 letters per line Script—Malayālam. No of Granthas—12

Subject—A panegyric of Mukundā conceived as a child

Beginning

आलोक्य मातुर्मुखमादरेण स्तन्यं पिबन्तं सरसीरुहाक्षम् ।
सच्चिन्मयं देवमनन्तरूपं बालं मुकुन्दं मनसा स्मरामि ॥
संहृत्य लोकान् वटपत्रमध्ये शयानमाद्यन्तविहीनरूपम् ।
सर्वेश्वरं सर्वहितावतारं बालं मुकुन्दं मनसा स्मरामि ॥

End

कलिन्दजान्तःस्थितकालियस्य फणाग्ररङ्गे नटनप्रियं तम् ।
तत्पुच्छहस्तं शरदिन्दुवक्त्रं बालं मुकुन्दं मनसा स्मरामि ॥
एवं मुकुन्दाष्टकमादरेण सकृत् पठेद्यः स लभेत नित्यम् ।
ज्ञानप्रदं पापहरं पवित्रं श्रियं च विद्यां च यशश्च मुक्तिम् ॥

Colophon

Author

Remarks — This work is identical with No. 10207, DCSM Vol XVIII but the verses are arranged in a different order

---

॥ विष्णुभुजङ्गप्रयातम् ॥

1169 H VISNUBHUJANGAPRAYĀTAM.

Substance—Palm leaf Size—$8\frac{1}{4}'' \times 1\frac{1}{4}''$ Leaves—4
8 lines per page and 25 letters per line Script—Malayālam No of Granthas—25.

Subject—A panegyric of Visnu

Beginning

त्रिदशं विदं निर्मलं निर्विकल्पं निरीशं निराकारमोङ्कारगम्यम् ।
गुणातीतमव्यक्तमेकं तुरीयं परं ब्रह्म यं वेद तस्मै नमस्ते ॥
विशुद्धं शिवं शान्तमाद्यन्तशून्यं जगज्जीवनं ज्योतिरानन्दरूपम् ।
अदिग्देशकालव्यवच्छेदनीयं त्रयी वक्ति यं वेद तस्मै नमस्ते ॥

End

मुखे मन्दहासं नखे चन्द्रभासं करे चारुचक्रं सुरेशाभिवन्द्यम् ।
भुजङ्गे शयानं भजे पद्मनाभं हरे(द?र)न्यदेवं न मन्ये न मन्ये ॥
भुजङ्गप्रयातं पठेद्यस्तु भक्त्या समाधाय चित्ते भवन्तं मुरारे ।
स मोहं विहायाशु युष्मत्प्रसादात् समाश्रित्य योगं व्रजत्यच्युत त्वाम् ॥

Colophon

भुजङ्गप्रयातं समाप्तम् ।

Author—Śankarācārya

Remarks—The verses herein are composed in Bhujangaprayāta metre

---

॥ रामचन्द्रस्तुतिः ॥

1169 I RĀMACANDRASTUTI

Substance—Palm leaf Size—$8\frac{1}{4}'' \times 1\frac{3}{4}''$ Leaves—3
8 lines per page and 24 letters per line
Script—Malayālam No of Granthas—18

Subject—Glorification of Śrī Rāma.

Beginning :

श्रीमन्मार्ताण्डवंशे दशरथनृपतेरात्मजत्वं प्रपन्नः
 सार्कं शेषारिशङ्खैर्निशिचरनिवहं सहरिष्यन् सुरार्थे ।
गुर्वादेशेन हत्वा पथि रजनिचरीं प्राप्य सिद्धाश्रमं य-
 श्चक्रे यज्ञस्य रक्षां स दिशतु विजयं सङ्गरे रामचन्द्रः ॥
राज्यं गच्छन् निभीनामथ पदविगलच्छापशल्यामहल्या
 कृत्वा भङ्क्त्वा भवानीरमणभुजसरोजालय चापदण्डम् ।
पाणौ कृत्वा बलागी भ्रातृभिः प्राप्तदार-
 योऽवात्सीदात्मपुर्यां स दिशतु विजयं सङ्गरे रामचन्द्रः ॥

End

मध्येपाथोधि बद्ध्वा झटिति गिरिशतैः सेतुमाक्रम्य लङ्कां
 हत्वा सभ्रातृमित्रं रणशिरसि रुषा रावणं दारचोरम् ।
कान्तां स्वीकृत्य शुद्धां ज्वलनपतनतः प्राप्य रम्यामयोध्यां
 योऽवात्सीदात्तमोद स दिशतु विजयं सङ्गरे रामचन्द्रः ॥
यो नित्यं रामचन्द्रस्तुतिमिति जपति ध्वस्तसर्वारिसङ्घो
 भुक्त्वा भोगानभीष्टानभिनवयशसा पूरयित्वा त्रिलोकीम् ।
अन्ते संहृत्य कान्ताधनगृहतनयाद्येषु रूढं ममत्वं
 साक्षादालीयतेऽसौ भगवति भवसिन्धुप्लवे चक्रपाणौ ॥

Colophon

Author

Remarks—The work is a compendium of Rāma's story

॥ चन्द्रशेखराष्टकम् ॥

1169 J CANDRAŚEKHARĀSTAKAM

Substance—Palm leaf Size—$8\frac{1}{4}'' \times 1\frac{3}{4}'$ Leaves—3
8 lines per page and 27 letters per line
Script—Malayālam No of Granthas—20

Subject—Same as No 1147 L

Beginning

रत्नसानुशरासनं रजताद्रिशृङ्गनिकेतन
शिञ्जिनीकृतपन्नगेश्वरमच्युतानलसायकम् ।
क्षिप्रदग्धपुरत्रय त्रिदशालयैरभिवन्दितं
चन्द्रशेखरमाश्रये मम कि करिष्यति वै यमः ॥

पञ्चपादपपुष्पगन्धिपदाम्बुजद्वयशोभितं
फाललो(च)नजातपावकदग्धमन्मथविग्रहम् ।
भस्मदिग्धकलेबरं भवनाशन भवमव्यय
चन्द्रशेखरमाश्रये मम कि करिष्यति वै यमः ॥

End

विश्वसृष्टिविधायिन पुनरेव पालनतत्परं
सहरन्त ... ... श्च ... ... शेषभूतनिवासिनम् ।
क्रीडयन्तमहर्निशं गणनाथयूथसमावृतं
चन्द्रशेखरमाश्रये मम कि करिष्यति वै यमः ॥

Colophon

मार्कण्डेयकृतस्तोत्रम् ।

Author—Mārkandeya

Remarks—The work has been printed in Bombay.

॥ नवग्रहस्तुतिः ॥

1170 NAVAGRAHASTUTI

Substance—Palm leaf Size—6"×1" Leaves—2
8 lines per page and 22 letters per line
Script—Malayālam No. of Granthas—20

Subject etc.—Same as No. 1147 U.

Remarks.—Certain Muhūrtas are noted in the introductory portion. The concluding portion deals with a few Nitya yogas, the effects of Pancāṅga etc. The subjoined verse is quoted at the end.

आधारे प्रथमं सहस्रकिरण ताराधिपं स्वाश्रये
माहेय मणिपूरके हृदि बुधं कण्ठे च वाचस्पतिम् ।
भ्रूमध्ये भृगुनन्दनं रविसुत मध्ये त्रिकूटस्थले
नाडीमर्मसु राहुकेतुगुलिकान् नित्यं नमाम्यायुषे ॥

॥ नारायणकवचम् ॥

1171 A NĀRĀYAṆAKAVACAM.

Substance—Palm leaf Size—7"×1½" Leaves—6
7 lines per page and 16—20 letters per line
Script—Malayālam No. of Granthas—50

Subject—A panegyric of Nārāyaṇa.

Beginning

गज।—

यया गुप्तः सहस्राक्षः सवाहान् रिपुसैनिकान् ।
क्रीडन्निव विनिर्जित्य त्रिलोक्या बुभुजे श्रियं ॥
भगवंस्तन्ममाख्याहि वर्म नारायणात्मकम् ।
यथाततायिनः शत्रून् येन गुप्तोऽजयन्मृधे ॥

श्रीशुकः—

End

य इदं श‍ृणुयात् काले यो धारयति चादृतः ।
तं नमस्यन्ति भूतानि मुच्यते सर्वकिल्बिषात् ॥
एतां विद्यामधिगतो विश्वरूपाच्छतक्रतुः ।
त्रैलोक्यलक्ष्मीं बुभुजे विनिर्जित्य मृधेऽसुरान् ॥

Colophon

इति श्रीभागवते षष्ठस्कन्धेऽष्टमोऽध्यायः ।

श्रीशुकः—

तस्यासन् विश्वरूपस्य शिरांसि त्रीणि भारत ।
सोमपीथं सुरापीथमन्नादमिति शुश्रुमः ॥

Author—Vyāsa

Remarks—The text is borrowed from the *Bhāgavata*

॥ गजेन्द्रमोक्षः ॥

1171 B GAJENDRAMOKSA.

Substance—Palm leaf. Size—7″ × 1½″. Leaves—12.

8 lines per page and 20 letters per line
Script—Malayālam No of Granthas—120

Subject—Same as No 1144 A

Beginning etc —Same as No 1146 G

—

॥ सर्वशान्तिस्तवः ॥

1171 C SARVAŚĀNTISTAVA

Substance—Palm leaf Size—7" 1½" Leaves—5
9 lines per page and 24 letters per line
Script—Malayālam No of Granthas—65

Subject—A panegyric of *Sulinīdevi*

Beginning

श्रीमत्सकललोकैकजनिके करुणानिधे ।
पाहि मां सकलापायात् शरणागतवत्सले ॥
विश्वेश्वरी विश्वरूपे विश्वव्यापारवर्द्धिनी ।
कल्याणजीवनी सूक्ष्मकामदा कमलेक्षणा ॥
त्रिलोचना महादेवी सृष्टिस्थितिलयप्रदा ।
असुखार्ता सुखी विद्या परपाशविमोचनी ॥

End

दारिद्र्यमोहादिमहान्धकारैः
सम्बन्धितो यः प्रजपेद् द्विमन्ध्यम् ।
आवह्य सर्वार्थसमृद्धिसिद्धिं
सुखी भवेद् दीर्घमशेषमान्यः ॥

इति विरचितमेतत् सर्वशान्तिकनामं यः
पठति जपति भक्त्या सर्वदा तद् त्रिसन्ध्यम् ।
विपुलतर सौख्यं ब्रह्मविद्यानुभूतिं
प्रथितपदमवाप्य श्रीशिवाकारमेति ॥

Colophon

इति श्रीमहाशैवतन्त्रे अतिरहस्ये उमामहेश्वरसंवादे शङ्करेण विरचिते सर्वशान्तिकस्तव(वंशो) नाम एकादशोऽपदेशः ।

Author—Śankara

Remarks—In RCMPI no mention is made of this panegyric See No 10848, DCSM Vol XIX, for further information The text is borrowed from the *Mahāśaivatantra*

॥ विश्वरूपस्तवः ॥

1171 D VIŚVARŪPASTAVA

Substance—Palm leaf Size—7″ × 1½″ Leaves—5
8 lines per page and 20 letters per line
Script—Malayalam No of Granthas—50

Subject—Same as No 1171 C

Beginning

श्रीदेवी—
सर्वसिद्धिप्रदायिन्याः शूलिन्याः सर्वबोधक ।
विश्वरूपस्तुतिं श्रोतुमिच्छाम्यहमिहादरात् ॥

श्रीशिवः—
साधु कल्याणि तत् सर्वं यद्यदुक्तं त्वयाधुना ।
अतिगुह्यतमं श्रेष्ठं स्मरणात् सर्वसिद्धिदम् ॥
सर्वरोगप्रशमनं सर्वोत्पातविनाशनम् ।
सर्वदुःखहर दिव्यं सर्वोत्पातनिवारणम् ॥
सर्वक्रूरक्रियावद्ध्रं(?) सर्वपापविमोचनम् ।
सर्वाभीष्टप्रदं रम्यं सद्यस्तादात्म्यसिद्धिदम् ॥
वक्ष्यमाणस्तुति मन्त्री ज्ञात्वा गुरुमुखाद् दृढम् ।
ध्यायन् ध्यायन् प्रतिश्लोक सर्वकर्माणि साधयेत् ॥

End

अनेन स्तुतिमन्त्रेण मन्त्र्य भस्मादिकौस्तुभम् ।
प्रदापयेदशेषाणां तत्तत्कर्मार्थसिद्धये ॥

इति परमरहस्यस्तोत्रमेतत् परायाः
प्रथितमुषसि भक्त्या ध्यानपूर्व जपेद्यः ।
जगति निखिलभाग्य दीर्घमायुः सुपुत्रान्
विपुलविमलकीर्ति प्राप्य मुक्तो भवेत् सः ॥

Colophon

इति विश्वरूपदर्शनस्तुतिर्नामाष्टमोऽपदेशः ।

Author

Remarks—The work glorifies the omnipresence of Śūlinī It is borrowed from the *Mahāśaiva-tantra* It is identical with No 10833, DCSM Vol XIX

॥ शूलिनीस्तवः ॥

1171 E ŚŪLINĪSTAVA

Substance—Palm leaf Size—7" × 1½" Leaves—3
8 lines per page and 22 letters per line
Script—Malayālam No of Granthas—30

Subject—Same as No 1171 C

Beginning

अथ ते शूलिनीदेव्याः सुमुखीकरणस्तुतिम् ।
प्रवक्ष्यामि समासेन सर्वकामार्थसिद्धये ॥
ऋषि न्यासं षडङ्गं च मूलवद्ध्यानमुच्यते ।

ध्याने हेममहोपलासनपरे कन्याजना(ल)ङ्कृते
पञ्चब्रह्ममुखादिभिर्मुनिगणैः सेव्ये जगन्मङ्गले ।
आसीनां स्मितभाषिणीं शिवसखीं कल्याणवेषोज्ज्वलां
भक्ताभीष्टवरप्रदाननिरतां विश्वात्मिकां शूलिनीम् ॥

ओंकारमन्त्रपीठस्थे ओषधीशामृतोज्ज्वले ।
ऐश्वर्यमायुरारोग्यमिष्टसिद्धिं च देहि मे ॥

End

आद्येऽनादिकलाविशेषवि(ष्टि?)तेऽनन्ताखिलात्माकृते
आचार्याङ्घ्रिसरोजयुग्मशिरसामापूरिताशामृते (?) ।
संसारार्णवतारणोद्यतकृपासम्पूर्णदृष्ट्यानिश
दुर्गे शूलिनि शङ्करि स्नपय मां त्वद्भावससिद्धये ॥

इति परमशिवायाः शूलिनीदेविकायाः
स्तुतिमतिशयसौख्यप्राप्तये योऽनुवारम् ।

स्मरति जगति विद्वान् भंगुराजेण लोकप्
अखिलसुखमनाश्य श्रीशीराकारमेति ॥

श्रीदेव्यै नमः ।

Colophon

Author

Remarks—This work is identical with No 10834 DCSM Vol XIX, wherein it is styled Sūlinī sumukhīkaran stotram according to the opening stanza

---

॥ पञ्चमुखशिवस्तव· ॥

1171 F PAÑCAMUKHASIVASTAVA

Substance—Palm leaf Size—7" × 1" Leaves—1½ 8 lines per page and 24 letters per line Script —Malayālam No of Granthas—15

Subject—Same as No 1147 G

Beginning

प्रालेयामलमिन्दुकुन्दधवलं गोक्षीरफेनप्रभ
भस्माभ्यङ्गमनङ्गदेहदहनज्वालावलीलोचनम् ।
विष्णुब्रह्ममरुद्गणार्चितपदमृग्वेदनादोदयं
वन्दे दक्षिणग कलङ्करहित स्थाणोर्मुखं पश्चिमम् ॥

गौर कुङ्कुमपङ्किल सतिलक व्यापाण्डुगण्डस्थलं
भ्रूविक्षेपकटाक्षवीक्षणलसत्संसक्तकर्णोत्पलम् ।

स्निग्धं बिम्बफलाधरं [illegible] गौरं [illegible] शोभाब्जालंकृतं
वन्दे यजुर्वेद गोचरं [illegible] वदनं [illegible]रम्योत्तरम् ॥

बालार्काभितटित्प्रभक्रमकनकप्रस्पर्धिनेत्रोज्ज्वलं
गम्भीरध्वनि सामवेदजनकं ताम्राधरं सुन्दरम् ।
अर्धेन्दुद्युतिलोलपिङ्गलजटाभारप्रबद्धोढकं
वन्दे सिद्धसुरासुरेन्द्रनमितं पूर्वं मुखं शूलिनः ॥

कालाभ्रभ्रमराञ्जनद्युतिनिभं व्यावृत्तपिङ्गेक्षणं
कर्णोद्भासितभोगिमस्तकमणिप्रोद्भिन्नदंष्ट्राङ्कुरम् ।
सर्पप्रोतकपालशुक्तिसकलव्याकीर्णसच्छेखरं
वन्दे दक्षिणमीश्वरस्य वदनं चाथर्वनादोदयम् ॥

End

व्यक्ताव्यक्तनिरूपितं च परमं षट्त्रिंशतत्त्वाधिकं
तस्मादुत्तरतत्त्वमक्षरमिति ध्येयं सदा योगिभिः ।
ओंकारादिसमस्तमन्त्रजनकं सूक्ष्मातिसूक्ष्मं परं
वन्दे पञ्चममीश्वरस्य वदनं खव्यापि तेजोमयम् ॥

Colophon

एतानि पञ्च वदनानि महेश्वरस्य
ये कीर्तयन्ति मनुजाः सततं प्रदोषे ।
गच्छन्ति ते शिवपदं रुचिरैर्विमानैः
क्रीडन्ति शंकरगणैः सततं शिवाग्रे ॥

Author

Remarks—Same as No 1164 K

॥ सौन्दर्यलहरी ॥

1171 G SAUNDARYALAHARĪ

Substance—Palm leaf Size—7" 1½" Leaves—10
8 lines per page and 18 letters per line
Script—Malayālam No of Granthas—90
Incomplete

Subject—A panegyric of Devi

Beginning

हरिः ।

शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं
न चेदेवं देवो न खलु कुशलः स्पन्दितुमपि ।
अतस्त्वामाराध्यां हरिहरविरिञ्चादिभिरपि
प्रणन्तु स्तोतुं वा कथमकृतपुण्यः प्रभवति ॥

End

गतैर्माणिक्यत्व गगनमणिभिः सान्द्रघटितं
किरीटं ते हैमं हिमगिरिसुते कीर्तयति यः ।
सनीडे यच्छायाछुरणशबलं चन्द्रशकलं
धनुः सौनासीरं किमिदमिति बध्नाति धिषणाम् ॥
धुनोतु ध्वान्तं नस्तुलितदलितेन्दीवरवनं

Colophon

Author—Śankarācārya

Remarks—The Ms. contains 42 verses only.

॥ नारायणाष्टकम् ॥

1172 A NĀRĀYAṆĀṢṬAKAM

Substance—Palm leaf Size—12″×1½″ Leaf—½
6 lines per page and 6 letters per line
Script—Malayālam No of Granthas—8

Subject— Beginning—Same as No 1156 C

End

देवदेव महादेव देवेश मधुसूदन ।
पापनाशन पद्माक्ष नारायण नमोऽस्तु ते ॥
ह्वीनधराव्यक्त गोविन्द गरुडध्वज ।
श्रीवत्साङ्क जगन्नाथ नारायण नमोऽस्तु ते ॥

Colophon

नारायणाष्टकं पुण्य सायं प्रातस्तु यः पठत् ।
सर्वपापविनिर्मुक्तो विष्णुलोकं स गच्छति ॥
हरिः

Author

Remarks—The leaves are decayed The fourth *pāda* in every verse is uniform except in the last

---

॥ दुर्गाष्टकम् ॥

1172 B DURGĀṢṬAKAM

Substance—Palm leaf. Size—12″×1½″ Leaf—½.

6 lines per page and 38—42 letters per line Script—Malayālam No of Granthas—8

Subject—Same as No 1171 G

Beginning

कात्यायनि महायोगी खड्गबाणधनुर्द्धरि ।
खट्वाङ्गधारिणि चण्डि दुर्गादेवि नमोऽस्तु ते ॥
वसुदेवसुते कालि वासुदेवमहोदरि ।
वसुधारे श्रिये नन्दे दुर्गादेवि नमोऽस्तु ते ॥

End

योगनिद्रे महानिद्रे योगमाये महेश्वरि ।
योगसिद्धिकरे शुद्धे दुर्गादेवि नमोऽस्तु ते ॥

ब्रह्मस्वरूपिणि ब्राह्मि दुर्गादेवि नमोऽस्तु ते ॥

Colophon

दुर्गाष्टकमिदं पुण्यं दुर्गकर्माणि वर्जितः (?) ।
यः पठेच्छृणुयाद्वापि दुर्गालोक म गच्छति ॥
दुर्गाष्टकं समाप्तम् श्रीदुर्गायै नमः ।

Author

Remarks—The work is of ancient origin

॥ नवरत्नमाला ॥

1172 C NAVARATNAMĀLĀ

Substance—Palm leaf. Size—12″ × 1½″ Leaves—3.

6 lines per page and 38 letters per line. Script—Malayālam No of Granthas—20.

Subject—Same as No 1171 G

Beginning

हारनूपुरकिरीटकुण्डलविभूषितावयवशोभिनी
कारणेशवरमौलिकोटिपरिकल्प्यमानपदपीठिकाम् ।
कालका ... ...णिपाशबाणधनुरङ्कु ... मरुणमेखलां
फालभूतिलकलोचना मनसि भावयामि परदेवताम् ॥

End

णिमखशालयनीत्रिशोभि तनि तम्बिनी
पञ्चम ।
देवतां
आदिमप्रवणपीठिकाममलवर्णमङ्गलशरीरि ... ... ॥

... . ऽमुदितनादबिन्दुनवयौवना
मातृकां त्रिपुरसु ॥
लिकेन
मन्दस्मितेन वदनारुणपङ्कजेन ।
कालान्त ... ...
... ... मम सन्निधत्ताम् ॥

Colophon

नवरत्नमाला समाप्ता ।
हरिः । परदेवतायै नमः श्रीदुर्गादेव्यै नमः ।

Remarks—Most of the leaves are damaged The line "श्रीमत्पङ्कजविष्टरो हरिहरो वायुर्महेन्द्रोऽनलश्चन्द्रो भा" occurring in Mangalāstakam is seen at the end Raghunāthāṣṭaka referred to in RCMPL as embodied herein is missing

॥ पद्मनाभाष्टकम् ॥

1172 D PADMANĀBHĀSTAKAM.

Substance—Palm leaf Size—11″ × 1½″ Leaf—1
9 lines per page and 38—44 letters per line
Script—Malayālam No of Granthas—15

Subject—A panegyric of Padmanābha

Beginning

श्रीमत्सुरद्रुकुसुमैः सुरभीभवन्तौ
व्यामिश्रितौ तुलसिकानवमञ्जरीभिः ।
तापच्छिदौ प्रणयिनामरुणाम्बुजाभौ
श्रीपद्मनाभचरणौ शरणं प्रपद्ये ॥

End

चक्राम्बुजध्वजयवाङ्कुशमत्स्यचिह्नौ
विक्रान्तिभूतभुवनत्रितयावकाशौ ।
सोपद्रवं जगदुपेक्षितुमक्षमौ तौ
श्रीपद्मनाभचरणौ शरणं प्रपद्ये ॥

Colophon

श्रीपद्मनाभचरणस्तवमष्टकं यः
श्रीपद्मनाभचरणे प्र . ति ।
पद्मिमोकमनुभूय चिराय
पद्मजसद्मसुखमेति पदं स मर्त्यः ॥
हरिः ।

Author

Remarks— This *Astaka* is writt n in-a new leaf.

॥ रामस्तवः ॥

1172 E RĀMASTAVA

Substance—Palm leaf Size—12' × 1½' Leaf—1
13 lines per page and 38 letters per line
Script—Malayālam No of Granthas—15

Subject—Glorification of Rāma

Beginning

ध्यात्वा नीलोत्पलश्यामं राम राजीवलोचनम् ।
जानकीलक्ष्मणोपेतं जटामकुटमण्डितम् ।
सासितूणीधनुर्बाणपाणि नक्तंचरान्तकम् ।
रामरक्षां पठेत् प्राज्ञः पापघ्नीं सर्वकामदाम् ॥

शिरो मे राघवः पातु फालं दशरथात्मजः ।
कौसल्येयो दृशौ पातु विश्वामित्रप्रियः श्रुती ॥

End

सन्नद्धः कवची खड्गी चापबाणधरो युवा ।
नित्यं मनोगतोऽस्माकं रामः पातु सलक्ष्मणः ।
अग्रतो नरसिंहः(स्या?स्यात्) पृष्ठतो गरुडध्वजः ।
पार्श्वयोस्तु धनुष्मन्तौ सशरौ रामलक्ष्मणौ ॥

Colophon :

Author—Budhakaus ka

Remarks—This *mantra* is generally chanted by the devotees of Rāma Though the Ms is labelled as Rāmastotram the main theme relates to Rāmaraksā The following lines,

"वज्रपञ्जरनामेद यो रामकवचं स्मरेत् ।
अव्याहताज्ञः सर्वत्र लभते जयमङ्गलम् ॥
आदिष्टवान् यथा स्वप्ने रामरक्षामिमां हरिः ।"

prove that it is also known as *Vajrapañjara*

॥ पद्मनाभस्तुतिः ॥

1172 F PADMANĀBHASTUTI

Substance—Palm leaf Size—12″×1½″ Leaves—2 8 lines per page and 8 letters per line Script—Malayālam No of Granthas—30

Subject—Same as No 1172 D

Beginning

भवघोरमहोदधिसम्भरतां श्रममेकमहो जपतां नमताम् ।
नित्यमन्तमनन्तपुरे सततं तमनन्तमुपैमि सदात्मदृशे ॥
यदबोधविलासकृतं भुवनं महदादिविचित्रमिदं सकलम् ।
यदबोधमृते न भवेत् सकलं तमनन्तमुपैमि सदात्मदृशे ।

End

जय कृष्ण जयाच्युत कंसरिपो जय सत्य जयामरसिंह हरे ।
जय कञ्जनाभ जयेन्द्रपते? तमनन्तमुपैमि मदात्मदृशे ॥

सरसीरुहनाभपदप्रवणः प्रपठन् दिनशः स्तुतिमादरतः ।
अनुभूय सुखं मनुजः सकलं समुपैति पुनस्तदनन्तपदम् ॥

Colophon

बोधानन्दमुनीन्द्रस्य बोधायनमुनेरिव ।
श्रीमान् जयति सन्दर्भः श्रीरामं प्रति संप्रति ।
दोषोऽप्येको यदि गुणगणास्तत्र मुक्त्वा गुणौघान्
दोषग्राही भवति हि खलः मक्षिका(?)तुल्यधर्मः ॥
दोषं मुञ्चन् गुणमनुभवन्नल्पमप्येव तृप्तः
साधुर्लोके सलिलमिलितक्षीरपायीव हंसः ॥

Author—Bodhānandamunīndra

Remarks — The work is styled 'रामस्तव' in RCMPL.

॥ दुर्गास्तवः ॥

1172 G DURGĀSTAVA.

Substance—Palm leaf Size—12″ × $1\frac{1}{2}$″ Leaves—2. 20 lines per page and 38 letters per line Script—Malayālam No of Granthas—25

Subject—Same as No. 1171 G

Beginning

मणिकनकविभूषोन्मिश्रितरूपलोध-
रुपचितपरभागामुज्ज्वलां मूर्तिलक्ष्मीम् ।
दधति जलधरश्रीमोदरे देवि नित्यं
जय जय हरिकन्याग्रामचूडाग्रभूषा ॥

अरुणचरणपद्मे हारिदीर्घ्यदुकूले
स्तनकलशविनम्रे धन्यनानायुधाढ्ये ।
विकसितमुखचन्द्रे वीरलीलारमञ्ज
जय जय जय दुर्गे जैत्रचित्रापदाने ॥

अतुलतुमुलसम्प. . ... विजृम्भा
विभवरभिकभावा बद्धधाम्मिमल्लभारे ।
मृगपतिमधिरूढे विस्फुरत्सिंहनादे
विहतमहिषदे... ... ... ॥

खणखणदिति वल्गत्खड्गकोलाहलश्री
धुतधुतविबुधारिव्रातरक्ताभिषिक्ते ।
विविधविबुधसेनासूनवृष्टिप्रहृष्टे
जय जय जय दुर्गे देवि देवि प्रसीद ॥

End ·

इति भगवति कृष्णे भक्तिसाम्राज्यभाजा
त्वयि च भुवनमातर्भूर्भुवःस्वस्त्रयीशे ।
किमपि रचितमेतत् कृष्णलीलाश्लोकेन
श्रवणनवविनोदं नन्दकन्ये नयेथाः ॥

जय जय हरिकन्याग्राममङ्गल्यमाले
जय जय हरिकन्याग्राममाणिक्यमाले ।
जय जय हरिकन्याग्रामसम्पत्समृद्धे
जय जय हरिकन्याग्रामसर्वेष्टसिद्धे ॥

Colophon

इति श्रीकृष्णलीलाशुकमहा... ... चितस्तोत्ररत्नसहोदरमालिनीनाममूलकन्यास्तुतिः समाप्ता । श्रीकृष्णमहोदरी-श्रीदुर्गादेव्यै नमः ।

Author—Kısnalılāsukamunı

Remaıks—The woık relates to the pıincipal deity in the temple at Harikanyāpura The concluding portion indicates that it is also known by the titles, *Mālinīstuti* (from the metre in which it is composed) and *Mūlakanyāstuti* and that the author had written another work, Stotraratna, by name

---

॥ महाकालाष्टकम् ॥

1172 H MAHĀKĀLĀSTAKAM

Substance—Palm leaf Size—12″ × 1½″ Leaf—½ 9 lines per page and 28 letters per line Script —Malayālam No of Granthas—8

Subject—Glorification of Rudra.

Beginning

महद्दैवत मत्तहस्तीन्द्रवक्त्रं
पदच्छायया पाटलीकृत्य नृत्यम् ।
प
... ...

...या देवो महाकालो जगतामेकभूषणम् ।
भाग्यभाजो गता यस्य भूषणत्वं भुजंगमाः ॥
वन्द्राम ... ... णिम् ।
शङ्केयं काळभङ्गेन महाकालपदं गतम् ॥

End

यस्य निर्वृतिसाम्राज्य निर्विवादं विजृम्भने ।
महाकाल महादेव मनोहर त... . . ... ॥
... ... कुरु दयां कुरु ।
महाकालमाहात्म्यगर्भैरदभ्रैः
पदैः प(श्च)पैरञ्चितं किञ्चिदेतत् ।
... .मक्षत दीर्घकाल
पुनीयात् .... ॥

Colophon·

इति श्रीकृष्णलीलाशुकमहामुनिवि.... .... ।

Author—Krsnalilāśukamuni

Remarks—The closing portion of the Ms is damaged

॥ वागीशीस्तवः ॥

1172 I VĀGĪŚĪSTAVA.

Substance—Palm leaf. Size—12" × 1½" Leaf—1 9 lines per page and 32 letters per line Script—Malayālam No of Granthas—9 Incomplete

Subject etc.—Same as No. 1147 C.

॥ श्रीस्तवः ॥

1172 J. ŚRĪSTAVA.

Substance—Palm leaf. Size—12′ × 1½″ Leaf—1. 12 lines per page and 32 letters per line. Script—Malayālam No of Granthas—18.

Subject—Same as No 1147 D

Beginning

पुष्ट्यै नमोऽस्तु पुरुषोत्तमवल्लभायै ॥

नमोऽस्तु नाळीकनिभाननायै
नमोऽस्तु दुग्धोदधिजन्मभूम्यै ।
नमो सहोदरायै
नमोऽस्तु नारायणवल्लभायै ॥

End

कमलवासिनि काञ्चननूपुरे
कमलवाहु भिते ।
अमृतवार्यभिषेकनिरन्तरे
शरणमम्ब सदाच्युतवल्लभे ॥

Colophon

Author—Śankarācārya

Remarks—Same as No 1147 D

॥ नानादेवताविषयस्तवः ॥

1172 K NĀNĀDEVATĀVIṢAYASTAVA

Substance—Palm leaf Size—12″ × 1½″ Leaves—2
8 lines per page and 36 letters per line
Script—Malayālam No of Granthas—25

Subject—Eulogies of different deities

Beginning

आदावादिपितामहस्य नियमव्यापारपात्रे जल
पश्चात् पन्नगशायिनो भगवतः पादोदक पावनम् ।
भूयः शम्भुजटाविभूषणमणिर्जह्नोर्महर्षेर्या (?)
कन्या कल्मषनाशिनी भगवती भागीरथी दृश्यते ॥

End

प्रथमं तु महादेव द्वितीयं तु महेश्वरम् ।
तृतीयं शङ्कर प्रोक्त चतुर्थमृषभध्वजम् ॥
पञ्चम कृत्तिकावासं षष्ठं कामाङ्गनाशनम् ।
सप्तमं देवदेवेशं श्रीकण्ठं चाष्टम तथा ॥
नवमं तु हर चैव दशमं पार्वतीपतिम् ।
रुद्रमेकादशं चैव द्वादश वमुच्यते ॥
द्वादशैतानि नामानि त्रिसन्ध्यं यः पठेन्नरः ।
गोघ्न ....श्च भ्रूणहा गुरुतल्पगः ॥
स्त्रीबालघात.... ....रापो वृषलीपतिः ।
सर्व नाशयते पाप शिवलोकं स गच्छति ॥

Colophon

Author

Remarks—These verses are recited usually early in the morning



॥ हनुमत्पञ्चकम् ॥

1172 L HANUMATPAÑCAKAM

Substance—Palm leaf Size—12″ × 1½″ Leaf—1
8 lines per page and 38 letters per line
Script—Malayālam No of Granthas—12

Subject—A panegyric of Hanumān

Beginning

जीयादञ्जनभञ्जनानयनयोः प्राभञ्जनं प्राभवं
शाब्दं चण्डरुचोऽक्षि शाश्वतपदं नीतेर्निवासः श्रियः ।
उत्तीर्याब्धिमुदीक्ष्य मैथिलसुतामुन्मथ्य रक्षश्चमू-
मुद्दीप्यारिपुरीमुदीरितकथो भर्तुर्हनूमान् हरिः ।

श्रीहनूमते नमः ।

येनाधायि समः समुच्छ्रितमहाशृङ्गो महेन्द्राचलः
कुल्याकारि सरित्पतिः कुलपुरी नैशाचरी प्रेतभूः ।
सुग्रीवश्च कृतः कृतप्रतिकृतिः स्वात्मा यशःस्तम्भतां
नीता दाशरथेश्चिराय हनुमान् पायादपायात् स वः ॥

End

सीताशोकतरोरशोकवनिकोद्यानस्य चोन्मर्दन-
स्यानीतौषधिगोत्रजीवितसगोत्राशास्यदीर्घायुषः ।

एष्यत्पञ्चभुवः स्तुतेर्हनुमतः स्यादेकमोकः श्रिया-

मेतपञ्चकपाठकः क्षतविपत्संवर्धितो बन्धुभिः ॥

Colophon

हनुमत्पञ्चकं समाप्तम् ।

Author

Remarks — The work expounds the valiance of Hanumān, beginning from his interview with Śrī Rāma

---

॥ हनुमद्ध्यानम् ॥

1172 M HANUMADDHYĀNAM.

Substance—Palm leaf Size —12″ 1½″ Leaf—1 5 lines per page and 36 letters per line Script —Malayālam No. of Granthas—6.

Subject—Same as No 1172 L

Beginning

ऐशं बीजमुमाधृतं भगवता संवर्द्धितं वायुना

धात्रा कल्पितदिव्यनामकरण सूर्येण संशिक्षितम् ।

रामेणादृतमब्धिलङ्घि शमनं सीताशुचां रावण-

श्रीनैरूप्यकृदग्रतः स्फुरतु नः सौमित्रिसंजीवनम् ॥

श्रीहनुमते नमः ।

End

श्रीमान् सोमकलाकलापतनयः प्राभञ्जनिर्योऽञ्जना
सूनुः पर्वतनन्दनोदरशयस्थास्नोस्सुमेरोः कपेः ।
पुत्रः केसरिणो महानतिमहानर्कादधीती सुधीः
सूर्ये व्याकरणं जवेन स हरेद्दोऽघं हनूमान् कविः ॥
श्रीहनुमते नमः ।

Colophon

Author

Remarks—The devotees of Hanumān are accustomed to meditate on these *mantras*, standing in neck-deep water

---

॥ नृत्तोत्सवद्वादशकम् ॥

1172 N NṚTTOTSAVADVĀDAŚAKAM

Substance—Palm leaf Size—12″ × 1½″ Leaf—1
8 lines per page and 48 letters per line
Script—Malayālam No of Granthas—25.

Subject—Description of Śiva's dance

Beginning

भारभ्राम्यत्फणाभृत्परिपतितपरिभ्रान्तपातालसञ्ज-
त्पृथ्वीनीरन्ध्ररुद्धाखिलनिरयनिरस्तार्तिनिश्शेषजन्तुः ।
ऊर्ध्वाण्डोच्छ्रायलाभानमितपृथुजटामण्डला ताण्डवादौ
पादाग्रन्यासलीला भवतु पशुपतेर्भूयसे श्रेयसे नः ॥

End

बिभ्राणो नृत्तकेलीगलितशशिकलाघट्टितांभान् कपर्दान्
 वीजद्वालाग्रबालव्यजनवृषपतिन्यस्तघर्माम्बुलेशः ।
विस्रस्ते व्यालहारे वियशभुजलतापन्नगाभ्यां भवान्या
 कण्ठे संवेष्ट्यमानो जयति निरुपमोत्कण्ठया नीलकण्ठः ॥

Colophon

भारपीठीननाढ्य वङ्गचण्डदोर्द्दण्डक्षिप्रमण्यात् (?)
 इति नृत्तोत्सव द्वादशः श्लोकः समाप्तः ।
नमः शिवाय त्रिदशार्चिताय विनष्टदोषाय गुणार्णवाय ।
विमुक्तिमार्गप्रतिबोधनाय देवाधिदेवाय नमः शिवाय ॥

Author

Remarks—The verses are composed in high-flown diction

॥ गोपकुमाराष्टकम् ॥

1172 O GOPAKUMĀRĀSTAKAM

Substance—Palm leaf Size—12″ × 1½″ Leaf—1
 8 lines per page and 48 letters per line
 Script—Malayālam No of Granthas—20

Subject—A panegyric of Bālagopāla.

Beginning .

सततसरभसचरणनिपतितसंरणन्मणिनूपुरं
पृथुलकटितटघटितकळरवकिङ्किणीमुखरारवम् ।

विविधकरयुगचलननवनवगीतनृत्तमनोहरं
स्मरत कथयत नमत भजत च नन्दगोपकुमारकम् ॥
जनितजननिजवदनकृतकुचपानपातितपूतनं
स्वपदविघटितशकटघनरवभीतिकम्पितगोकुलम् ।
उपरिनिपतितकुपितफणिफणरङ्गवर्द्धितनर्त्तन
स्मरत .. ...विकमदरुणितपुण्डरीकविलोचनम् ॥

End

प्रणतसुरवरमकुटमणिगणरोचिषार्चितपादकं
मुदिततरमुखहृदयमुनिवरसेवनोचितवैभवम् ।
समदद्नुसुतदमनमरभसबाललीलमनाविलं
स्मरत कथयत नमत भजत च नन्दगोपकुमारकम् ॥

Colophon

कुमारकाष्टकं समाप्तम् ।

Author

Remarks — The poet's predilection for paronomasias is quite patent in this composition

---

॥ अभिनवकौस्तुभमाला ॥

1172 P ABHINAVAKAUSTUBHAMĀLĀ.

Substance—Palm leaf Size—12″ × 1½″. Leaves—2½
8 lines per page and 44 letters per line
Script—Malayālam No of Granthas—50

Subject—Glorification of Lord Kṛṣṇa.

Author—Kisnalīlāsukamuni

Remarks—The work is printed as No 2 in TSS

॥ दक्षिणामूर्तिस्तव ॥

1172 Q DAKSINĀMŪRTISTAVA

Substance—Palm leaf Size—12" 1" Leaves—1½
8 lines per page and 44 letters per line
Script—Malayālam No of Granthas—25

Subject—Same as No 1147 K

Author—Śrīkrṣṇalīlāsukamuni

Remarks—Same as No 1172 P

॥ शिवभुजङ्गप्रयातम् ॥

1172 R ŚIVABHUJANGAPRAYĀTAM.

Substance—Palm leaf Size—12" 1½" Leaves—1¼
8 lines per page and 44—52 letters per line
Script—Malayālam No. of Granthas—25

Subject—Same as No 1147 K.

Beginning

यदा दारुणा भाषणा भीषणा मे
भविष्यन्त्युपा(न्ते) कृतान्तस्य दूताः ।

तदा मन्मनस्त्वत्पदाम्भोरुहस्थ
कथं निश्चलं स्यान्नमस्तेऽस्तु शम्भो ॥

यदा दुर्निवाराव्यथोऽहं शयाने
लुठन्निःश्वसन्निस्सृताव्यक्तवाणिः ।
तदा जह्नुकन्याजलालंकृतं ते
जटामण्डलं मन्मनोमन्दिरं स्यात् ॥

End

त्वमप्यम्ब मां पश्य शीतांशुमौलि-
प्रिये! भेषजं त्वं भवव्याधिशान्तौ ।
बहुक्लेशभाजं बताम्भोजनेत्रे!
निमग्नं भवाब्धौ नयस्वाम्ब पारम् ॥

अनेन स्तवेनादरादम्बिकेश
परां भक्तिमासन्वता ये नमन्ति ।
मृतेर्निर्भयास्ते लभन्ते लभन्ते
हृदम्भोजमध्ये सदा(सी न)मीशम् ॥

Colophon

भुजङ्गप्रयातं समाप्तम् ।
नमः । शिवाय नमः ।

Author

Remarks—Bhujangaprayāta embodied in the printed edition of Brhatstotraratnākara is different from this work which contains invocatory verses for deprecating all perils at the time of death and after The ascription of it

to Śankarācārya in KCMPL, is not supported by authentic evidence. After the colophon occur the following verses

മലമകൾ തൻ തിരുമുലമെ കിനചാന്തിൽ പുരണ്ട चारुवपुः ।
मम हृदये वसतु सदा सकलजगन्मङ्गलो महादेवः ॥
शुद्धस्फटिकसङ्काशं त्रिणेत्रं चन्द्रशेखरम् ।
इन्दुमण्डलमध्यस्थं वन्दे देवं सदाशिवम् ॥
नमः शिवाय नमः ।

॥ विष्णुभुजङ्गप्रयातम् ॥

1172 S VISNUBHUJANGAPRAYĀTAM

Substance—Palm leaf Size—12″ × 1½″ Leaf—1
9 lines per page and 44 letters per line
Script—Malayālam No of Granthas—25

Subject etc —Same as No 1169 II

॥ अक्षरमाला ॥

1172 T AKSARAMĀLĀ

Substance—Palm leaf Size—12″ × 1½″ Leaves—2
8 lines per page and 48 letters per line
Script—Malayālam No of Granthas—50.

Subject—Same as No, 1172 H,

Beginning

महागणपतये नमः ।

अध्यक्षाय समस्तानामक्षयाद्भुतमूर्तये ।

नमश्शिवाय देवाय शिवायै च नमो नमः ॥

आपूर्णचिद्घनानन्दमात्मानन्द्रामसात्मने ।

नमः शिवाय—

इच्छाज्ञानक्रियारूपशक्तित्रयनियामिने ।

नमः शिवाय—

ईषत्करप्रसादाय भुक्तिमुक्तिप्रदायिने ।

नमः शिवाय—

End

ह्राय हरिसेव्याय हालाहलस्माशिने ।

नमः शिवाय—

लम्बोदरमहाकाळिशास्तृश्लाघ्यात्मजन्मन ।

नमःशिवाय—

क्षेमंकराय जगतामक्षराय त्रिचक्षुषे ।

नमः शिवाय देवाय शिवायै च नमो नमः ॥

Colophon

इत्येकपञ्चाशदुमासखस्य स्तोत्राणि चल्लूरुमहेश्वरस्य ।

जया(पादा ? पदाना)नि पठन्त्यमूनि....जनास्त(ज?च)

शिवप्रसादात् ॥

अक्षरमाला समाप्ता ।

Author

Remarks—The initial letters of all verses are arranged in alphabetical order and the latter half

of each stanza is uniform Cellūr is the celebrated birth-place of many poets and scholars

—

॥ शिवाष्टकम् ॥

1172 U ŚIVĀṢṬAKAM

Substance—Palm leaf Size—12″ × 1½″ Leaf—1 7 lines per page and 44 letters per line Script—Malayālam No of Granthas—20 Complete

Subject—Same as No 1172 H

Beginning

.... नमस्त्रिदशामरेन्द्र-
वृन्दोत्तमाङ्गनिहिताङ्घ्रिसरोरुहाय ।
यत्रै.... ....
.... त्रिपञ्च....य नमः शिवाय ॥

भस्माङ्गराग.... .... स्वशरीरलक्ष्मीः
निर्धूतराजसम... ... ...
....निश्र... न जृम्भमाय-
नागेन्द्रभूषणधराय नमः शिवाय ॥

End

प्रावृट्पयोदपटलस्फुटजृम्भमाणभास्वत्तटिद्वलयपिङ्गजटाधराय ।
भागीरथीसलिलतुङ्गतरङ्गभङ्गप्रेङ्खच्छशाङ्क... नमः शिवाय ॥

नमश्शिवाय त्रिदशार्चिताय विनष्टदोषाय (गुणार्णवाय) ।
विमुक्तमार्गप्रतिबोधनाय नमः शिवाय ॥

Colophon

हरिः । शिवाष्टक.... ..
(शुद्वस्फटिकसङ्काशं)त्रिणेत्रं चन्द्रशेखरम् ।
इन्दुमण्डलमध्यस्थं वन्दे देव सदाशिवम् ॥

Author

Remarks—The work is not mentioned in RCMPL



॥ सकलजननीस्तवः ॥

1172 V SAKALAJANANĪSTAVA

Substance—Palm leaf Size—12″ × 1½″ Leaves—4
8 lines per page and 48 letters per line Script
—Malayālam No of Granthas—100

Subject—Same as No 1155 E

Beginning

अजानन्तो यान्ति क्षयमवशमन्योन्यकलहै-
र्मी मायाग्रन्थौ त .. . ... ।
वय
नमस्ते कुर्वाणाश्श ..... मुपयामो भगवतीम् ॥

वचस्तर्काशम्यस्वरस
... ... म्पितदलितनीलोत्पलरुचे ।

शिवस्याराध्याग स्तनभरावनम्राय ... .
... ... नमतु मुग्धाय मह्ग ॥

End

यत् षट्चक्र कमलमुदित नग या नर्ग ।कास्ना
योनिस्तस्याः प्रथगमुदर चन्दो ह्यग्पीठम् ।
तस्याग्यन्तःस्तन भरनतां कुण्डलीः प्रवृत्ता
श्यामाकारां मकलजननीं मन्तत भावयामि ॥

अगुप्ता गुप्ता वा स्वयमपि महान्तोऽपि लघव·
मकीला निष्कीला गुरुभिरुपदिष्टा अपि नवा ।
प्रसन्नायां देवि त्वयि मकलमन्त्राश्च फलदा-
स्तरुर्मूले सिक्तः फलति खलु शाखा शतमयी ॥

Colophon

सकलजननीस्तवः समाप्तः ।

हरिः ।

Author—Kalidasa (Vide Colophon under No 9632, DCSM Vol XVIII)

Remarks—According to RCMPL, this work is designated *Pārvatīstava* but the colophon herein is different The five *stotras* commencing with this work are collectively known as *Pañcastavī*, as is evident from the colophon under the fifth. The number of verses in each *stava* is also noted therein The first three leaves are missing

---

॥ मातृकापुष्पमाला ॥

1172 W MĀTRKĀPUSPAMĀLĀ

Substance—Palm leaf Size—12′ $1\frac{1}{2}$″ Leaves—6.
8 lines per page and 48 letters per line
Script—Malayālam No of Granthas—138

Subject—Same as No 1172 V

Beginning

अप्रत्यक्षकथामकृत्रिमरमामय्यप्रकाशक्रमा-
मसञ्चित्तगृहामतर्क्यविभवामव्याजनिर्यत्कृपाम् ।
अक्षाणामधिदेवतामविदितामभ्याशगामध्वगा-
मक्षीणागममंविदभ्युदयदामन्वेमि दक्षात्मजाम् ॥

अम्बाधारमुखाभिधानियमितप्रागादिभिर्म... ...
... स्थायोर्ध्वमूर्ते षडम्बुजदरी भिन्त्वैव सौदामिनीम् ।
एत्योर्ध्वाम्बुजमैन्दवामलसुधाधारौघमूर्त्यागते
मुक्तिप्रस्तवनौपधे बहुविधं तुभ्यं नमस्कुर्महे ॥

End

क्षयेत्यक्षपदैकलक्षणविधिक्षोणीप्रमाणाक्षदे
क्षमो दक्षिणकुक्षिलक्षणविधिक्षौज्ञसराक्षिणि (?) ।
व्यक्षालक्षयियक्षुदक्षदमनाक्षिप्तान्तरिक्षक्षये
क्षन्तव्य क्षितिभृत्सुते स्तुतिवचः क्षुद्रं ममेद त्वयि ॥

Colophon

इति गिरिवरपुत्रीपादमञ्जीरभूषा
भुवनममलयन्ती सूक्तिसौरभ्यसारैः ।

शिवरसमकरन्दस्यन्दिनी मन्निबद्धा
मदयतु कविभृङ्गान् मातृकापुष्पमाला ॥
हरिः श्रीदुर्गायै नमः । श्रीदुर्गायै नमः ।

Author

Remarks—This *stava* is the second in *Pañcastavī*. It consists of 53 verses whose initial letters are successively arranged in alphabetical order. It is identical with No 9616, DCSM, Vol XVIII

॥ अम्बास्तवः ॥

1172 X AMBĀSTAVA

Substance—Palm leaf Size—12″ 1½″ Loaves—3
8 lines per page and 48 letters per line
Script—Malayāḷam No of Granthas—30

Subject—Same as No 1155 E

Beginning

(यामाम)नन्ति मुनयः प्रकृतिं पुराणीं
विद्येति यां श्रुतिरहस्यगिरो गृणन्ति ।
तामर्द्धपल्लवितशङ्कररूपमुद्रां
देवीमनन्यशरणः शरणं प्रपद्ये ॥

अम्ब ! स्तवेषु तव तावदकर्तृकाणि
कुण्ठीभवन्ति वचसामपि गुम्फनानि ।
डिम्भस्य मे स्तुतिरसावसमञ्ज ... ...
वात्सल्यनिघ्नहृदयां भवतीं धिनोति ॥

End

मञ्जीरशोभिचरणं नलिशोभिमध्यं
हाराभिरामकुचमम्बुरुहाभवक्त्रम् ।
नीलाळक हिममहीधरकन्यकाख्य
ज्ञानस्वरूपमिदमीश्वर दीपदीप्ति ॥
कुवलयदलनीलं बर्बरस्निग्धकेश
पृथुतरकुचभारक्रान्तकान्तावलग्नम् ।
किमिह बहुभिरुक्तैस्त्वत्स्वरूप पर नः
सकलभुवनमातः सन्ततं सन्निधत्ताम् ॥

Colophon

हरिः ।

अम्बास्तवः समाप्तः ।

Author

Remarks—This *stava* is the third in *Pañcastavī* It proclaims that its study is conducive to the growth of learning See No 9571, DCSM, Vol XVIII.

॥ चर्चास्तवः ॥

1172 Y CARCĀSTAVA

Substance—Palm leaf Size—12″ × 1⅓″ Leaves—2 8 lines per page and 48 letters per line Script—Malayālam No of Granthas—50

Subject—Same as No 1147 H.

Beginning etc —Same as No 1147 X

Remarks—This is the fourth stava in *Pañcastavī* Carcā is also a synonym of Devī Refer to No 9588, DCSM Vol XVIII for further information



॥ विंशतिस्तवः ॥

1172 Z VIMŚATISTAVA

Substance—Palm leaf Size—12½″×1½″ Leaves —2½ 8 lines per page and 48 letters per line Script—Malayālam No of Granthas—50

Subject—Same as No 1147 H

Beginning—End—Same as No 1147 W

Colophon

श्रीदुर्गादेव्यै नमः । श्रीपार्वतीदेव्यै नमः ।

इति विंशतिः समाप्ता ।

इति पञ्चस्तवी समाप्ता ।

സകല ജനനീസ്തവഃ	39
മാതൃകാപുഷ്പമാലാ	54
അംബാസ്തവഃ	32
ചർച്ചാസ്തവഃ	22
വിംശതിഃ	20
ആകെ	167

Author—Remarks Same as No 1147 W.

॥ दशश्लोकी ॥

1172 A1 DAŚAŚLOKĪ

Sul stance—Palm leaf Size—12½" × 1½" Leaf—1
8 lines per page and 48 letters per line
Script—Malayalam No of Granthas—25

Subject—Same as No 1147 C

Beginning

साङ्कुशां साक्षसूत्रां च पाशपुस्तकधारिणीम् ।
मुक्ताहारैः समायुक्तां देवीं ध्यायेच्चतुर्भुजाम् ॥
सितेन दर्पणाभेन वक्त्रेण परिभूषिताम् ।
सुस्तनी वेदमध्यां च चन्द्रार्धकृतशेखराम् ॥
जटाकलापसंयुक्तां पूर्णचन्द्रनिभ ननाम् ।
त्रिलोचनां महादेवीं स्वर्णनूपुरधारिणीम् ॥
केयूरमेखलाद्यैश्च द्योतयन्तीं जगत्त्रयम् ।
शब्दब्रह्मात्मिकां ध्यायेद् ज्ञानकामः समाहितः ॥ इति ।

आश्वलायन उवाच—

परब्रह्मात्मिकां देवीं भुक्तिमुक्तिफलप्रदाम् ।
प्रणम्य स्तौमि तामेव ज्ञानशक्तिं सरस्वतीम् ॥

End

एवं भावयतानेन बृहस्पतिरपि स्वयम् ।
न शक्नोति वचो वक्तुं नरेष्वन्येषु का कथा ॥
न काश्चन स्त्रियं निन्देन्न देवानापि च द्विजान् ।
अनार्यां नाभिभाषेत सर्वत्रैव क्षमी भवेत् ।

सर्वत्रैव प्रियं ब्रूयाद् य इच्छेत् सिद्धिमात्मनः ॥
तस्य नासंस्कृता वाणी मुखादुच्चरते क्वचित् ।
श्लोकैरेव तिरस्कुर्याद् द्विषन्तं प्रतिवादिनम् ॥
यद्वाागेन....... ...र्चयति सुव्रत ॥

Colophon

इत्याश्वलायनप्रोक्तः सिद्धसारस्वतस्तवः ।
चतुर्वर्गफलावाप्तौ हेतुभूतः सनातनः ॥

इत्याश्वलायनस्तवः समाप्तः ।

दशश्लोकी समाप्ता ।

Author--Āśvalāyana

Remarks—This work is identical with No 1147 A4 but contains additional verses in the beginning and end, besides many variants

— —

॥ नारायणस्तवः ॥

1172 A2 NĀRĀYANASTAVA

Substance—Palm leaf Size—12½″ × 1½″ Leaf—4 8 lines per page and 48 letters per line Script—Malayālam No of Granthas—12.

Subject—A panegyric of Nārāyana

Beginning

अत्यन्तबालं व्रजसुन्दरीणां नृत्यन्तमग्रे नवनीतहेतोः ।

श्रुत्यन्तगम्य प्रतिषिद्धभाजां प्रत्यन्तभूमि विभुमाश्रयामः ॥
अच्युतानन्तगोविन्ददामोदरं पद्मनाभ प्रभुं पुण्डरीकेक्षणम् ।
अप्रमेयं यशोदाशिशुं यादव वसुमतीवल्लभं नौमि नारायणम् ॥

End

श्रीपति श्रीधर देवकीनन्दन देवदेवं मुकुन्दं महीवल्लभम् ।
वैनतेयध्वज पुण्डरीकेक्षण पुष्कराक्ष हरि नौमि नारायणम् ॥
रुक्मिणीवल्लभं सत्यभामापति द्वारकावासिन दामबद्धोदरम् ।
नारदाभीष्टदं नन्दगोपात्मज नन्दसूनुं हरि नौमि नारायणम् ॥

Colophon

नारायणस्तवः ।

Author

Remarks—This work and the next are not mentioned in RCMPL

॥ गजेन्द्रमोक्षः ॥

1172 A3 GAJENDRAMOKSA

Substance—Palm leaf Size—12″ × 1½″ Leaf—1 12 lines per page and 48 letters per line Script—Malayālam No of Granthas—18

Subject—Emancipation of Indradyumna, from Agastya's curse

Beginning

अस्ति स्वस्तरुषण्डमण्डितलसत्कूटे त्रिकूटे गिरौ
शस्तश्रीमयदुग्धसिन्धुभवन[illegible] [illegible] ।
विस्तीर्णं विहरद्द्विरङ्गनि[illegible] [illegible] [illegible]-
मस्तोकस्फुटहाटकाम्बुजानि [illegible] ॥

कश्चित्तत्र चकार वारणपतिः [illegible] [illegible]कर्मा
विक्रम्याब्दमहस्रमद्भुत[illegible] ग्राह[illegible]मुग्रो[illegible]ग्रहीत ।
विक्रोशन् स विपन्नधीः [illegible] ग्राहज[illegible]संगराबलात्
सम्माराार्तिहरं हरिं [illegible]जास्तु[illegible] [illegible]स्तदा ॥

End

भगवानपि भक्तिशालिनां
भवरोगस्य भिषक्तमः स्वयम् ।
विहितद्विरदेन्द्रमोक्षणः
क्षणमन्तर्द्धिमगादधोक्षजः ॥

इत्यादरेण विहितं हि गजेन्द्रमोक्षं
भक्त्या हरौ शृणुत वाङ्मनसेन भव्याः ।
सद्यो हतानि दुरितान्यथ देहमुक्तौ
जागर्त्ति मुक्तिरपि हन्त हरेः प्रसादात् ॥

Colophon

गजेन्द्रमोक्षः ।
नारायणाय नमः ।

Author

Remarks—The work is a compendium of *Gajendra-mokṣa* based on Purānic lore, composed in *Kāvya* style

॥ विष्णुपादादिकेशस्तवः ॥

1172 A4 VISNUPĀDĀDIKEŚASTAVA

Substance—Palm leaf Size—12″ × 1½″ Leaves—9½
8 lines per page and 30—44 letters per line
Script—Malayālam No of Granthas—125

Subject—Same as No 1144 A

Beginning etc —Same as No 1146 H

॥ मुकुन्दमाला ॥

1172 A5 MUKUNDAMĀLĀ

Substance—Palm leaf Size—12″ × 1½″ Leaves—3
10 lines per page and 48 letters per line
Script—Malayālam No of Granthas—75

Subject—Same as No 1144 A

Beginning

मुकुन्द मूर्ध्ना प्रणिपत्य याचे
भवन्तमेकान्तमियन्तमर्थम् ।
अविस्मृतिस्त्वच्चरणारविन्दे
भवे भवे मेऽस्तु भवत्प्रसादात् ॥

नाहं वन्दे तव चरणयोर्द्वन्द्वमद्वन्द्वहेतोः
    कुम्भीपाकं गुरुमपि हरे नारकं नापनेतुम् ।
रम्या रामा मृदुतनुलता नन्दने नापि रन्तुं
    भावे भावे हृदयभवने भावयेयं भवन्तम् ॥

End

मज्जन्मनः फलमिदं मधुकैटभारे
    मत्प्रार्थनीय मदनुग्रह एष एव ।
त्वद्भृत्यभृत्यपरिचारकभृत्यभृत्य-
    भृत्यस्य भृत्य इति मां स्मर लोकनाथ ॥

Colophon

यस्य प्रियौ श्रुतिधरौ रविलोक

चावभूताम्

तेनाम्बुजाक्षचरणाम्बुजषट्पदेन
    राज्ञा कृता कृतिरियं कुलशेखरेण ॥

मुकुन्दमालां जपतां नराणा-
    मशेषसौख्यं भवतीति किञ्चित् ।
समस्तपापक्षयमेत्य देही
    संयाति मुक्तिं परमं पदं तत् ॥

कारुण्यमस्तु कमलायविभू।तिरस्तु(?)
    दीर्घायुरस्तु धनधान्यसमृद्धिरस्तु ।
आरोग्यमस्त्वभिमतस्य समागमोऽस्तु
    भद्रं तवास्तु पुरुषोत्तमभक्तिरस्तु ॥

हरिः नारायणाय नमः ।

मुकुन्दमाला समाप्ता ।

Author—Kulaśekharavarmabhūpa Scholars identify him with the Vaiṣṇava saint Kulaśekharāḷvār

Remarks—Many variants are noteworthy in this Ms The closing portion indicates that King Kulaśekharavarmā had two friends, one, a Brahmin and the other, a Vaiśya

-- --

॥ विष्णुदण्डकम् ॥

1172 A6 VIṢNUDAṆḌAKAM

Substance—Palm leaf Size—12′ × 1½′ Leaf—1 2 lines per page and 48 letters per line Script—Malayāḷam No of Granthas—18

Subject—Same as No 1144 A

Beginning

लक्ष्मीकटाक्षकृतलक्ष्मीविशेषमणिलक्षोपशोभिमुकुट
लीलावलम्बदळिमालाभिरामतमनीलाळकातिलळितम् ।
उद्यत्किरीटनवरत्नप्रभा॰॰लहृद्यस्फुटाळिकतट
संगादिभास्कृतगङ्गाधरस्फटिकलिङ्गायमाननिलकम् ॥
सुभ्राजितभ्रमरसुभ्रूकुलभ्रमदसुभ्रूविभङ्गसुभगं
कारुण्यहारिमृदुकारुण्यशालिपृथुकारुण्यशीतळदृशम् ।
नीलाळिवृन्दवृतनीलारविन्दकृतलीलावतंमरचन
नीळाभिरामतरनीळाकटाक्षनिभडोळ भकर्णयुगळम् ॥

End

पद्माविलोलकरपद्मोपलालितममु॰फुल्लजङ्घमनघम्
अच्छातकच्छपरुगुच्छेदकप्रपदमच्छाङ्गुलीनखमाणिम् ।

श्रीमत्पदाम्बुरुहरेणु... ... ...

...म्बुदाविरळकाळायपाळिनवकाळेयकोमळतनुम् ॥

नारायण निगममारामृतं नमत नानाजनैकनिलयम् ।

हरिः

Colophon

Author

Remarks—Despite the title suggestive of *Dandaka* style, the work comprises rhymed verses in *Aśvadhāti* metre



॥ नरसिंहाष्टकम् ॥

1172 A7 NARASIMHĀSTAKAM

Substance—Palm leaf Size—12" 1½" Leaf—1 11 lines per page and 64 letters per line Script—Malayalam No of Granthas—15

Subject—A panegyric of Nrsimha

Beginning

श्रीमदकळङ्कपरिपूर्णशशिकोटि-
श्रीधरमनोहरसटापटलकान्त ।
पालय कृपालय भवाम्बुधिनिमग्नं
मामसुरकाल नरसिंह नरसिंह ॥

पादकमलावनतपातकपटानां
पाटन परावरपते पतगकेतो ।

पावन परायण पुराण परमा मां
पाहि कृपयैव नरसिंह नरसिंह ॥
मौलिषु विभूषणमिवामरवराणां
योगिहृदयेषु च शिरःसु निगमानाम् ।
राजदरविन्दरुचिरं पदयुगं ते
धेहि मम मूर्ध्नि नरसिंह नरसिंह ॥

End

माधव मुकुन्द मधुसूदन मुरारे
वामन नृसिंह शरणं भव ममेति ।
कामदलपाशिखिलकारण समेय
कालममरेश नरसिंह नरसिंह ॥
हाटककिरीटवरहारवनमाला-
तारारशनामकरकुण्डलमणीन्द्रैः ।
भूषितमशेषनिलयं तव वपुर्मे
चेतसि विभाति नरसिंह नरसिंह ॥

Colophon

भैरवमुरारिनिधनायखिल(?)यत्र
श्रीनृहरिकोपवहळानलशमाय ।
श्रीभगवदङ्घ्रिमुनिवागमृतवर्ष-
स्तोत्रमिदमष्टकमभीष्टफलदं नः ॥

Author—Bhagavadanghrimuni

Remarks—This work is identical with No 10079 DCSM, Vol XVIII The colophon furnishes only the generic category to which the author belonged



॥ शिवपञ्चकम् ॥

1172 A8 SIVAPAÑCAKAM

Substance—Palm leaf Size—12" 1½' Leaf—½
4 lines per page and 48 letters per line
Script—Malayālam No of Granthas—6.
Complete

Subject—A eulogy of Pañcākṣara

Beginning

नमन्ति ऋषयो य(स्या?सा)त् नमन्त्य(स्य?प्स)रमो गणाः ।
नरा नमन्ति देवेश नकाराय नमो नमः ॥
महादेवं महात्मान महामायात्?परात्परम् ।
महादेव जगत्सर्वं मकाराय नमो नमः ॥
शिव शान्त जगन्नाथं लोकानुग्रहकारकम् ।
शिवमेकपदं नित्य शिकाराय नमो नमः ॥

End

वाहनं ऋषभो यस्य वासुकिः कण्ठभूषणम् ।
वामशक्तिधरं देवं वाकाराय नमो नमः ॥
यत्र यत्र स्थितो वापि सर्वव्याधिविनाशनम् ।
यो गुरुः सर्वभूतानां यकाराय नमो नमः ॥
पञ्चाक्षरं पर गुह्य पवित्र पापनाशनम् ।
चिन्तयेन्मनमा नित्यं शिवलोके महीयते ॥
नमः शिवाय ।

Colophon

Author:

Remarks—The initial letters of the five verses contained in this work from the "Pañcākṣara" The work is entitled Advaitapañcaka in RCMPL

॥ गौरीदशकम् ॥

1172 A9 GAURĪDAŚAKAM

Substance—Palm leaf Size—12"×1½" Leaf—½ 13 lines per page and 48 letters per line Script—Malayālam No of Granthas—20

Subject—Same as No 1147 H

Beginning etc —Same as No 1147 I

Author

Remarks—The refrain in the last pāda in every verse is noteworthy The whole work is composed in *Mattamayūra* metre The following *śloka* epitomising the story of Rāma is quoted at the close

जातो वंशे रघूणां मुनिवरवचनात् ताटकां ताडयित्वा
कृत्वा पुण्यामहल्यां त्रुटितहरधनुर्मैथिलीवल्लभोऽभूत् ।
प्राप्यायोध्यां नियोगात् पितुरटविमगाद्धीतमीतोऽस्तवाली
बद्धाब्धिर्ध्वस्तलङ्को दलितदशमुखः सीतया ... ... ॥

॥ नारायणाष्टकम् ॥

1172 A10 NĀRĀYAṆĀṢṬAKAM

Substance—Palm leaf Size—12"×1½". Leaf—

9 lines per page and ... letters per line
Script—Malayalam. No. of granthas—15

Subject—Same as No. 11,1 A

Beginning

श्रीवासुदेव जय कृष्ण मुरारिशौरे
 श्रीपद्मनाभ करुणाकर चक्रपाणे ।
श्रीशार्ङ्गपाणिरघुनन्दनकंसवारे
 नारायणाय परम(ा त्म) नमो नमोऽस्तु ॥

श्रीमाधवाय मधुकैटभमर्द्दनाय
 श्रीविश्वरूप जय देवकिनन्दनाय ।
श्रीवल्लभाय धरणीधरमोक्षदाय
 नारायणाय परमात्म नमो नमोऽस्तु ॥

गोवर्द्धनाय भुवनत्रयभारनाथ
 गोविन्द गोपति हरे पुरुषोत्तमाय ।
गोपादधूलिधवलाय सुरक्षिताय
 नारायणाय परमात्म नमो नमोऽस्तु ॥

End

देवस्वरूपरवये वटुवामनाय
 पद्मायुधाय पवनाय जनार्दनाय ।
आदित्य देव सकलेश्वर सूर्य भानो
 नारायणाय परमात्म नमो नमोऽस्तु ॥

श्रीरामदेव मनुवंशकुलप्रदीप
 श्रीमानवेन्द्र धरणीपति नारसिंह ।
श्री . दिवाकर श्रीधराय
 नारायणाय परमात्म नमो नमोऽस्तु ॥

Colophon :

Author .

Remarks—Same as No 1147 V

- --- -

॥ श्रीरङ्गमणवाळाष्टकम् ॥

1172 A11 SRĪRANGAMANAVĀLĀSTAKAM

Substance—Palm leaf Size—12' × 1½" Leaf—½
12 lines per page and 40 letters per line
Script—Malayālam No of Granthas—15

Subject—A eulogy of Śrī Ranganātha

Beginning

सनन्दसनकादिभिरचिन्त्यमतिदूर
नन्दसुतगोपन.... .... ।
. ...
... .खिलाधिपमुपासे ॥

अण्डजकुलाधिपतिवाहनमनादि
पुण्डरीकनेत्रमयुतार्कसममौलिम् ।
कण्टकशिरश्छिदमनन्तशयनं श्री-
रङ्गमणवाळमखिलाधिपमुपासे ॥

शुद्धममृत परमतीन्द्रियमतर्क्य
सत्यवचनं सकलभूतहृद्यस्थम् ।
विष्णुममृतात्मकमनन्तशयनं श्री-
रङ्गमणवाळमखिलाधिपमुपासे ॥

End

शुभाशुभविमुक्तपरं परमनादि
गुहाशयननिष्कळमचञ्चलमतीतम् ।
अनादिममृतात्मकमनन्तशयनं श्री-
रङ्गमणवाळमखिलाधिपमुपागे ॥

पर परमनादिममृतं परमानित्य
पुरन्दरमज शिकरूपमणुमात्रम् (?)।
अनन्तमविनाशनमनन्तशयनं श्री
रङ्गमणवाळमखिलाधिपमुपागे ॥

लोचनदिवाकरकुले महति रुद्रे
रावणवधाय सुरमानवाहिताय ।
तन्मकरकुण्डलमनन्तशयन श्री-
रङ्गमणवाळमखिलाधिपमुपागे ॥

... काशमादित्यवर्ण
नारायणं योगविज्ञानरम्यम् ।
ब्रह्मादिसेवितमनन्तशयनं श्री-
रङ्गमणवाळमखिलाधिपमुपागे ॥

श्रीरङ्गनाथहरिमस्मरणमेकं
कोटिबहुजन्मकृतपापनिर्हरणम् ।
निर्हणपाप? समचिन्त्यहृदयं श्री-
भुजगेन्द्रशयनं हरिमुपागे ॥

Colophon

Author.

Remarks—*Manavāla* is the Dravidian equivalent for "जामाता" in Sanskrit Lord Ranganātha is panegyrized herein as a *Manavāla*

॥ हरिद्वादशनामस्तवः ॥

1172 A12 HARIDVĀDAŚANĀMASTAVA

Substance—Palm leaf Size—12"×1½" Leaf—1
16 lines per page and 40 letters per line
Script—Grantha No of Granthas—20.

Subject—Same as No 1165 B

Beginning

अहर्निशं केशव केशिसूदन
त्वदङ्घ्रिपङ्केरुहरेणुरागिणी ।
अकृत्रिमा भक्तिरमुक्तभावन
भवत्प्रसादादविपत्तिरस्तु मे ॥

न जातु नारायणपादपङ्कज
स्पृशन्ति यावन्निखिलैकनामपि ।
ममापि वाक्यापशब्दैस्ततः स्तुता
गुणास्त्वदीया न भवन्ति दूषिताः ॥

End

शरीरकारागृहगाढसंयत
मदीयमात्मानमलब्धनिर्वृतिम् ।
तमेव दामोदरपादपद्मयोः
समर्प्य निक्षेपमिवास्मि निर्वृतः ॥

इम स्तवं द्वादशनामसंज्ञितं
दिने दिने भक्तिसमार्द्रया गिरा ।
पठन्ति ये विष्णुपदाम्बुजाश्रया-
स्तरन्ति संसारसमुद्रमश्रमम् ॥

Colophon

हरिद्वादशनामं समाप्तम् ।

Author

Remarks—The work contains 12 verses apportioned for the 12 celebrated appellations of Visnu

---

॥ कृष्णकवचम् ॥

1172 A13 KRSNAKAVACAM

Substance—Palm leaf Size—12″ × 1½″ Leaf—1
12 lines per page and 44 letters per line
Script—Malayalam No of Granthas—15

Subject etc —Same as No 1153 A

Colophon

श्रीकृष्णकवचं समाप्तम् ।

Author

Remarks—This Kavaca is used as an amulet for safeguarding the welfare of children The verse beginning with त्रिकालमेव (noted in the closing portion of No 1153 A) is missing herein,

---

॥ कृष्णस्तवः (मणिप्रवालम्) ॥

1172 A14 KRSNASTAVA

Substance—Palm leaf Size—12″ × $1\frac{1}{2}$″ Leaves—$1\frac{1}{2}$
7 lines per page and 42 letters per line
Script—Malayālam No of Granthas—25

Subject—Panegyrics of the ten incarnations of Visnu

Beginning

വടപല്ലവശയ്യായാം കിടന്നകടൽവണ്ണനെ
പൈതലെ കൈതൊഴം പുണ്യംചെയ്യവക്ക് നമോ നമഃ
അണിവാനെണ്ടനാവിന്മേൽ തുണെ ആക സരസ്വതി
അരുളീടുകനെക്കൻറും ഇരുളീടിന തെജസാ
കരുമാമുകിലായത്തൊൻ തിരുമേനിമുനെ ദചിഷഃ
ഉത്തമാനാം കവീന്ദ്രാണാം ചിത്തമാം ഭൃംഗസെവിതാ
നന്മചെയ്ക വചോദേവീ നന്മുല്ലമലർമാലികാ
ഇത കൈതൊഴതേൻ നിനെ ചതുർഭുജ ജഗത്പതെ
ജന്മപ്രളയദുഃഖങ്ങളെന്മേൻ വാരാതവാറു നീ
സംസാരാൽ കരകെററീട്ട കംസാരേ ശരണം ഗതഃ

End

ഇന്നുംകലിയുഗസ്യാന്തെ മന്നിലുന്നതവിക്രമ
ഉൽകണ്ടകം ജഗത്കത്തും കൽക്കിയായും പിറപ്പോൽ.
നാരദാദിമുനീൻ വന്ദ്യ ചാരണാത്ഥവിചാരണേ (?)
ഭൂരാവസ്ഥിതരൂപായ നാരായണനമോഽസ്തുതെ

Colophon

हरिदशप्रादुर्भावस्तोत्रं समाप्तम् ।
नारायणाय नमः ।

Author

Remarks--The diction adopted is old Malayālam According to the colophon the work may be styled also as Haridāsaprālurbhavastotra

---

॥ दशावतारस्तवः ॥

1172 A15 DAŚĀVATĀRASTAVA

Substance—Palm leaf Size—12″ 1½″ Leaves—1½ 8 lines per page and 40 letters per line Script—Malayālam No of Granthas—10

Subject—Same as No 1172 A14

Beginning

आत्मान्वेषणखिन्नायाः श्रुतेरन्वेषणात् स्वयम् ।
कृतप्रत्युपकाराय नमो मत्स्याय विष्णवे ॥

निजपृष्ठपरिभ्रान्तमन्दरग्रावकोटिभिः ।
कण्डूतिसुखसुप्ताय नमः कूर्माय विष्णवे ॥

आस्तमुक्ताशकलवत् सकलापि वसुन्धरा ।
यस्य दंष्ट्रान्तरे तस्मै नमः क्रोडाय विष्णवे ॥

यः खनित्रैरिवोत्खातैर्दैत्येन्द्रप्राणकन्दकैः ।
नखैर्भाति नमस्तस्मै नरसिंहाय विष्णवे ॥

पादप्रस्थत्रयीमेया यस्य भिक्षा जगत्त्रयी ।
वेदेत्तो(?)नमस्तस्मै वटुरूपाय विष्णवे ॥

End

परशुच्छिन्नराजन्यसमिधः क्रोधपावके ।
यो जुहाव नमस्तस्मै परशुरामाय विष्णवे ॥

रक्षोनीलोत्पलवनेष्वसूनासवमत् पपुः ।
यस्येषुभ्रमरास्तस्मै नमो रामाय विष्णवे ॥

दारितारातिकेदारवमासृक्पङ्किलं हलम् ।
यो बभार नमस्तस्मै रौहिणेयाय विष्णवे ॥

कळायश्यामळाङ्गाय कळक्वणितवेणवे ।
पिञ्छाजूटपिनद्धाय नमः कृष्णाय विष्णवे ॥

नमो हुतमहाशोकहविःस्विष्टकृदग्नये ।
कल्पान्ताध्वरदीक्षाय कल्किरूपाय विष्णवे ॥

Colophon

दशावतारस्तुतिः समाप्ता ।
नारायणाय नमः । नमः शिवाय ।

Author

Remarks—The work is composed in *Anustup* metre

॥ विद्यायोगिन्यष्टकम् ॥

1172 A16 VIDYĀYOGINYASTAKAM

Substance—Palm leaf Size—12″ × 1½″ Leaf—½
8 lines per page and 44 letters per line
Script—Malayālam No of Granthas—11

Subject—Same as No 1155 E

Beginning

वन्दे बन्धूकगौरां स्मरशविलसद्यौवनारम्भशोभा-
मातान्राकल्पकस्रा शशिशकलसिळत्कुन्तळां ता त्रिणत्राम् ।
नानालङ्कारकान्ता करयुगळसहामन्कपाशाङ्कुशाढ्या
देवी त्रैलोक्यसन्त्रामभयसरका हास्मवाङ्कहृद्याम् ॥
दिव्याकृति त्रिणत्रामभिनर्गिन्दुरभासुरासमलाम् ।
रक्ताकल्पविशेषा शिरगा योगीश्वरीमुमां वन्दे ॥
प्रोद्यद्यौवनलीलां नानाभरणाभिरामहृद्याङ्गीम् ।
स्मरलुळितलळितभावां हृल्लेखां विश्वरञ्जनीं वन्दे ॥

End

ज्ञातृज्ञानज्ञेयां परावरां स्थूलसूक्ष्मविरन्याताम् ।
व्यक्ताव्यक्तविभक्तामीशानी भुक्तिमुक्तिदां वन्दे ॥
नित्योदितामनन्ता भङ्गागुहा(?)नारभनात्मिका न्वारिताम् ।
नित्यक्लिन्नां नित्यां मनोन्मनीं मातरं वन्दे ॥

Colophon

Author

Remarks—There is no internal evidence for determining the identity of the author The title is based on a marginal gloss

॥ नानादेवताविषयश्लोकाः ॥

1172 A17 NĀNĀDEVATĀVIṢAYAŚLOKA

Substance—Palm leaf Size—12″ × 1½″ Leaves—1½

20 lines per page and 48 letters per line. Script—Malayālam No of Granthas—30.

Subject—Eulogies of Sarasvatī, Viṣṇu, etc.

Beginning

... ...मग्रमधीव हि वलयं स्थितिक... ... ... ।
कृतविग्रहमुग्रमहाग्हिरणं प्रभविष्णुमह प्रणमामि हरिम् ॥

प्रकृति परमं परमेश नमो हरिणप्रगुणा ... गुणाम् ।
त्रिगुणात्मतनुं त्रिदशाविनुता त्र(?)यतः प्रणमामि जगज्जननीम् ॥

करकुड्मळकल्पितकल्पतनुं प्रथिमप्रतिरुद्धसरोजयुगाम् ।
शशिकालनिकालमनुर्वदनां(?)प्रणमामि सदा कमलाममलाम् ॥

End

राजीवारुणनयनयुगं रामावल्लभनमितपदम् ।
रावणवैरिणमप्रतिमं (त?) राम वन्दे रघुतिलकम् ॥

रामं रघुकुलतिलकमयं रामं दशरथनृपतनयम् ।
वीर निशिचरवनदहनं राम वन्दे रघुतिलकम् ॥

शान्तं शारदशशिवदनं रम्यं राघवकुलतिलकम् ।
वेदं दानवबलमथनं रामं वन्दे रघुतिलकम् ॥

Colophon

Author :

Remarks—The closing *pāda* of several verses is uniform Certain laudatory verses are seen in several metres The following *mantra* in Malayālam is employed for curing hemorrhage.

കരിന്തുറവെട്ടുവൻ കരുമല പ്പറി കരിമ്പൊമ്പറി പ്പററി കരു
വിൽ പിടിച്ചു കരുഞ്ചെരന്തൊട്ടുണ്ടുകരുമാറെറ്റു കരുമാൻ വയി
ററിലക്കരുഞ്ചൊര പററിനാനംപരൊമൊ പറവൈററിപ്പോക
സ്വാഹാ കല്ലിട്ടടച്ചും നെല്ലിട്ടടച്ചും റിംശീശൂചൻ തന്നെയി
ട്ടടച്ചു നാവെക്കണക്കെ വററി വററിപ്പോക സ്വാഹാ ഇന്തി
രൻ മടമകൻ മന്തിരകനി ചെമ്പകുടത്തിൽ നീർകൊരപ്പൊ
നാളവാം വരുംമുന്നെ ചെന്നു് ർവററിഷരുനീർ വരിക സ്വാ
ഹാ ഇമ്മന്ത്രം ചൊരചൊലിയിൽവെക്കു ജപിച്ചു കുടി
പ്പാനും വയിററത്തും യൊനിയിലും തെപ്പാൻ ശമനം(?)"
ഗുരുവെശരണം"

॥ मृत्युञ्जयाष्टकम् ॥

1172 A18 MṚTYUÑJAYĀṢṬAKAM

Substance—Palm leaf Size—12" × 1½" Leaves—1½
8 lines per page and 40 letters per line
Script—Malayalam No of Granthas—10

Subject—Same as No 1154 C

Beginning

रुद्रं पशुपतिं स्थाणुं नीलकण्ठमुमापतिम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥
नीलकण्ठं विरूपाक्षं निर्मलं निरुपद्रवम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥
काळकण्ठं क(ला)मूर्धिं (?) कलाग्निं कालनाशनम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥
वामदेवं जगन्नाथं लोकनाथं जगद्गुरुम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥

End

अनन्तमव्ययं शान्तमक्षमालाधरं हरम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥
आनन्दं परमं नित्यं कैवल्यं परमात्मकम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥
स्वर्गापवर्गदातारं सृष्टिस्थित्यन्तकारणम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥
देवदेवं महादेवं देवेशमृषभध्वजम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥
मृत्युञ्जयाष्टकं पुण्यं यः पठेच्छिवसन्निधौ ।
तस्य मृत्युभयं नास्ति सत्यं सत्यं वदाम्यहम् ॥

Colophon

हरि...नमः । शिवाय नमः । श्रीरुद्राय नमः । श्रीपरमेश्वराय नमः ।

Author

Remarks—The verses contained in this work are recited by the devotees of Siva on *Pradosa* days The whole text is quoted above



॥ गणपतिस्तवः ॥

1172 A19 GANAPATISTAVA

Substance—Palm leaf Size—12" × 1½" Leaf—½
10 lines per page and 46 letters per line
Script—Malayalam No of Granthas—14,

Subject—Same as No 1147 B

Beginning

मूषिकवाहन मोदकहस्त चामरकर्ण. . ...
वामनरूप महेश्वरपुत्र विघ्नविनायकपाद नमस्ते ॥
अङ्कुशपाशवराभयहस्तं कुङ्कुम गात्रम् ।
पङ्कजपत्रविचित्रसुनेत्र शंकरसूनुमुपैमि गणेशम् ॥

End.

പർവ്വതഗിരിസുതകന്ദരനെ ഷണ്മുഖ മഗ്രഗിരോചനനെ
ത്രിഭുവനനാഥമഹാപ്രഭുവെ ഗണയ ഗണപതി മമ ശരണം
ഹരസുതമുരഗവരാഭരണം ശിശുശശി വിഗ്രസിതമകുടതടം
പ്രണമത ഗണപതിമസുരരിപും പ്രണമത ശിവസുത ഗണ
| പതിശരണം.

Colophon ·

Author

Remarks—The opening verse is evidently extraneous At the close of the work occur a few verses in mixed Malayalam and Sanskrit Then follow the subjoined stanzas on Sarasvatī

मणिकङ्कणमण्डितबाहुलते जनरञ्जितजन्मजरार्तिहरे ।
मयि देवि सरस्वति ते करुणां कुरु जन्मनि जन्मनि मन्नमिते ॥
अच्छस्फटिकसमानच्छायं चन्द्रकलाङ्कितकेशकलापम् ।
... ...खिलजने स्यां वन्दे वाणीमभयदवरदाम् ॥

Lastly a gap occurs up to a fragment of a different work, wanting in beginning and end.

॥ सीतासन्देशः ॥

1172 A20 SĪTĀSANDEŚA

Substance—Palm leaf Size—15″ × 1½″ Leaves—7
8 lines per page and 44—46 letters per line.
Script—Malayalam No of Granthas—150

Subject—Lyric poetry

Beginning

शिवम्

भङ्क्त्वा चापं व्यवह वने . . .श्च
हृत्वानुज्ञां पथि भृगुसुतस्यैत्य साध्वीमयोध्यां
ज्यभ्रष्टः सह म(ह)भुवा कान्तयारण्यगामी ।
सन्त णकृते हेतुरासं पितुर्मे
पापः स्नेहः कथमिव भवेच्छर्मणे जन्मभाजाम् ॥
राज्ये भारं तदनु भरते निक्षिपंश्चित्रकूटे
तत्तत् कुर्वन्मुनिजनवचः प्राप्य गोदातटा
अध्यासीनः स्वविमतकृतां राक्षसीरक्षसानां
हृत्या हत्यापिच दशमुखाबद्धवैरोऽस्मि जातः ॥

End

तीर्त्वा तस्य त्रिककुदचलस्यैत्य शृङ्गं सुवेलं
कल्लोलास्फालनमसृणितग्रावजातप्रपातम् ।
स्थित्वा शंभोरिव सितसरोजन्म सम्यक् कपर्दे
तस्मिन् विस्मायय? पिश्ततत्सुभूनयतो विश्वलोकान् ॥

त्यक्त्वा श्रान्तिं श्रित ... ... विवमन्नर्गवोल्लङ्घनोत्था-
माश्वस्याश्वस्य हि जलकणस्यन्दिभिर्मन्दवातैः ।
उद्वीक्षेथाः सुखमुखशिखरेऽन्यत्र नक्तंचराणा
वासस्थानं रिपुपरिपदां दत्तशङ्कां च लङ्काम् ॥

Colophon

इति सीतासन्देशः पूर्वः ।
श्रीरामाय नमः । श्रीरामलक्ष्मणाय नमः । हनुमते नमः ।

Author

Remarks—Unlike in other lyric poems, the title of the work signifies the individual to whom the message is conveyed In RCMPL this work is erroneously designated "Hamsasandesa" A few leaves in the beginning are missing The Ms. concludes with the *Purvasandeśa* only

॥ माहिमरामायणम् ॥

1172 A21 MAHIMARĀMĀYANAM

Substance—Palm leaf Size—12″×1¼″ Leaves—3
8 lines per page and 46 letters per line
Script—Malayālam No of Granthas—14

Subject—The story of Rāma

Beginning

अथावाच्यं सर्वैः स्वमतिपरिणामावधि गृणन्
ययाचे विश्वेशं विबुधनिवहो रावणवधम् ।

तथास्त्वित्युन्मुच्य प्रभग्मुमतः श्रीमद्नुज-
त्रयान्वीतः साक्षाद्......शे दशरथात् ॥
स कस्य स्तोतव्यः कतिविधगुणः कस्य विषय-
स्तदाम्ता देवेऽस्मिन् विनिपठितविद्ये...... ।
परित्रातुं यज्ञ परमनियमी प्राप्य गहनाद्
ऋषिर्विश्वामित्रो दशरथमयाचिष्ट तनयौ ॥

End

विपुलतमसे तत्संहारे हराय नमो नमो
भुवनसुखसंसृष्टौ धात्रे स्थितावपि विष्णवे ।
इति पदसरोजन्मामेवापरैर्विबुधैर्युतो
जनकतनयाजानी रामोऽध्युवास पुरं स्वकम् ॥
इति चकितममन्दीकृत्य मां भक्तिराधा-
द्वनिवलयरक्षां यस्य तं यौवराज्ये ।
भरतमपि च कुर्वन् कैकयीसूनुमाद्यः
सुचिरमुपचितश्रीः पालयामास लोकान् ॥

Colophon

हरिः। महिमरामायण समाप्तम् ।
പൊതിയിൽ മാധവചാക്യാരുടെ ചമെച്ചു്

Author—Potıyıl Mādhavacākyār

Remarks—The following stanza occurs at the end:

मत्स्यः कूर्मो वराहश्च नारसिंहोऽथ वामनः ।
रामो रामश्च रामश्च कृष्णः कल्की च ते दश ॥
श्रीरामाय नमः। श्रीलक्ष्मणाय नमः ।

॥ कृष्णस्तुतिः (मलयाळभाषा) ॥

1173 No 2 KRSNASTUTI

(in Malayalam)

Substance—Palm leaf Size—12 1'' Leaf—1
16 lines per page and 46 letters per line
Script—Malayalam No of Granthas—20

Subject—A eulogy of Krsna

Beginning

താലോലിച്ചും കളിച്ചും കനിവൊടു തിരുമുല്പ്പാട്ടിയും ഊട്ടിയും-
[പൈം-
പാലൊലും വാക്കോതിട്ടും പരിചൊടു [illegible] സന്താപശ്രമം നകന്നും
പാലാഴിപ്പെൺ [illegible] ദേവാംശരാമൽ-
[കൊവും
ബാലം നീലാളകശ്യാമളമുഖപ്രസി [illegible] കാണ്മതൊ-
[ഞാൻ
ഉണ്ടെല്ലന്നോമൽ പോവിവന്ന വി ചെറുപിള്ളരുമായ്-
[മാട്ടമേപ്പാൻ
കണ്ടില്ലിന്നേരമിന്നും ദിനകരനിരു പുറത്തു പോന്നഗ്രസേന
പണ്ടേ ചൊറിട്ടപൊന്നിൽ തളികയിലമ്മെ വെണ്ണയും വെച്ചു-
[മാതാ
തണ്ടീട്ടും നന്ദഗോപാലകമുഷസി ഞാനമ്മോററാം കാണ്മതൊ-
[ഞാൻ.

End.

കോടക്കാർമേഘമാലക്കുഴലികൾ പതിനാറായിരത്തോട്ടു കൂട-
ച്ചാടിക്കാമൊത്സവേ ചെൻറടവികളിൽ നിലാവിൽ കളിക്കും-
[ദശായാം

പേടിക്കുംമാറു താസാമത്തിലൊരു തരുണീം
കൊണ്ടുയന്നംബരേ പോയ്
ക്രീഡിക്കും ബാലഗോപാലകമുഷസി ജഗ-
ന്മോഹനം കാണ്മതൊ ഞാൻ

കൊൽതേരൂഴ്ക്കിൻറ വാചാ വരയുവതിജനം
തണ്ഡിഷമൽ താളമൊത്തും
ചീർത്തീട്ടും പ്രേമവത്യാ മനസി മതിമാ-
ന്നോറൂപാട്ടും ദശായാം

കാൽത്താളംവെച്ചു കാഞ്ചീമണിതളകൾ ചില-
മ്പോചദേവ തന്തിടാം
പൊററീ നീ കൂടിയാട്ടും പരിമുഷസിജഗ-
ന്മോഹനം കാണ്മതൊ ഞാൻ

Colophon

Author

Remarks—The work is not noticed in RCMPL The last Fol contains verses detailed for daily use

॥ कृष्णाष्टकम् ॥

1172 A23 KRSNĀSTAKAM

Substance—Palm leaf Size—12″ × 1½″ Leaves—1½ 12 lines per page and 46 letters per line Script—Malayālam No of Granthas—16

Subject—A panegyric of Kṛṣṇa

Beginning

अत्यन्त[illegible] [illegible]

दिग्वा[illegible] ....[illegible]म ।

त्रिस्त्र[illegible] [illegible]र्थं

कृ[illegible]ं [illegible] तुम् ॥

नारायण सुरगुरुं जग[illegible]

भक्तप्रिय [illegible] ।

भूभार[illegible]

कृष्णं [illegible] तुम् ॥

End

उद्धृत्य हस्ते[illegible] ....[illegible]तं

कंसं निह[illegible] ।

तत्राभिषिच्य पितरं पुन[illegible]

कृष्ण नमामि शिरसा वसुदेवसूनुम ॥

कृष्णाष्टकं पठति यश्च शृणोति नित्यं

भक्त्या यतो दृढवतुभगवानुरूपम् (?)

सोऽपि प्रयाति सकलं दुरितं विहाय

क्षीराब्धिशायिनि नन्तपुर्मनुष्याः ॥

Colophon

कृष्णाष्टक समाप्तम् ।

Author ·

Remarks— This composition is not included in RCMPL

॥ किरातीस्तवः ॥

1172 A24 KIRĀTĪSTAVA

Substance—Palm leaf Size—12" × 1½" Leaf—1
8 lines per page and 46 letters per line
Script—Malayalam No. of Granthas—10

Subject—Glorification of Gaurī in the disguise of a *Kirāti*

Beginning

आदौ कदाचिदचले [illegible]
रुद्रो दधार किल चारुकिरातरूपम् ।
तद्भावयोग्यमतुला [illegible] वपुश्च गौरी
या सा परिच्छविरिता [illegible] गीता ॥

श्यामतनुमरुणपङ्कजवदनां [illegible]नागमर्दगाम् ।
पर्णांशुकपरिधानां वेश्याहिक[illegible]कान्तिताम् ॥
तनुमध्यलतां पृथुलस्तनयुगलां कराग्रराजद्भयवराम् ।
शिखिपिञ्छनाळवलयां गुञ्जाफलगुणितभूषणाकणिताम् ॥
नूपुरफणिकेयूरां तां निलमणिविभ्रमविधुताभरणाम् ।
द्विजनागविहितकुण्डलमण्डितगण्डद्वयीमुकुरशोभाम् ॥

End

शोणधराधर?पल्लवविद्रुममणिभासुरां प्रसन्नां च ।
पूर्णशशिबिम्बवदनामरुण लोचनत्रयीनळिनाम् ॥
कुञ्चितकुन्तळविलसन्मकुटघटीताहिबर्हिपिञ्छयुताम् ।
कैराती वनकुसुमोज्ज्वलां मयूरातपत्रकेतनिकाम् ॥
सुरुचिरसिंहासनगां विभ्रममभ्रुशयमन्दिरां तरुणीम् ।
तामेनां त्वरिताख्यां ध्यात्वा कुर्याज्जपार्चनाहोमान् ॥

Colophon

Author

Remarks—"त्वरिता" is another appellation of Gaurī figuring in the story of the presentation of Pāsupata to Arjuna by Lord Paramesvara The whole text is quoted above The following verse in praise of Śiva is quoted at the end of the Ms

बालार्कायुततेजसं धृतजटाजूटेन्दुखण्डोज्ज्वलं
नागेन्द्रैः कृतभूषणं जपवटीं शूलं कपालं दधत् ।
खट्वाङ्गं दधत त्रिणेत्रविलसत्पञ्चाननं सुन्दरं
व्याघ्रत्वक्परिधानमब्जनिलयं श्रीनीलकण्ठं भजे ॥

—

॥ शङ्कराष्टकम् ॥

1172 A25 SANKARĀSTAKAM

Substance—Palm leaf Size—12" × 1½" Leaf—1
15 lines per page and 40—44 letters per line
Script—Malayālam No of Granthas—20

Subject—Same as No 1154 C

Beginning

देवदानववन्दनोचितचारुपादकुशेशय
लोकसम्भवसंहृतिस्थितिकारण परमेश्वरम् ।
शैलनायककन्यकाकुचकुङ्कुमारुणवक्षसं
देवदेवमुमापतिं प्रणमामि देवशिवंकरम् ॥
अञ्जनाभमकुञ्जराजितकञ्चुकावृतकन्धर
कुण्डलीकृतपन्नगाधिपकर्णभूषणभूषितम् ।

चण्डभानुसहस्रमण्डलसन्निभं कपिलेक्षण
मन्निबद्धजटाधरं प्रणमामि देवशिवङ्करम् ॥

End

चन्द्रचन्दनकुन्दहारनितारविन्ददळप्रभं
वन्दनीयपदाम्बुजं बहुबाहुपूर्णदिगन्तरम् ।
इन्द्रपावकयक्षराजयमानिलादिभिरर्चित
चन्द्रशेखरमीश्वरं प्रणमामि देवशिवङ्करम् ॥

दक्षिणामुखविग्रह वटवृक्षमूलनिकेतनं
पद्मपत्रविनिस्सृताकुल(?)वेदसारमकल्मषम् ।
मत्तरावणतत्त्वनिर्मलक्षिप्रदानपराभवं
बालचन्द्रविभूषितं प्रणमामि देवशिवङ्करम ॥

Colophon

Author

Remarks—The work is composed in *Harinapluta* metre

॥ सौरपञ्चकम् ॥

1172 A26 SAURAPAÑCAKAM

Substance—Palm leaf Size—12″×1½″ Leaf—½
6 lines per page and 32 letters per line.
Script—Malayalam No of Granthas—6

Subject—Same as No 1147 A

Beginning

त्वगसृङ्मांसमेदोस्थिसन्तता व्याधिसन्ततिः ।
दीधितिशस्त्रैर्नः श्रीसूर्याय नमोऽस्तु ते ॥

दुष्कृ ... ... क्तिहेतूत्थाः किरणैर्ग्निश्वारुजः ।
संशोषयानलमयैः भास्कराय नमोऽस्तु ते ॥

उत्सृष्टानपि ... ... व्याधीनचिकित्स्या इति प्रभो ।
दह वह्निमयैरुस्रैर्मार्त्ताण्डाय नमोऽस्तु ते

End

क्षार ... ... ण्यामयजान्यस्वदपाकुरु करैर्विभो ।
पावनैरेव भूयोऽपि श्रीमन्मित्र नमोऽस्तु ते ॥

आप्लावयामृतमयैरस्त्रानानमितां शुभिः ।
आनन्दरूपाय नमः सहस्रकिरणाय ते ॥

पञ्चस्तवमिमं सौरं श्रीमत्पञ्चामृतामृतम् ।
पठतो व्याधयो भीताः पलायन्ते दिशो दश ॥

हरिः ।

Colophon

Author

Remarks—This panegyric on Sūrya is so efficacious as to cure even the so-called incurable diseases The citations given above comprise the whole work

---

॥ साम्बपञ्चाशिका ॥

1172 A27 SĀMBAPAÑCĀŚIKĀ

Substance—Palm leaf Size—12" × $1\frac{1}{2}$" Leaves—6 8 lines per page and 40 letters per line Script—Malayālam No of Granthas—120

Subject—Same as No. 1147 A.

Author—Sāmba

Remarks—The doctrines set forth in the Upaniṣad are epitomised herein The work is published with commentary as No 104 in TSS

॥ दुर्गास्तवः ॥

1172 A28 DURGĀSTAVA

Substance—Palm leaf Size—11″×1½″ Leaves—1½ 15 lines per page and 36 letters per line. Script—Malayālam No of Granthas—17

Subject—Same as No 1155 E

Beginning

नमोऽखिलजगद्धात्र्यै दुर्गायै दुर्गमूर्तये ।
सर्वोपाधिषु या शेते सभुसभुजगत्त्विषा ॥
उत्तिष्ठ देवि पुरुषि भद्रे किं स्वपिषि ध्रुवं ।
विद्ये वीरिणि पश्य त्वं स्वीय ज्योतिनपे मं (?) ॥
शमयाशु महेशानि भयं मे समुपस्थितम् ।
यदि शक्यमशक्यं वा तन्मे भगवति प्रभो ॥
कृपां कुरु जगन्मातरनन्यशरणे मयि ।
मदीयं दुःखसर्वस्वं निर्दहस्व निजार्चिषा ॥

End

मुञ्चमानो निजं देहमर्चयंस्त्वत्पदाम्बुजम् ।
भवेय तत्परं ज्योतिः स्वानुभूत्येकलक्षणम् ।

दुःखसंक्षुब्धचित्तेन यन्मया परिदेवितम् ।
तदेतदम्ब वात्सल्यात् क्षन्तव्यमखिलं मयि ॥
क्षन्तव्यमखिलं मयि

हरिः श्रीदुर्गायै नमः ।

Colophon

Author

Remarks—The following verses in praise of Srī Vidyā and Kārtavīrya are cited at the close of the Ms

रक्तां रक्तोत्पलालङ्कृतकरयुगलामङ्कुशामग्रपश्चा-
त्पार्श्वेषु स्वर्णपीठस्थितिजुषमवनम्रस्य रत्नाभिषिक्तैः ।
न्यस्यन्ते मूर्ध्नि रक्तोत्पलयुगलमिलार्थाय विद्यां भजामि ?
धनुः पञ्चशतान सव्यदक्षिणस्ताव(कान्?तः) शरान ।
बिभ्रत्तु कार्तवीर्योऽसौ चोरेभ्यो रक्षतादिमाम् ॥

॥ शिवस्तवः ॥

1172 A29 SIVASTAVA

Substance—Palm leaf Size—11″ × 1½″ Leaf—1. 12 lines per page and 30—36 letters per line Script—Malayālam No of Granthas—12

Subject—Same as No 1147 G

Beginning etc —Same as No. 1171 F.

Remarks—The following *śloka* eulogising *Śiva-linga* occurs at the end of the Ms

पीठं यस्या धरित्री जलधरकलशं लिङ्गमाकाशमूर्तिं
नक्षत्रं पुष्पमाल्यं ग्रहगणनमितं नेत्रचन्द्राकर्वह्निम् ।

कुक्षिः म॰तगमुद्र......शुजगिरि॰ि॰ं म॰न॰तालपादं
वेदं वक्त्र षडङ्ग दिशु च दडने दिव्यलिङ्ग नमोऽस्तु ॥

॥ शिवस्तव ॥

1172 A30 SIVASTAVA

Substance—Palm leaf Size—11″ 1½″ Leaves—2
7 lines per page and 36 letters per line
Script—Malayālam No of Granthas—30

Subject—Beginning—Same as No 1147 L

End

भावयामि भवभीतिशान्तये
भस्मधूलिधवलं कपर्दिनम् ।
केवलेन मनसा मनोहरं
किञ्च कश्चिप (?)फणीन्द्रभूषणम् ॥

कपर्दिने करिवरचर्मधारिणे
कपर्दिने कपिलविलोलचक्षुषे ।
पिनाकिने पितृवननित्यवासिने
विलासिने विषधरमन्थे नमः ॥

Colophon

Author

Remarks—The verses herein are composed in Sankhyāmālā style

॥ सौरपञ्चकम् ॥

1172 A31 SAURAPAÑCAKAM

Substance—Palm leaf Size—11″ × 1½″ Leaf—½.

6 lines per page and 32 letters per line Script—Malayālam No of Granthas—6

Subject—Same as No 1147 A

Beginning etc —Same as No 1172 A26

॥ पञ्चायुधस्तवः ॥

1172 A32 PAÑCĀYUDHASTAVA

Substance—Palm leaf Size—11"×1¾" Leaf—¼ 8 lines per page and 30 letters per line Script—Malayālam No of Granthas—9

Subject etc —Same as No 1146 P

Author

Remarks—The work describes the magnificence of the weapons like Pāñcajanya etc It contains five verses on the whole In RCMPL seven more compositions are mentioned a few of which have already been noticed.

॥ नारायणीयम् ॥

1173. NĀRĀYAṆĪYAM.

Substance—Palm leaf. Size—6⅜"×1½" Leaves—158 7—9 lines per page and 24 letters per line Script—Malayālam. No. of Granthas—1900. Complete.

Subject—A compendium of the Bhāgavata.

Colophon

इत्थं भागवतस्तोत्रं स्वाग्रजेन विनिर्मितम् ।
व्यलिखन्मातृदत्ताख्यो भगवद्भक्तिभूतये ॥
गुरुवायुपुराधीश प्रसीद करुणाकर ।
(पुरुषोत्तम वैकुण्ठ) त्वयि सर्वं समर्पितम् ॥

Author—Nārāyanabhatta

Remarks—Only the text is extant in the Ms It has been published as No 18 in TSS with the commentary Bhaktapriyā by Desamangala Vāryar This composition is generally used for *pārāyana* in Malabar The colophon manifests that the individual who transcribed the work is the author's brother And so the codex belongs to the latter half of the 16th century A. D

॥ नारायणीयम् ॥

1174 NĀRĀYANĪYAM

Substance—Palm leaf Size—$9\frac{1}{2}'' \times 1\frac{3}{8}''$ Leaf—121 6—8 lines per page and 36 letters per line Script—Malayālam No of Granthas—1900 Complete

Subject etc —Same as No 1173

Colophon

अपरिचयादज्ञानाच्चपलधिया यद्यदत्र दुर्लिखितम् ।
तत्तत्करुणाम्बुनिधे मातः क्षन्तव्यमखिलवागधिपे ॥

श्रीनारायणाय [illegible] ।

रामेण लिखितमिदं पुस्तकम् ।

Author—Same as No [illegible]

Remarks—The colophon gives the scribe's name

|| नारायणीयम् ||

1175 NĀRĀYAṆĪYAM

Substance—Palm leaf Size—11" × 1¼" Leaves—92
9—11 lines per page and 34 letters per line
Script—Malayālam No of Granthas—1900
Complete

Subject etc —Same as No 1173

Colophon

नारायणीयं समाप्तम् ।

बिम्बलीतातपादेभ्यो मद्गुरुभ्यो नमः सदा ।
येषां स्मरणमेवास्मान् पुनातीदं पुनः किमु ॥

नारायणेन लिखितमिदं पुस्तकम् ।

ഷാണ്മാതുരമാം ഗേഹത്തിൽ നിവസിക്കുന്ന ദേവിയെ
ഉള്ളിലായി സ്മരിച്ചിട്ട് ലിഖിതം പുസ്തകം മയാ
ബിംബലീതാതപാദേഭ്യോ നമഃ

Author—Same as No 1173

Remarks—Same as No 1174

॥ नारायणीयम् ॥

1176 NĀRĀYANĪYAM

Substance—Palm leaf Size—7⅝" 1⅝" Leaves—144
8—9 lines per page and 25 letters per line
Script—Malayālam No of Granthas—1900
Complete

Subject etc —Same as No 1173

Remarks—The verse beginning with "गुरुवायुपुराधीश"
noted in No 1173 is omitted in this Ms



॥ नारायणीयम् ॥

1177 NĀRĀYANĪYAM

Substance—Palm leaf Size—9¾"×1⅝" Leaves—94
9—11 lines per page and 33 letters per line.
Script—Malayālam No of Granthas—1900
Complete

Subject—Same as No 1173

Colophon

नारायणीयं समाप्तम् । शुभमस्तु ।

Author—Remarks—Same as No 1173



॥ नारायणीयम् ॥

1178 NĀRĀYANĪYAM

Substance—Palm leaf Size—6¾"×1¼" Leaves—152,

7—10 lines per page and 36 letters per line
Script—Malayālam No of Granthas—1900.
Complete

Subject etc —Same as No 1173

Colophon

इति श्रीनारायणकविना विरचित नारायणीयं स्तोत्र समाप्तम् ।

Author—Remarks—Same as No 1173

॥ नारायणीयम् ॥

1179 NĀRĀYAṆĪYAM

Substance—Palm leaf Size—$7\frac{1}{4}'' \times 1\frac{1}{2}''$ Leaves—173
6—9 lines per page and 23 letters per line
Script—Malayālam No of Granthas—1900.
Complete.

Subject etc —Same as No 1173

॥ नारायणीयम् ॥

1180 NĀRĀYAṆĪYAM

Substance—Palm leaf Size—$5\frac{3}{8}''$ $1\frac{3}{4}''$ Leaves—144
12 lines per page and 18 letters per line
Script—Malayālam No of Granthas—1900
Complete.

Subject etc —Same as No. 1173,

Remarks—After the colophon occur the following verses

धात्री मान्त्रिगुरुः श्रियं मुखगुरुर्भः कान्तिमत्तां शशी
ज्योऽन्तगुः सविता रुजं चरमगुः मो विप्रवास मरुत् ।
लै नो द्यौश्चिरजीवितं मुखलघुस्तोयं य ऋद्धि शिखी
गेऽन्तलो मरणं वमन्त्यलघुतः शून्य विधत्ते फलम् ॥

बिम्बलीतातपादेभ्यो मद्गुरुभ्यो नमो नमः ।
येषां स्मरणमेवास्मान् पुनातीदं पुनः किमु ।

The opening Fol contains the portrait of Hanumān and the next, that of Nārāyana-battatiri, Krsna as well as Nārada

---

॥ नारायणीयम् ॥

1181 NĀRĀYANĪYAM

Substance—Palm leaf Size—$6\frac{3}{4}'' \times 1\frac{1}{2}''$ Leaves—143 7—11 lines per page and 24 letters per line Script—Malayālam No of Granthas—1900

Subject etc —Same as No. 1173

॥ नारायणीयम् ॥

1182 NĀRĀYANĪYAM

Substance—Palm leaf Size—$6\frac{3}{4}'' \times 1\frac{5}{8}''$ Leaves—103. 9—12 lines per page and 28 letters per line. Script—Malayālam No of Granthas—1900

Subject etc —Same as No 1173

Remarks—The verse commencing with 'गुरुवातपुरधीश' in the colophon contains certain variants

॥ नारायणीयम् ॥

1183 NĀRĀYAṆĪYAM

Substance—Palm leaf Size—14½″ 2⅛″ Leaves—35 13—16 lines per page and 62 letters per line Script—Grantha No of Granthas—1900 Complete

Subject etc —Same as No 1173

॥ नारायणीयम् ॥

1184 NĀRĀYAṆĪYAM

Substance—Palm leaf Size—9¾″ × 1⅝″ Leaves—94 9—11 lines per page and 30 letters per line Script—Malayalam No of Granthas—1900 Complete

Subject etc —Same as No 1173

Remarks—The closing Fol is missing

॥ नारायणीयम् ॥

1185 NĀRĀYAṆĪYAM

Substance—Palm leaf Size—7⅞″ × 1⅝″ Leaves—130 8—10 lines per page and 25 letters per line Script—Malayālam No of Granthas—1900 Complete

Subject etc —Same as No. 1173.

Remarks—The Ms is held fast by means of beautifully carved ivory plates After colophon occur the following few lines

रामेण लिखितमिदं पुस्तकत

കൂടമാണിക്കം ഇണ കൊല്ലം ൯൮൨ മതിൽമാണിക്കം കോര
ളൻ എഴുതിച്ച ഗ്രന്ഥം ശുഭമസ്തു

॥ नारायणीयम् ॥

1186 NĀRĀYAṆĪYAM

Substance—Palm leaf Size—5″ × 2″ Leaves—112 10—11 lines per page and 16 letters per line Script—Malayālam. No of Granthas—1175 Incomplete

Subject etc —Same as No 1173

Remarks—The Ms comprises 65 *Daśakas* only

॥ नारायणीयम् ॥

1187 NĀRĀYAṆĪYAM

Substance—Palm leaf Size—7″ × 1″ Leaves—78. 7 lines per page and 25 letters per line Script—Malayālam No of Granthas—850 Incomplete

Subject etc.—Same as No. 1173

Remarks—This Ms extends up to the 3rd verse in the 48th *Daśaka*

॥ नारायणीयम् ॥

1188 NĀRĀYAṆĪYAM

Substance—Palm leaf Size—$10\frac{1}{2}'' \times 1\frac{1}{2}''$ Leaves—42 7—8 lines per page and 36—40 letters per line Script—Malayālam No of Granthas—750 Incomplete

Subject etc.—Same as No 1173

Remarks—The Ms. extends up to the 2nd *śloka* in the 44th *Daśaka* The last Fol embodies a few verses of the 61st *Daśaka*

॥ नारायणीयम् ॥

1189. NĀRĀYAṆĪYAM.

Substance—Palm leaf Size—$6'' \times 1\frac{1}{2}''$ Leaves—66. 8 lines per page and 20—22 letters per line. Script—Malayālam. No. of Granthas—700. Incomplete

Subject etc.—Same as No. 1173.

Remarks—This Ms breaks off on the 5th verse in the 40th *Daśaka*.

॥ नारायणीयम् ॥

1190 NĀRĀYAṆĪYAM

Substance—Palm leaf Size—10½" 1½" Leaves—38 8 lines per page and 36 letters per line Script—Malayālam No of Granthas—625 Incomplete

Subject etc —Same as No 1173

Remarks—The Ms comprises 36 *Dasakas* only

॥ नारायणीयम् ॥

1191 NĀRĀYAṆĪYAM

Substance—Palm leaf Size—9" × 1½" Leaves—32 9—10 lines per page and 30 letters per line Script—Malayālam No of Granthas—575 Incomplete

Subject etc —Same as No 1173

Remarks—The Ms ends with the 4th stanza in the 32nd *Daśaka*

॥ नारायणीयम् ॥

1192. NĀRĀYAṆĪYAM

Substance—Palm leaf Size—7" × 1½" Leaves—17 11 lines per page and 24 letters per line,

Script—Malayālam No of Granthas—280. Incomplete

Subject etc —Same as No 1173

Remarks—The Ms commences with the latter hemistich of the 7th stanza in the 53rd *Daśaka* in *Uttarārdha* and concludes with the 72nd *Daśaka*

॥ नृत्ताष्टकम् ॥

1193 A NṚTTĀṢṬAKAM

Substance—Palm leaf Size—8″ × 2″ Leaf—1. 19 lines per page and 32 letters per line Script—Malayālam No of Granthas—20

Subject—Propitiation of Lord Paramesvara by means of dances

Beginning

हरिः

भवाभावहेतुं भव भक्तभूतिप्रदं भूतिदिग्ध भवानीशमेकम् ।
विभुं शम्भुमीशानमीश गणेशं प्रनृत्तेन नृत्तप्रिय प्रीणयामि ॥

त्रियाटोपचाटुप्रियं मत्तमत्तं जटाजूटकोटिप्रबद्धेन्दुखण्डम् ।
क्षपाटाटवीभेदिटङ्काङ्कितास्यं प्रनृत्तेन नृत्तप्रियं प्रीणयामि ॥

त्रयाणामरातिं पुराणां पुराण त्रय्यन्तवेद्यं त्रियामाचरारिम् ।
त्रिलोकीशमाशं त्रिशूलं त्रिनेत्रं प्रनृत्तेन नृत्तप्रियं प्रीणयामि ॥

End

नृत्ताष्टकं पठेन्नित्यं यः शृणोति सदा नरः ।
सर्वपापविनिर्मुक्तः शिवसायुज्यमाप्नुयात् ॥

कर्मणा मनसा वाचा यत् करोति शुभाशुभम् ।
तत् सर्वं तव पूजास्तु त्वन्नियोगं करोम्यहम् ॥
कर्मणा मनसा वाचा ये प्रपन्ना विनायकम् ।
ते तरन्ति महाघोरं भवसंसारसागरम् ॥

सकृज्जपित्वा स्तवराजमुत्तमं
तरत्यशेषं भवपाशबन्धनम् ।
विमुच्यते संसृतिसागरान्नरो
विभूतिमाप्नोति सुरैः सुदुर्लभाम् ॥

Colophon

Author

Remarks—This panegyric of Śiva is recited at the time of Nitta (dance)

॥ विनायकस्तवराजः ॥

1193 B VINĀYAKASTAVARĀJA

Substance—Palm leaf Size—8″ × 2″ Leaves—7. 10 lines per page and 32 letters per line. Script—Malayālam No of Granthas—16.

Subject—A panegyric of Vināyaka

Beginning

ब्रह्मा उवाच—
भगवञ्छ्रोतुमिच्छामि विस्तरेण यथातथम् ।
स्तवराजस्य माहात्म्यं स्वरूपञ्च विशेषतः ॥

श्रीनन्दिकेशर उवाच—
स्तवराजस्य माहात्म्य प्रवक्ष्यामि समासतः ।
यत्फलं लभते जप्त्वा स्वरूपञ्चापि यादृशम् ॥

यः प्रातरुत्थितो विद्वान् ब्राह्मे वापि मुहूर्तके ।
विषुवेऽयनकाले वा पुण्ये वा समयान्तरे ।
सर्वदा वा जपञ्जप्य स्तवराज स्तवोत्तमम ॥
यत्फल लभते मर्त्यस्तच्छृणुष्व चतुर्मुख ।
गङ्गाप्रवाहवत्तस्य वाग्विभूतिर्विजृम्भते ।
बृहस्पतिसमो बुद्ध्या पुरन्दरसमः श्रिया ॥
तेजसादित्यसङ्काशो मार्गेण समो नये ।
धनदेन समो दाने तथा निग्रहे ॥
धर्मराजसमो न्याये शिवभक्त्या मया समः ।

End

बहुनात्र किमुक्तेन स्तवराजमिम जपन् ।
सर्व तद्भद्रमाप्नोति यद्यदिच्छति शाश्वतम् ॥
स्तवानामप्यशेषाणां वरिष्ठोऽयं यतस्ततः ।
स्तवराज इति ख्यातस्तस्माल्लोकेषु चास्यति (?) ॥

श्रीनन्दिकेश्वर उवाच—

इत्थमेव स्तवः प्रोक्तः प्रथमं शम्भुना स्वयम् ।
तस्मादनेन स्तोत्रेण स्तवराजेन देव च ? ॥
स्तुतिंजप स्मृतिश्चैव कुर्वन्निर्वाणमेष्यति ।
एवं ते कथितं ब्रह्मन् यथावत् परिपृच्छतः ॥
विनायकस्य माहात्म्यं प्रतिष्ठार्चनयोर्विधिः ।
प्रशंसन् ब्रह्मगायत्र्याः कल्पस्तस्यास्तु शोभनः ॥
स्तवराजस्य माहात्म्य श्रुतं सर्वमशेषतः ।
वक्तुमर्हसि यद्ब्रह्मन् किं भूयः श्रोतुमिच्छसि ॥

Colophon

स्तवराजः समाप्तः ।

Author—Sambhu

Remarks—The work is composed in the form of a dialogue between Brahma and Nandikesvara It is styled Śivastavarāja in RCMPL

॥ योगेश्वरीस्तवः ॥

1193 C YOGEŚVARĪSTAVA

Substance—Palm leaf Size—8″ × 2″ Leaf—1 17 lines per page and 30 letters per line Script—Malayālam No of Granthas—17

Subject—Same as No 1155 E

Beginning

दिव्याकृति त्रिनेत्रामभिनवमिन्दूरभास्वराममलाम् ।
रक्ताकल्पविशेषां शिरसा योगेश्वरीं शिवां वन्दे ॥
प्रोद्यद्यौवनलीलां नानाभरणाभिरामहृद्याङ्गीम् ।
स्मरलुलितललितभावां हृल्लेखां विश्वरञ्जनीं वन्दे ॥
विस्रस्तकुन्तलान्तां पाशाङ्कुशधारिणीं परां शान्ताम् ।
बालेन्दुशेखरान्तां शक्तिं त्रैलोक्यमोहिनीं वन्दे ॥
पिण्डाश्रितां पदस्थां रूपवतीं दीप्तिमात्रमङ्गावाम् ।
मात्रातीताभासां देवीं निर्वाणगोचरीं वन्दे ॥

End

ब्राह्मीं ब्रह्माधिकृतां श्रीदेवीं श्रीविकारसंक्रान्ताम् ।
कीर्तिं कीर्तितचरितां त्वरितां त्वरितानुकारिणीं वन्दे ॥

प्रज्ञां प्रतिभानुगतां रतिं रतोद्यानसंगताभिरतिम् ।
प्रकृतिं प्रकृतोपकृतिं विकृतिं विकृतात्मसम्भवां वन्दे ॥
नानारसानुरक्तां नानाभावानुभावसम्भिन्नाम् ।
नानाविभवानुभवां नानान्यविनोदविश्रुतां वन्दे ॥
योगेश्वरीस्तवमिमं प्रणीतमीदृग्विनीतबहुमान्यम् ।
भक्त्याधीते योऽसौ लभते हितमात्मनोऽभीष्टम् ॥

Colophon

योगेश्वरीस्तव समाप्तः ।

Authoi

Remarks—The work is composed in *Ārya* metre

॥ मुकुन्दमाला ॥

1193 D MUKUNDAMĀLĀ

Substance—Palm leaf Size—8″ × 2″ Leaves—3
10 lines per page and 36 letters per line
Script—Malayalam No of Granthas—67.
Complete

Subject—Same as No 1153 B.

Beginning etc —Same as No 1172 A5.

॥ मातृकापुष्पमाला ॥

1193 E MĀTRKĀPUṢPAMĀLĀ.

Substance—Palm leaf Size—8″ × 2″ Leaves—7.
9—11 lines per page and 34 letters per line.

Script—Malayalam No of Granthas—150
Complete

Subject—Same as No 1155 E

Beginning etc —Same as No 1172 W

Remarks—The following *mantra* pertaining to *Aśvārūdha* is quoted at the close of the Ms

अश्वारूढामन्त्रम् ।

हरिः शक्ति ऋषिः । विराट्च्छन्दः । अश्वारूढा शक्तिर्देवता ।
उत्तुङ्गतुरगारूढा करोद्यत्पाशदण्डिनी ।
नारीलोकमशेषं मे वशमानय पार्वति ।

सकलसम्मोहन ऋषिः । गायत्रीच्छन्दः । सम्मोहनी महाशक्तिर्देवता ।

പട്ടുടുത്തപരഞൊതീവിട്ടുടുഞ്ഞുവിളയാടുകച്ചുവാ

आस्रंसत्क्षौमनीवीं निजभुजलतया धारयन्तीं ललामत् ?
प्रोद्यत्फालान्तरालां विलुलितचिकुरा क्रीडतीं कन्दुकेन ।
हेमाम्भोजाभिरामां स्मरमथनमनःक्षोभमापादयन्ती-
मायान्ती त्वामुपासे निजपदजुषतामिष्टदां विष्णुमायाम् ॥
पद्म्याः (?) ॥

ह्रीं मायामोहिनि महामाये मम शत्रुजनमनश्चक्षुस्तिरस्करणं कुरु कुरु स्वाहा ।

ग्रा सन्ध्या स्मरारि ..... ।

After colophon occur the following verses.

शम्भो शङ्कर शान्त शाश्वत शिव स्थाणो भवोमापते
भूतेश त्रिपुरान्तक त्रिणयन श्रीकण्ठ कालान्तक ।

श्रीविश्वनाथ करुणाकर शूलपाणे
  शम्भो गिरीश शिव शङ्कर चन्द्रमौले ।
श्रीनीलकण्ठ मदनान्तक विश्वमूर्ते
  गौरीपते मयि निधेहि कृपाकटाक्षम् ॥

॥ पद्मनाभशतकम् ॥

1194 PADMANĀBHAŚATAKAM

Substance—Palm leaf Size—7½″ × 1¼″ Leaves—22.
7 lines per page and 24—26 letters per line.
Script—Malayālam No of Granthas—250

Subject—Same as No 1172 D

Beginning

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

शुद्धस्वान्तस्वनिघ्नप्रविचलकरणग्रामयोगीन्द्रवृन्द-
  प्रोन्मीलन्मानसाब्जप्रकरपरमहाहंसमोंकारगम्यम् ।
स्यानन्दूरे निलीनं निरुपममधिकानन्दसंवित्स्वरूपं
  तत्तादृग् भाति तेजो विमलमुपनिषत्कन्दळीमूलकन्दम् ॥

शश्वद्विश्वं पुनीते पदतलरजसा भक्तलोको यदीयो
  भास्वान् भास्वानिवाशु प्रशमितनिखिलाज्ञानमोहान्धकारः ।
भ्रान्ताभ्रान्तं किमन्यस्तुतिनतिषु वृथा दीनलोकैकबन्धुं
  भूयोभूयस्तमेकं भुजगपरिवृढागारनाथं भजेम ॥

लब्ध्वा मर्त्यत्वमस्मिन् कथमपि भुवने नश्वरानीश्वरान् ये
  कामं काम्यार्थसिद्धैरहह बहुविधं मानुषाः संश्रयन्ते ।
नित्यानन्दाभिपूर्णं निजचरणजुषां मुक्तिद त्वामृते ते
  त्यक्त्वा पीयूषधारामजित परमहो भुञ्जते नालकौघम् ॥

End

आपृष्ट्वा त्वामथ दशरथं मातृदत्ताभ्यनुज्ञः
स्फारप्रेम्णा स्वमपि भरतो नेतुकामेन सार्द्धम् ।
शत्रुघ्नेन स्वपुरममुना संगतो मातुलेन
द्रष्टुं मातामहमति मुदा केकयान् संप्रतस्थे ॥

विश्वोत्कृष्टैर्निजगुणगणैरञ्जसा रञ्जयन्तं
पृथ्वीनाथं पितरमपि तद्धर्मदारानुदारान् ।
भूयोभूयः प्रकृतिमपि तां प्रत्यहं प्रार्थये त्वां
श्रीमत्काकोदरवरपुराधीश सम्मोदयन्तम् ॥

Colophon

Author—The author might have been a King of Travancore as suggested by the glorification of Śrī Padmanābha as his tutelary deity

Remarks—The work is not merely a *stuti* The story of Rāma is recounted herein in imitation of the Nārāyaṇīya It proceeds up to the close of Bālakāṇḍa Each *Daśaka* concludes with a laudatory verse on Śrī Padmanābha

---

॥ पद्मनाभस्तवः ॥

1195 A PADMANĀBHASTAVA

Substance—Palm leaf Size—$8\frac{1}{2}'' \times 1\frac{1}{2}''$ Leaves—16 6 lines per page and 32—40 letters per line Script—Malayālam No of Granthas—225,

Subject—Same as No. 1172 D,

Beginning

गणपतये नमः ।

अखिलभुवनमूलं वेदवेदान्तवेद्यं
विदितसकलवेद्यं विश्ववन्द्याङ्घ्रिपद्मम् ।
मुनिजनहृदयस्थं शेषसत्क्षेत्रवासं
स्मरत मरतकाभं सद्गुरुं पद्मनाभम् ॥

विनिमयनिहिताङ्घ्रिं वेणुवादप्रवीणं
मधुरसमधुराङ्गं वल्लवीपुण्यपूरम् ।
श्रुतिदयितमुदारं बर्हिबर्हावतंसं
स्मरत मरतकाभं सद्गुरुं पद्मनाभम् ॥

श्रुतिषु जगति गीता कर्तृतान्वेषणे सा
भगवति तु हरौ तत्कर्मता च प्रसिद्धा ।
झषवपुरुदधौ तद्व्यत्यय योऽकरोत्तं
स्मरत मरतकाभं सद्गुरुं पद्मनाभम् ॥

अहिनियमितमब्धौ मन्दराद्रिं सुधार्थं
गुरुगिरिभरखिन्ने मासुरे देवसङ्घे ।
अधृत कमठरूपी पृष्ठभागेन यस्तं
स्मरत मरतकाभं सद्गुरुं पद्मनाभम् ॥

End

विमलमतिविचिन्त्यं वेणुशङ्खारिहस्तं
विरचितशिखिपिञ्छं वीक्षणीयाखिलाङ्गम्
विनिमयधृतपाद विस्मृतात्मानुभावं
विवशसकललोकं वित्त मां पद्मनाभम् ॥

जननमरणदुःख सर्वमन्यच्च दुःखं
भयमपि सकल मे भिन्धि कृष्ण प्रसीद ।

त्वयि मम दृढभक्तिर्मोक्षमज्ञानदाह
विषयविषविरक्तिं चार्थये पद्मनाभ ॥

त्वमहमहमहो त्व नात्र सन्देहलेशो-
ऽप्यथ च जगदहं त्व चेति भेदभ्रमं मे ।
परिहर दुरितौघं भिन्धि भूयो नमस्ते
किमिह बहुभिरुक्तैः पाहि मां पद्मनाभ ॥

स्तुतिरिति रचितेय पद्मनाभप्रियासौ
पठति भजति यस्तां पद्मनाभैकचित्तः ।
स खलु निखिलदुःखैर्वर्जितः सज्जनाढ्य-
श्चरति चिरमिहान्ते पद्मनाभश्च भूयात् ॥

Colophon

मम गुरुमिह विद्त ब्रह्मपूर्वानुभूति
स्तुतिरपि रचितेयं तत्प्रमादान्न शक्त्या ।
गुरुवदपि च भक्त्या पद्मनाभेऽनुभूति-
ध्वनिरपि मम संज्ञा देवदेवेशपूर्वः ॥

Author—Devadeveśānubhūtiyati

Remarks—The colophon testifies that the author's preceptor was Brahmānubhūti In RCMPL. the author's name is mentioned as Īśānubhūtidevadevayati

---

॥ रामशतकम् ॥

1195 B RĀMAŚATAKAM

Substance—Palm leaf Size—$8\frac{1}{2}'' \times 1\frac{1}{4}''$ Leaves—11 6 lines per page and 32—40 letters per line. Script—Malayalam No of Granthas—150,

Subject—Same as No 1169 I

Beginning

गणपतये नमः ।

दशशतकरकुलतिलको दशशतनयनादिहितकृते यश्च ।
दशमुखवधकृतदीक्षो दशरथतनयश्च यः स रामोऽहम् ॥
कृत्वाश्वमेधमादावनन्तर तत्र पुत्रकामेष्टिम् ।
आत्मजमनन्तपुण्यैर्लेभे यं दशरथः स रामोऽहम् ॥
अग्न्युत्थपुरुषदत्तं पायसमादाय दशरथस्तत्र ।
अदिशत्कौसल्यायै तदर्थमस्य..स्तरामोऽहम् ॥
कैकेय्यै पुनरर्धं तस्या भरतस्तयोः सुमित्रायाः ।
तेऽर्धांशाभ्यां लक्ष्मणशत्रुघ्नौ यत्प्रियाः स रामोऽहम् ॥
अलभत कौसल्या यं प्राश्यैव पायस पर पुत्रम् ।
कैकेयी च सुमित्रा यस्यावरजांस्तथा स रामोऽहम् ॥

End

तस्मै भूयोऽपि नमो रामाय सलक्ष्मणाय भरताय ।
शत्रुघ्नाय च देव्यै सीतायै ब्रह्मणे स रामोऽहम् ॥
आर्या यः पठतीमास्तस्य स रामोऽहमिति मति दद्यात
बन्धानुबन्धहन्त्रीमप्रतिबन्धाश्च यः स रामोऽहम् ॥
श्रीरामशतकमेतद् ये सुचिरं भावयन्ति सन्तुष्टाः ।
तेषां स रामचन्द्रः प्रीतः परमेश्वरः प्रियं दद्यात् ॥
श्रीरामशतकमादौ विद्यार्थिभिरेतदेव पठितव्यम् ।
तर्हि तदभीष्टसिद्धिः स्यादेवानुग्रहात्तु रामस्य ॥
संससर्णमलङ्कनजङ्गाल घटपटाद्यभेदज्ञम् ।
पुरुषं पुरुषादारि पुरुषोत्तममलमियं स्तुतिः कुर्यात् ॥

Colophon

श्रीरामशतकमेतद्रचितं ब्रह्मानुभूतिशिष्येण ।
ईशानुभूतिशेखरि यस्य यन्नाम देवदेवेति ॥

श्रीरामराम रघुनन्दन रामराम
श्रीरामराम भरताग्रज रामराम ।
श्रीरामराम हनुमत्प्रिय रामराम
श्रीरामराम शरण भव रामराम ॥

श्रीरामाय नमः । श्रीलक्ष्मणाय नमः । श्रीहनूमते नमः । हरिः । नारायणाय नमः ।

Author—Remarks—Same as No 1195 A

॥ कृष्णशतकम् ॥

1195 C KRSNAŚATAKAM

Substance—Palm leaf Size—$8\frac{1}{2}'' \times 1\frac{1}{4}''$ Leaves—10
6 lines per page and 36 letters per line
Script—Malayalam No of Granthas—150.

Subject—Same as No 1172 A23

Beginning

कंसाद्यसुरध्वंसं विधातुमभ्यर्थितो विरिञ्चेन ।
देवक्यां वसुदेवादवतीर्णो यो हरिः स कृष्णोऽहम् ॥
यः पित्रोर्दर्शितवानादावेवात्मनो महद्रूपम् ।
शङ्खाद्यङ्कितमात्मस्मृतये ताभ्यां स्तुतः स कृष्णोऽहम् ॥
सिंहरवौ रोहिण्यां निशि जातो माधवस्तदा सर्वे ।
निद्राणाः कंसाद्या यन्मायामोहिताः स कृष्णोऽहम् ॥

या हि यशोदा गोपी स नन्दगोपश्च या तयोर्जा ।
कन्या सा यन्माया दुर्गादिपदोदिता स कृष्णोऽहम् ॥
रोहिण्युदरे सेयं देवक्युदराद्विकृष्य तद्गर्भम् ।
स्थापितवती सतां हृदि सदा स्थिता यद्गिरा स कृष्णोऽहम् ॥

End

आर्या यः पठतीमास्तस्य स कृष्णोऽहमिति मतिं दद्यात् ।
बन्धानुबन्धहन्त्रीमप्रतिबन्धा च यः स कृष्णोऽहम् ॥
श्रीकृष्णशतकमेतद्ये सुचिरं भावयन्ति संतुष्टाः ।
तेषां स नन्दसूनुः प्रीतः परमेश्वरः श्रियं दद्यात् ॥
श्रीकृष्णशतकमादौ विद्यार्थिभिरेतदेव पाठितव्यम् ।
तर्हि तदभीष्टसिद्धिः स्यादेवानुग्रहात्तु कृष्णस्य ॥
श्रीकृष्णशतकमेतद्रचितं ब्रह्मानुभूतिशिष्येण ।
ईशानुभूतिशेखरि यस्य यतेर्नाम देवदेवेति ॥
संसारार्णवलङ्घनजङ्घाल घटपटाद्यभेदज्ञम् ।
पुरुष पुरुषादारि पुरुषोत्तममस्मलामियं स्तुतिः कुर्यात् ।
श्रीकृष्णाय नमः । श्रीनारायणाय नमः ।

Colophon

Author—Same as No 1195 A

Remarks—The work is a brief résumé of the story of Lord Krsna It is also known as Krsnāhambhāvana

---

कृष्णस्तुतिः ॥

1195 D KRSNASTUTI

Substance—Palm leaf Size—$8\frac{1}{2} \times 1\frac{1}{4}''$ Leaf—1.
6 lines per page and 36 letters per line
Script — Malayalam No of Granthas—15

Subject—Same as No 1172 A23

Beginning

पिञ्छापीडं निरुपममुरलि कुण्डेपितुलिततापिञ्छम् ।
व्रजयुवतिदयितमयि रञ्जिन्तय चेतः सदैव सदैवम् ॥
आपह्लवमपि यत्पदपङ्कजभक्ता जना न जानन्ति ।
तं वल्लवीजनानां वल्लभमनिपिलवाङ्मयवलम्बे ॥
प्रणवप्रवण ध्येयं प्रणतार्तिहर पुराणपुरुष तम् ।
वीणावेणुविनोदप्रवीणमानन्दम श्रिये कृष्णम् ॥
क्वणितमनोज्ञवेणो कौस्तुभशोभितकण्ठ पिञ्छापीड ।
गोपीमण्डलमण्डन करुणायत्ताम्बुदाभ कृष्ण नमस्ते ॥

End

सुन्दरमनीव देवैर्मन्दारद्यानतैः स्तवैश्चेष्टम् ।
मन्दिरमपीन्दिरायाः मन्दरधरमाश्रये हरिं कृष्णम् ॥
मुरमुखसकलासुरकुलशकलीकरणोद्यत परं ब्रह्म ।
वेदान्तवेद्यमाद्यं पुरुषोत्तममाश्रये सदा कृष्णम् ॥
गोवर्धनधरमधरं पिबन्तमत्यन्तनिर्मलं गोप्याः ।
रासोत्सवप्रवृत्त कालियदमन नमामि कृष्णमहम् ॥
मरतकमुकुरकपोलं तद्बिम्बितमकरकुण्डलाभोगम् ।
अखिलप्रपञ्चकन्द कुन्दस्मितमाश्रये मुकुन्दमहम् ॥

सर्वेश्वरं समार्यं गर्वज्ञं सर्वगोविन्दजमाद्यम् ।
प्राणं परमात्मानं प्रज्ञात्मानं नमामि कृष्णमहम् ॥

Colophon

श्रीकृष्णाय नमः । हरिः ।

Author

Remarks—The work is composed in Ārya metre

॥ वासुदेवशतकम् ॥

1195 E VĀSUDEVASATAKAM

Substance—Palm leaf Size—8¼" 1¼" Leaves—19
6 lines per page and 32—40 letters per line
Script—Malayālam No of Granthas—250

Subject—Same as No 1172 A23

Beginning

गणपतये नमः ।

अजनि स धृतराष्ट्रो व्यासतः सोऽपि पाण्डु-
विंदुर इह यदीयज्ञानशक्त्येकधाम्नः ।
कृतिहृतजगदान्ध्यव्यासरूपेण तिष्ठन्
जगति सुगतिदाता वासुदेवोऽस्मि सोऽहम् ॥

मुनिमनुयुजि कुन्त्यां धर्मजोऽभूच्च पाण्डो-
र्ब(क)रिपुरपि पार्थस्तौ यमौ चाथ माद्र्याम् ।
यममरुदमराधीशाश्विजाताः क्रमात्ते
जगति खलु यदिष्टा वासुदेवोऽस्मि सोऽहम् ॥

पितरि च सह माता द्वारि नैव तु कृष्णः
ममभिभ्पुरमद्रेस्त। गोगशु नीताः ।
यदतिकरुणयापुद्रोणशारङ्नान्या
झटिति निखिलनिया वासुदेवोऽस्मि सोऽहम् ॥

End

चरितमपि यदीयं पानशाल्मयस्हैः
क्वणनमपि च वेणोर्गोपकन्याव्रतादि ।
द्विजजनदयितेष्टं नन्दमोक्षो जलाङ्-
गिरिधृतिसुरभङ्गौ वासुदेवोऽस्मि सोऽहम् ॥
सुरपतिसुरभिभ्यां चाभिषेको विनोदः
सह युवतिभिरार्तिः केशिनः कमनाशः ।
प्रियकृतिरपि पित्रेरुग्रसेने च राज्य
स्वयमवनमवन्या वासुदेवोऽस्मि सोऽहम् ।
गुरुमृतसुतदान मागधेनापि युद्धं
यवननिधनमब्धौ द्वारकासिर्विवाहः ।
मिषति नृपसमूहे तत्र भैष्म्याहृतिस्मा
मणिसुरतरुयोगो वासुदेवोऽस्मि सोऽहम् ॥

Author

Remarks—The work is a brief résumé of the Mahābhārata

॥ कृष्णस्तवः ॥

1195 F KRSNASTAVA

Substance—Palm leaf. Size—$8\frac{1}{2}'' \times 1\frac{1}{4}''$. Leaf—1.

6 lines per page and 32—40 letters per line Script—Malayalam No of Granthas—25

Subject—Same as No 1172 A23

Beginning

गणपतये नमः ।

श्रीधर केशव माधव मधुसूदन [illegible] [illegible] [illegible] ।
दामोदराब्जनाभ श्रीनारायण हृषीकेश [illegible] ॥
गोविन्दाच्युतशौरे मुकुन्द [illegible] [illegible] मुरारे ।
श्रीनन्दगोपसूनो कंसारे [illegible] देव नमस्ते ॥
कृष्णार्जुनसूत हरे वैकुण्ठ नृसिंह [illegible] नमस्कार[illegible] ।
गोवर्धनधर गोपीजनवल्लभ भक्तवत्सलाज नमस्ते ॥
कालियदमन जनार्दन पुरुषोत्तम विष्टरश्रवः श्रीरमण ।
शार्ङ्गिन् दैत्याराते पीताम्बर यदुपते वृषघ्न नमस्ते ॥
विश्वम्भर वनमालिन् गोपाल गदाधरोत्तमश्लोकद्यः(?)
श्रीवत्साङ्क बलानुज गदाग्रजेन्द्रानुजार्जुनेष्ट नमस्ते ॥

End

क्वाणितमनोज्ञवेणो कौस्तुभमंशोभिकण्ठ पिञ्छापीड ।
गोपीमण्डलमण्डन कलायकालाम्बुदाभ कृष्ण नमस्ते ।
चैतन्यैकरसाद्वय सत्य विभो नित्यशुद्ध बुद्धविमुक्त ।
परमानन्द परात्मन् गुरो हरे कृष्ण कृष्ण नमस्ते ॥
श्रीकृष्णाय नमः । श्रीरामाय नमः । हरिः ।

Colophon

Author

Remarks—Same as No 1195 D

॥ रामस्तुतिः ॥

1195 G RĀMASTUTI

Substance—Palm leaf Size—$8\frac{1}{2}' \times 1\frac{1}{2}''$ Leaves—6
7 lines per page and 36 letters per line
Script—Malayalam No of Granthas—100

Subject—Same as No 1169 I

Beginning

ब्रह्मवंशस्तुतं सूर्यवंशे रतं
नोदितं चाध्वरैर्ऋश्यशृङ्गादिभिः ।
दाशरथ्याख्यया सर्वतो विश्रुतं
रामचन्द्रं हरिं नौमि नारायणम् ॥

कोसलेन्द्रात्मजानेत्रताराधिपं
लक्ष्मणाद्यग्रजं सज्जनेष्टप्रदम् ।
कौशिकेन स्वयं याचितं कर्मणे
रामचन्द्रं हरिं नौमि नारायणम् ॥

End

यद्यशस्तस्मभवद् दक्षिणाद्रौ स्थितौ
राक्षसेन्द्रो हिमाद्रौ हनुमांश्च सः ।
दीर्घमायुस्तयोर्दत्तवान् यश्च तं
रामचन्द्रं ... ...णम् ॥

स्वस्वरूपं यथावद् विजानन्निह
ब्रह्म नित्यं ध्रुवं शुद्धमित्येव सः ।
तन्मयोऽभूत् तमेवेश्वरं सर्वदा
रामचन्द्रं ... ...णम् ॥

Colophon.

Author

Remarks—The work is a compendium of the Rāmāyana

॥ कृष्णस्तुतिः ॥

1195 H KRSNASTUTI

Substance—Palm leaf Size—$8\frac{1}{2}'' \times 1\frac{1}{2}$ Leaves—3½
6 lines per page and 36 letters per line
Script—Malayālam No of Granthas—50.

Subject—Same as No 1169 I

Beginning.

श्रीगणपतये नमः ।

बर्हापीड मुरलिं श्रीवत्स कौस्तुभञ्च वनमालाम् ।
धनुरसिगदारिशङ्खान् कृष्ण च स्मरत मरतकश्यामम् ॥
पीतांशुकं किरीटं कुशेशयं मकरकुण्डलं शृङ्गम् ।
पाश यष्टिं वीणां कृष्णं च स्मरत मरतकश्यामम् ॥

End

ब्रह्मैवायं कृष्णस्तत्स्मरणादेव परमपुरुषार्थः ।
इति वाद साधूनां कृष्ण च स्मरत मरतकश्यामम् ॥
गुरुशुश्रूषादि सदा प्राणायामादि तीर्थयात्रादि ।
कृष्णपरत्वायेति च कृष्णञ्च स्मरत मरतकश्यामम् ॥
तारे विविच्यमाने तत्र विभात्यधिकमेव गोविन्द ।
अहहेत्यनर्थहानिं कृष्णञ्च स्मरत मरतकश्यामम् ॥

यः पठति स्तोत्रमिदं प्रमादगात्रं भवेत् स कृष्णस्य ।
तस्मिन् सति किमलभ्यं मोक्षार्थश्चैतदेव पठनीयम् ॥

Colophon

Author .

Remarks—Same as No 1156 C

॥ कृष्णस्तोत्रम् ॥

1195 I KRSNASTOTRAM

Substance—Palm leaf Size—8½" × 1¼" Leaves—14 6 lines per page and 32—40 letters per line. Script—Malayalam No of Granthas—200

Subject—Same as No 1169 I

Beginning

गणपतये नमः ।

ब्रह्मदेवस्तुतं सोमवंशे रतं वासुदेवं प्रभुं देवकीनन्दनम् ।
चण्डिकासोदर त यशोदाशिशुं नन्दसूनुं हरि नौमि नारायणम् ॥
यादवं घोषगं रौहिणेयानुजं पूतनानस्तृणावर्तनाशे रतम् ।
कृष्णरामादिनामामृतं बिभ्रतं नन्दसूनुं हरि नौमि नारायणम् ॥
दर्शयन्त जगन्मातुरास्ये शिशुं स्वाम्बयोलूखले बद्धमाकृष्य तम् ।
यातमत्रान्तरे वृक्षयोर्भञ्जकं नन्दसूनु हरि नौमि नारायणम् ॥
वत्सचोराजमोहप्रद वत्सपं मोचिताघासुर वेणुवादे रतम् ।
कालियक्षेपकं वह्निपानोद्यत नन्दसूनु हरिं नौमि नारायणम् ॥

लोकमेवाखिलं हर्षयन्त मुहुर्वेणुना घोषकन्याव्रतेऽभीष्टदम् ।
ब्राह्मणीष्टप्रद नन्दमोक्षप्रदं नन्दसूनुं हरि नौमि नारायणम् ॥

End

यस्सदानन्द इत्युच्यते कर्षको योऽघजातस्य यश्चातकी स-
[न्निभः ।
कृष्णशब्दोदितः स्मर्यते दिक्षु तं नन्दसूनुं हरि नौमि नारायणम् ॥
योऽखिल लोकमालोक्य पापे रतं तन्निरामाय कल्की भविष्यन्
[खलु ॥
सर्वसेव्यः स यस्यावतारश्च तं नन्दसूनु हरिं नौमि नारायणम् ॥
योऽतिमोहाय वै विद्विषां कीकटेष्वाविरासीज्जिनात्संप्रवृत्ते कलौ ।
बुद्धनामानमेनं मनोज्ञं मुनिं नन्दसूनुं हरिं नौमि नारायणम् ॥
नक्रवक्त्रं विदार्याशु चक्रेण यस्तद्गृहीतं गजेन्द्रं ततोऽ-
[मोचयत् ।
त खगेन्द्रस्थितं भक्तलोकेष्टद नन्दसूनुं हरि नौमि नारायणम् ॥
अच्युतं श्रीधर राघवं माधवं केशवं यादवं शार्ङ्गिण वामनम् ।
ईश्वर घोषगं गोपति श्रीपति नन्दसूनु हरिं नौमि नारायणम् ॥
कृष्णसङ्कीर्तनं यः पठेद् भक्तितस्तन्निमग्नान्तरात्मान्वहं शुद्धधीः ।
तत्तदिष्टं स लब्ध्वेश्वरानुग्रहाद् याति चान्ते परं धाम तद्वैष्णवम् ॥

Colophon

Author

Remarks — The work is a compendium of the Bhāgavata

॥ विष्णुगद्यम् ॥

1195 J VISNUGADYAM

Substance—Palm leaf Size—8½" × 1¼" Leaves—13 6 lines per page and 32—40 letters per line Script—Malayālam No of Granthas—175

Subject—Same as No 1171 A

Beginning

गणपतये नमः। गुरुवो मां रक्षन्तु ।

क्षन्तुमर्हति गणेश्वरः। वरप्रदानां पूजानमस्कारध्यानप्रसन्नानां गुरूणां चरणनळिनयुगळं नमामः। मामवतु पूजानमस्कारध्यानप्रसन्नो गणेश्वरः। वरणीयः सद्भिरौपनिषदः पुरुषः पुरुषोत्तमोऽहम्। मोहभञ्जकाः सन्तु मे पूजानमस्कारध्यानप्रसन्नाः सर्वेऽपि भगवन्तो हरिहरादयः।

दयालो जय, जय, कृष्ण वासुदेव, देवकीनन्दन, नन्दनोद्यानादिसमुत्थसुमनस्समूहसमारचितसुमनोजनिर्मलमालासमुज्ज्वल . . . .

End

तारमहावाक्यगुरुप्रसादादिगम्यश्रीगुरुरूपशिवाद्यात्मकौपनिषदपुरुष श्रीपुरुषोत्तम श्रीमहाविष्णो भगवन्मां संसारसमुद्रात्समुद्धर समुद्धर मम प्रसीद प्रसीद नमस्ते नमस्ते नमस्ते नमस्ते। हरिः। श्रीकृष्णाय नमः।

Colophon

ईश्वरेण लिखितमिदं पुस्तकम्। हरिः नारायणाय श्रीकृष्णाय नमः। हरिः। हरिः।

Author

Remarks—The work is in prose

॥ पद्मनाभाष्टकम् ॥

1195 K PADMANĀBHĀSTAKAM

Substance—Palm leaf Size—8½" × 1¼" Leaf—1
7 lines per page and 42 letters per line.
Script—Malayālam No of Granthas—15

Subject etc—Same as No 1172 D

Colophon .

Author .

Remarks—The closing lines of all verses herein are identical At the close of the Ms occur the following verses .

आताम्रपाणिकमलप्रणयिप्रतोद-
मालोलहारमणिकुण्डलहेमसूत्रम् ।
आविःश्रमाम्बुकणमम्बुदनीलमव्या-
दाद्य धनञ्जयरथाभरणं महो वः ॥

उद्भिन्नघर्मजलबिन्दुलसल्ललाट-
लोलद्घनालकनिषाङ्गितुरङ्गरेणु ।
पायात् पलायितसुयोधनमानभङ्ग-
जातस्मितं वदनमर्जुनसारथेर्वः ॥

रणरङ्गरजःपुञ्जपिञ्जरीकृतमाननम् ।
आविःश्रमाम्बु वः पायादपायात् पार्थसारथेः ॥

भजे विजयसारथेः श्लथशिखण्डलोलालकं
कपोलमणिदर्पणस्फुरितचारुचन्द्राम्बुकम् ।
वृकोदरमहोदरप्रतिरथिग्रहारेक्षण-
क्षणाकुलविलोचनं नयनहारि वक्त्राम्बुजम् ॥



॥ प्रतिक्रियाशूलिनीस्तवः ॥

1196 PRATIKRIYĀŚŪLINĪSTAVA

Substance—Palm leaf Size—8′ × 1½″ Leaves—5
9 lines per page and 24 letters per line
Script—Grantha No of Granthas—65.

Subject—Same as No 1147 H

Beginning

श्रीदेव्युवाच—

श्रीमत्सकलसूक्ष्मैकबोधकेश जगत्पते ।
प्रतिक्रियास्तोत्रमन्त्रं प्रवदस्व दयानिधे ॥

शिव उवाच—

शृणु देवि प्रवक्ष्यामि गुह्याद् गुह्यमनुत्तमम् ।
प्रतिक्रियाशूलिनीयं स्तोत्रं मन्त्रमभीष्टदम् ॥
सर्वमृत्युप्रशमनं सर्वोपाधिविमोचनम् ।
सर्वसौख्यकरं श्रेष्ठ सर्वकल्याणवर्धनम् ॥
अनादिभिरनन्तैर्यत् प्रेरितं बलवत्तरैः ।
तेन तेन प्रकारेण तत्तद्दर्पविनाशनम् ॥
धर्मार्थकाममोक्षैकसिद्धिदं सौख्यवृद्धिदम् ।
रक्षाकरमशेषाणां सकलालम्यमोचनम् ॥

End

प्रतिक्रियास्तोत्रमिद रहस्यं
पठेद् द्विसन्ध्यं प्रतिवासरं यः ।
अवाप्य कामान् सकलान् मनीषी
निजावृतौ मुक्तिमुपैति नित्यम् ॥

इति श्रीशिवायाः प्रसादानुभूति-
प्रदाशेषसूक्ष्मप्रयोगप्रभावम् ।
समस्तप्रकारैः श्रुतं सम्यगुक्त
पुनः श्रोतुमिच्छस्युमे किं रहस्यम् ॥

Colophon

इत्याकाशभैरवकल्पे प्रत्यक्षसिद्धिप्रदे उमामहेश्वरसवादे शङ्करेण विरचिते शूलिनीप्रतिक्रियास्तोत्रं नाम द्वाविंशोऽध्यायः ।

Author—Śankaıa

Remarks—The work ıs composed ın the form of a dıalogue between Pārvatī and Parameśvara The theme ıs borrowed from *Ākāśabhaıravakalpa* The subjoined portion occurs ın the wake of the colophon

मूले पद्मासन(स्थितां?स्थां) सकलसुरगणैर्वन्द्यमानाश्च बाला-
मुद्गच्छन्तीं सुषुम्ना मुखचरणपरां सार्कसोमप्रभां ताम् ।
पीयूषाम्बुप्रवाहैर्मनुमयमनिशं स्रावयन्ती निजाङ्गं
ध्यायन्मुच्येत वैरूप्यकदुरितविषक्षोभदारिद्र्यरोगैः ॥

उद्यद्राकाशशाङ्कान्तरपरिविलसत्पद्मसंस्थां त्रिणेत्रां
दोर्भिः पाशेक्षुचापाङ्कुशकुसुमशरान् बिभ्रतीमिन्दुचूडाम् ।

गौरि गौराङ्गरागां वररुचिरतनुं चिन्तयन् मन्त्रमेनं
जप्यात् कान्त्यै समृद्ध्यै सुविपुलयशसे लोकसंरञ्जनाय ॥
स्वाहा ज्वल ज्वल शूलिनीहुम् फट् । प्रतिक्रिया ।

॥ भक्तप्रिया (नारायणीयव्याख्या) ॥

1197 BHAKTAPRIYĀ

Commentaıy on the Nārāyanīya

Substance—Palm leaf Sıze—$14\frac{1}{2}''\times''1\frac{3}{4}$ Leaves—121 10 lınes peı page and 60 letters per lıne Scrıpt—Malayālam No of Granthas—4500 Complete

Subȷect—Saıne as No 1173

Author—Deśamangalavārya

Remarks—The Ms has been publıshed as No 18 ın TSS A few leaves ın the mıddle are shorter ın length The prınted edıtıon ıs based on thıs codex

---

॥ भक्तप्रिया (नारायणीयव्याख्या) ॥

1198 BHAKTAPRIYĀ

Commentary on the Nārāyanīya.

Substance—Palm leaf Sıze—$9\frac{1}{2}''\times 1\frac{3}{4}''$ Leaves—47 10 lınes per page and 28 letters per lıne, Scrıpt

—Malayālam. No of Granthas—822. Incomplete.

Subject etc —Same as No 1197

Remarks — The commentary commences on the 2nd verse of the 2nd *Daśaka* and ends on the opening verse of the 11th The first 14 leaves are missing For further information see No. 1197.

॥ भक्तप्रिया (नारायणीयव्याख्या) ॥

1199 BHAKTAPRIYĀ

Commentary on the Nārāyaṇīya

Substance—Palm leaf Size—9½″ × 1½″ Leaves—34 10 lines per page and 32 letters per line. Script—Malayālam No of Granthas—680 Incomplete.

Subject—Same as No 1173

Author—Same as No 1197

Remarks—The work commences on the 3rd *śloka* of the 94th *Daśaka* and terminates on the 4th *śloka* of the 98th

---

॥ भक्तिमुक्ताफलम् ॥

1200. BHAKTIMUKTĀPHALAM.

Substance—Palm leaf Size—10¾″×1¾″ Leaves—70. 8 lines per page and 32—36 letters per line,

Script—Malayalam No of Granthas—1250. Complete

Subject—Same as No 1150

Beginning

(विष्णुं) पञ्चात्मकं वन्दे भक्त्याष्टादशभेदया ।
साङ्गवर्गोनविंशत्या भक्तैर्नवभिराश्रितम् ॥
विष्णुप्रीत्यै चतुर्वर्गचिन्ताम(णि?ण्या)मजीगणत् ।
भेदान् व्रतानां दानानां तीर्थानां मोक्षवर्त्मनाम् ॥
मूर्तिप्रसादपूजानां हेमाद्रिर्गणकाग्रणीः ।
विष्णुभक्त्यङ्गभूतानां गणयत्युक्तसारधीः ॥
मुक्ताफलेन ग्रन्थेन सद्भागवतशुक्तिना ।
भक्तिस्वात्यम्बुना मुग्धमार्कण्डेयशिशुश्रिया ॥

मुक्ताफलं सुखचितः स्फुटभक्तिभेदं
प्रत्यक्षराजितलसत्पदपद्मरागम् ।
हेमाद्रिसंभवसुवर्णनिवेशरम्यं
कण्ठे कुरुध्वमवरुद्धमपूर्वलक्ष्मीम् ॥

तत्रादौ विष्णुप्रकरणं तत्र विष्णोर्लक्षणं भेदाश्च ।
अहमेवासमेवाग्रे नान्यद्यत् सदसत् परम् ।
पश्चादहं यदेतच्च योऽवशिष्यत सोऽस्म्यहम् ।
स द्वेधा निराकरः साकारश्च ॥

End

शुकः

उद्गायतीनामरविन्दलोचनं
व्रजाङ्गनानां दिवमस्पृशद् ध्वनिः ।

दध्नश्च निर्मन्थनशब्दमिश्रितो
निरस्यते येन दिशाममङ्गलम् ॥

प्रह्लादः

स्वस्त्यस्तु विश्वस्य खलः प्रसीदतां
ध्यायन्तु भूतानि शिवं मिथः श्रिया ।
मनश्च भद्रं भजतामधोक्षजे
ह्यावेश्यतां नो मतिरप्यहैतुकी ॥

Colophon

चतुरेण चतुर्वर्गचिन्तामणिवणिज्यया ।
हेमाद्रिणार्जित मुक्ताफलं पश्यत कौतुकात् ॥

निर्मथ्य पयसां राशिं मन्दरः कौस्तुभं व्यधात् ।
हेमाद्रिर्वचसा मुक्ताफलं रत्नं हृदि प्रभोः ॥

हेमाद्रिमाद्रियत एव गुणेन येन
तेनैव पूरितसुखेन सुनद्धमेतत् ।
मुक्ताफल प्रतिफलं जगदीशरूप
यत्कर्णकण्ठहृदये सुषमास्य काचित् ॥

द्वे एव चित्रे रामस्य सिन्धुर्बद्धः पुराधुना ।
हेमाद्रिः स्वमुपानीतः सूर्यावृत्तः प्रदाक्षिणः ॥

विद्वद्धनेशशिष्येण भिषक्केशवसूनुना ।
हेमाद्रिर्वोप्पदेवेन मुक्ताफलमचीकरत् ॥

स्वर्गे गीर्वाणनार्यः सुरपतिमभितः शाब्दिकानां वरेण्यं
पाताले नागराजं फणिपतिसुदृशो यस्य गायन्ति कीर्तिम् ।
यस्तीर्णः शास्त्रपाथोनिधिमखिलमदो ग्रन्थरत्नं सुवृत्तं
चक्रे शिष्यो धनेशः कविकुलतिलकः केशविर्वोप्पदेवः ॥

इति विबुधचक्रचूडामणिश्रीमदाचार्यवोप्पदेवविरचितं भक्तिमुक्ताफलं समाप्तम् ॥

श्रीकृष्णाय नमः ।
नमस्ते पद्मपत्राक्षि नमस्ते हरिवल्लभे ।
नमो नमस्त्रिलोकेशि पद्मनाभप्रिये शुभे ॥

Author—Voppadeva, son of Kesava

Remarks—The author extols Hemādri in the course of the work Hemādri was the minister of Rāmarāja at whose command Vopadeva composed this work The author is also credited with the commentary, Kaivalyadīpikā For further information see No 5807 DCSM Vol 12 wherein the work is designated *Sadbhāgavatasūktimuktāphalam*

॥ भक्तिमुक्ताफलम् ॥

1201 BHAKTIMUKTĀPHALAM.

Substance—Palm leaf Size—14½" × 2" Leaves—31. 11 lines per page and 60 letters per line Script—Malayālam No of Granthas—1250

Subject—Same as No 1150.

Beginning etc —Same as No 1200

Remarks — The leaves are somewhat decayed. The last Fol is partly torn

---

॥ भक्तिसंवर्धनशतकम् ॥

1202 BHAKTISAMVARDHANAŚATAKAM

Substance—Palm leaf Size—5" 1⅜" Leaves—31
9 lines per page and 15 letters per line
Script—Malayāḷam No of Granthas—225

Subject—A devotional panegyric of Viṣṇu.

Beginning:

हरिः । श्रीगणपतये नमः ।

जातं जातं खलु जगदहो चित्रमेतत् समस्तं
क्षीणं क्षीणं मुहुरपि परं दृश्यते यत्प्रभावात् ।
तस्मै साक्षात् स्वरसपरमानन्दवीचीमयाय
ब्रह्माख्याय त्रिभुवनपते देव तुभ्यं नमोऽस्तु ॥

जीवात्मा यद् भ्रमति बहुशोऽप्यत्र संसारचक्रे
तत् त्वन्मायाविलसितमतः प्राञ्जलिः प्रार्थयेऽहम् ।
मा नामाहं जनुषि भगवन् जन्म सम्पत्स्यते चेत्
कर्माभ्यर्हं भवतु भुवनाधीश मानुष्यमेव ॥

चातुर्वर्ण्यप्रभृतिविभिदामुद्रिते मानुषत्वे
ब्राह्मण्याय स्पृहयति जगन्नाथ नित्यं जनोऽयम् ।
तत्राकुर्वन्नघमुत शुभं कर्म कुर्वन्नकामं
भक्तो भूयाद्भवति भगवन्मार्गयन्मुक्तिमार्गम् ।

End.

सत्यं ज्ञानं मुहुरपि महायोगिभिश्चिन्त्यमानं
पूर्णानन्दामृतलहरिकाजालमाद्यं तुरीयम् ।

ओङ्कारार्थं परममसृतं वाग्निषेधावगोत्रं
ब्रह्माद्वैतं परमपुरुष स्वात्मबोधं स्मरामि ॥

स्तोत्रं विष्णोरिति मृदुपदैः सुप्रसन्नैः शतेन
श्लोकैरेभिर्विरचितपदं भक्तिसंवर्धनाख्यम् ।
भक्त्या युक्तः पठति खलु यः प्रातरुत्थाय नित्यं
प्राणापाये व्रजति स हरेर्धाम निर्वाणधाम ॥

Colophon

इति भक्तिसंवर्धनशतके द्वितीयः परिच्छेदः ।

श्रीमद्रामानुजाय परमाचार्याय नमः । श्रीपद्मना-
भाय नमः । श्रीम(न्मृत्य?)वासिन्यै श्रीभद्रकाल्यै नमः ।
श्रीमच्छ्रीरत्नमूर्णिनिलयाय परमिपग्वर्याय परमाचार्याय नमः ।
शुभं भवतु ।

Author—Brahmadatta, disciple of Rāma

Remarks—The following stanza,

"भक्तिसंवर्धनं नाम श्लोकानां शतकं मया ।
ब्रह्मदत्ताभिधानेन स्तोत्रं विष्णोर्विनिर्मितम् ॥"

occurring in transcript No 601, COL denotes that Brahmadatta was the author's name.

॥ भगवन्नामकौमुदी ॥

1203 BHAGAVANNĀMAKAUMUDĪ

Substance—Palm leaf Size—6″ × 2″. Leaves—94
10—12 lines per page and 18—22 letters per

line Script—Malayālam No. of Granthas—1250 Complete

Subject—Glorification of the names of God

Beginning

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

अंहस्संहरदखिलं सकृदुदयादेव सकललोकस्य ।
तरणिरिव तिमिरजलधिं जयति जगन्मङ्गलं हरेर्नाम ॥

कारुण्यामृतनिर्झरः सुरसरिज्जन्माकरः श्रीवधू-
लीलाब्जं व्रजकामिनीकुचतटीकस्तूरिकास्थासकम् ।
उत्तंसः श्रुतियोषितां मुनिमनोवश्यौषधीपल्लवो
यस्याङ्घ्रिः सुरवल्लभः स जयति श्रीपुण्डरीकप्रियः ॥

कररुहकुलिशैर्द्विषतां चरणाम्बुजनखरकान्तिभिर्भजताम् ।
हृदयग्रन्थिं भिन्दन् मनसि नृसिंहः समुल्लसतु ॥
यदङ्घ्रिरेणुबीजानि जनैरुप्तानि मूर्धसु ।
सद्यः सुरद्रुमायन्ते श्रीधरः स श्रियेऽस्तु नः ॥
उल्लसति लोचनाग्नौ जगदपदानानि जुह्वतो यस्य ।
प्रथमाहुतिर्मनोजः स जयति देवः पुरां भेत्ता ॥

यत्पादपद्मनखकान्तितरङ्गजैर्ये-
ज्जम्बालजाङ्घिकधियां न धियामभूमिः ।
निस्सीमसौख्यजलधिर्जयतादनन्तः
सोऽस्मद्गुरुर्जगदनुग्रहजागरूकः ॥

अपि च—

अधीशं निःस्वानां समभसितपिष्टं प्रवयसा-
मशेषाणामाद्यं गुणगरिमनिर्मुक्तमपि यम् ।

मुधा मानादूरं श्रुतिरुपचरन्ती सविनयं
शनैर्यत्नादन्तर्नयति सुभगानां परिवृढम् ॥
चेतश्चकोरसन्तोषपीयूषाम्बुधिवृद्धये ।
इयं विस्तार्यते श्रीमद्भगवन्नामकौमुदी ॥

अत्र श्रीभगवन्नाममाहात्म्यप्रतिपादकानि पुराणवचनान्युदाहृत्य विचार्यन्ते ।

End

नाथाय किञ्चिदपनीय न किञ्चिदत्र
स्वात्मैव येन सुखसिन्धुरगाधबोधः ।
आविष्कृतः करुणया करवै किमस्य
तन्नाम्नि मग्नमिदमेव मनोऽस्तु पूजा ॥

झटिति जगतामंहस्तूलीलिहन्दहनो महान्
दहरकुहरध्वान्तध्वंसं नयन्नभसो मणिः ।
किरणलहरीचान्द्रीचेतश्चकोरचमत्कृति-
र्भवतु भवतां नामज्योतिर्मुदे मदनद्रुहः ॥

Colophon

इति श्रीमदनन्तानन्दरघुनाथपरमहंसपरिव्राजकाचार्यपादपद्मोपजीविनः श्रीमन्नृसिंहसूनोर्लक्ष्मीधरस्य कृतौ श्रीभगवन्नामकौमुद्यां नामकीर्तनस्य पुरुषार्थसाधन नाम तृतीयः परिच्छेदः ।

समाप्ता चेयं नामकौमुदी ॥

Author—Laksmīdhara, son of Śrī Nısımha Refer to No 91, Vol I, DCSMMPL

Remarks — The following few verses eulogising Lord Kṛṣna are cited after the colophon;

कृष्ण कृष्ण दयालुस्त्वमगतीनां गतिर्भवान् ।
ससारार्णवमग्नानां प्रसीद मधुसूदन ॥
आर्तो मत्सदृशो नान्यस्त्वत्तो नान्यः कृपाकरः ।
तुल्य एवावयोर्योगः कथं नाथ न पासि माम् ॥
जरामरणनिर्विण्णमानसेन मया हरे ।
स्मर्यसे पुण्डरीकाक्ष रक्ष मां शरणं गतम् ॥
को गुणैरधिकस्त्वत्तस्त्वत्तः को निर्गुणाधिकः ।
इति नाथ नुमस्त्वां कि किञ्चिन्दामो न मन्महे ॥
यत्र यत्राभिजायन्ते जन्मदुःखाकुले कुले ।
तत्र तत्राक्षयं मेऽस्तु माधवाराधनं धनम् ॥
अभिधावति मां मृत्युरयमुद्गूर्णमुद्गरः ।
कृपण पुण्डरीकाक्ष रक्ष मां शरणं गतम् ॥
गच्छतस्तिष्ठतो वापि जाग्रतः स्वपतोऽथवा ।
मा भून्मनः कदाचिन्मे त्वया विरहितं हरे ॥
स्वकर्मफलनिर्दिष्टां यां यां योनिं व्रजाम्यहम् ।
तस्यां तस्यां हृषीकेश त्वयिभक्तिर्दृढास्तु मे ॥
वैराग्यं देहि मे तीव्रं भगवन्मधुसूदन ।
येन स्यां सर्वतः खिन्नः सर्वसभोगनिःस्पृहः ॥
पाहि पाहि भवभीतमसङ्गं दुर्विपक्षविषयैः परिभूतम् ।
नाथ नाथ परमेश्वर विष्णो कृष्ण कृष्ण परमा हि गतिस्त्वम् ॥
कृष्ण कृष्ण परमेश्वर विष्णो पाहि पाहि भवकन्दरमध्ये ।
कामकोपमदमत्सरलोभैः साद्यमानमबलं कृपणं माम् ॥
त्वयि जनार्दन भक्तिरचञ्चला यदि भवेदफलप्रवणा मम ।
अभिलषाम्यपवर्गपराङ्मुखः पुनरपीह शरीरपरिग्रहम् ॥

अन्धस्य मे हृतविवेकमहाधनस्य
चोरैर्महाबलिभिरिन्द्रियनामधेयैः ।
मोहान्धकूपकुहरेऽपि निपातितस्य
देवेश देहि कृपणस्य करावलम्बम् ॥

कीटेषु पक्षिषु मृगेषु सरीसृपेषु
रक्षःपिशाचमनुजेष्वपि यत्र तत्र ।
जातस्य मे भवतु देव तव प्रसादात्
त्वय्येव भक्तिरचलाव्यभिचारिणी च ॥

यस्या बीजमहंकृतिर्गुरुतरं मूलं ममेति ग्रहो
नित्यं त(त्स्मृ?त्स्मृ)तिरङ्कुरस्सुतसुहृज्ज्ञात्यग्रजा. पल्लवाः ।
स्कन्धो दारपरिग्रहः परिभवः पुष्पं फलं दुर्गतिः
सा मे त्वत्स्मृतिसत्क्रियापरशुना तृष्णालता लूयताम् ॥

याचेऽहं याचेऽहं हर तव चरणारविन्दयोर्भक्तिम् ।
याचेऽहं याचेऽहं पुनरपि तामेव तामेव ॥
महादेव महादेव महादेव दयानिधे ।
भवानेव भवानेव भवानेव गतिर्मम ॥
परमगुरुकरुणापरायणेन वासुदेवेन लिखितमिद पुस्तकम् ।
शुभमस्तु । श्रीगुरुभ्यो नमः । अधिकमृगपुरीशाय नमः ॥
शङ्करस्य चरिता(?)कथारसं चन्द्रशेखरगुणानुकीर्तनम् ।
नीलकण्ठ! तव पादसेवनं संभवन्तु मम जन्मजन्मनि ॥

॥ भगवन्नामकौमुदी ॥

1204 BHAGAVANNĀMAKAUMUDĪ.

Substance—Palm leaf. Size—$6\frac{3}{8}'' \times 1\frac{7}{8}''$. Leaves.—10.

9 —12 lines per page and 24 —28 letters per line
Script—Malayālam No of Granthas—1250
Complete

Subject etc —Same as No 1203

॥ भगवन्नामचिन्तामणिः ॥

1205 BHAGAVANNĀMACINTĀMANI

Substance—Palm leaf Size—10" 1¼" Leaves—95
10 lines per page and 38—44 letters per line
Script — Grantha No of Granthas — 2150
Incomplete

Subject—A dissertation on the possibility of attaining the four cardinal objects of life by reciting godly songs

Beginning

हरिः । ओम् । शुभमस्तु ।

श्रीमन्ति यस्य नामानि पुंसां सर्वमभीप्सितम् ।
ददत्यसौ रङ्गधाम्ने परस्मै ब्रह्मणे नमः ॥
धर्मार्थकाममोक्षाख्याः पुरुषार्थाश्चतुर्विधाः ।
सिध्यन्ति भगवन्नाम्नां कीर्तनात् प्राणिनामिह ॥
स्वतन्त्रोत्तमधर्मत्वाद्धर्मसाधनभावतः ।
धर्माधिकारहेतुत्वाद्धर्मविघ्ननिवारणात् ॥
आद्यस्य पुरुषार्थस्य प्राणाः सङ्कीर्तनं हरेः ।
अर्थे कामे च मोक्षे च विनियोगः पृथक्कृतः ॥

स्वतन्त्रहेतुरतेषां च शास्त्राणामेष निर्णयः ।
विष्णुधर्मादिषु ग्रन्थेष्वेतत्सर्वं प्रपञ्चितम् ॥
धर्माणामुत्तमो धर्मो नामसङ्कीर्तनं हरेः ।
अनपायतया सर्वदेशकालाधिकारतः ॥

End

"अम्बरीष शुभ वाक्य मयोक्तं शृणु भक्तितः ।
धर्मार्थकाममोक्षार्थं कुरु गोविन्दकीर्तनम्" ॥

इत्युक्तरीत्या कीर्तनस्य सर्वफलसाधनत्वात् पुरुषेच्छाया नियन्तुमशक्यत्वेन यस्य पुरुषस्य—

"दयानिधे राघव रामचन्द्र निरस्य पापानि ममाखिलानि ।
त्वय्येव भक्ति सुदृढां प्रयच्छ सेव प्रसूते सकलानभीष्टान् ॥"

इत्युक्ते(न) न्यायेन भक्तिमात्रेच्छया नामकीर्तने प्रवृत्तिः, तस्य भक्तिमुत्पाद्य निःश्रेयसे पर्यवस्यतीति यथा अङ्गप्रपत्तिमुत्पाद्य मुक्तिपर्यवसायिनी स्वतन्त्रप्रपत्तिस्तु साक्षादेवेति सुमतिभिरूहनीयम् ।

Colophon

इति सर्वतन्त्रस्वतन्त्रस्य अप्पादीक्षितस्य पुत्रेण वेङ्कटकृष्णसूरिणा विरचिते भगवन्नामचिन्तामणौ पापनिवृत्तिनिरूपणाख्यं तृतीयं प्रकरणम् ।

Author—Venkatakrsnasūri, son of Appādīksita.

Remarks—The Ms contains three prakaranas and a fragment of the fourth For further information refer to R No 125 Vol I, Part I A and R. No. 4146, Vol. IV, Part I C. TCM one

containing 3 prakaraṇas and the other a portion of the fourth as well. Therein the author is mentioned as Venkaṭanāthasūri.

॥ भागवतगतस्तोत्रसमुच्चयः ॥

1206 BHĀGAVATAGATASTOTRASAMUCCAYA.

Substance—Palm leaf. Size—$7\frac{7}{8}'' \times 1\frac{3}{4}''$. Leaves—139. 8—10 lines per page and 32—36 letters per line. Script—Malayāḷam. No. of Granthas—2800. Complete.

Subject—A collection of *stotras* occurring in the Bhāgavata.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

कारणं सम्पदामापद्वारणं वारणाननम् ।
बोभवीतु परं तेजः श्रेयसे मम भूयसे ॥

जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्
तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत्सूरयः ॥
तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गो मृषा
धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि ॥

धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सतां
वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम् ।
श्रीमद्भागवते महामुनिकृते किं वापरैरीश्वरः
सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात् ॥

निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतम् ।
पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः ॥

End

पृष्ठभ्राम्यदमन्दमन्दरगिरिग्रावाग्रकण्डूयना-
न्निद्रालोः कमठाकृतेर्भगवतः श्वासानिलाः पान्तु वः ।
यत्संस्कारकलानुवर्तनवशाद्वेलानिभेन स्मरां
यातायातमतन्द्रितं जलनिधेर्नाद्यापि विश्राम्यति ॥

कस्मै येन विभासितोऽयमतुलो ज्ञानप्रदीपः पुरा
तद्रूपेण च नारदाय मुनये कृष्णाय तद्रूपिणे ।
योगीन्द्राय तदात्मनाथ भगवद्राताय कारुण्यत-
स्तच्छुद्धं विमलं विशोकममृतं सत्यं परं धीमहि ॥

नमस्तस्मै भगवते वासुदेवाय साक्षिणे ।
य इदं कृपया तस्मै व्याचचक्षे मुमुक्षवे ॥
योगीन्द्राय नमस्तस्मै शुकाय ब्रह्मरूपिणे ।
संसारसर्पदष्टं यो विष्णुरातममूमुचत् ॥

Colophon.

इत्यष्टादशसाहस्रिकायां संहितायां श्रीमद्भागवते द्वादशस्क-
न्धे त्रयोदशोऽध्यायः । भागवतस्तोत्रं समाप्तम् ।
श्रीकृष्णाय नमः । श्रीपद्मनाभो रक्षतु ।

Author

Remarks—The codex is framed with ivory plates

———

॥ भागवतगतस्तोत्रसमुच्चयः ॥

1207 BHĀGAVATAGATASTOTRASAMUCCAYA

Substance—Palm leaf Size—6¼" × 2¼" Leaves—256 6—11 lines per page and 16—24 letters per line Script—Malayālam No of Granthas—2800 Complete

Subject—Same as No 1206

Beginning

हरिः । श्रीगणपतये नमः ।

भागवतस्तोत्रसङ्ग्रहो लिख्यते ।

जन्माद्यस्य यतोऽन्वयाद्

End

पृष्ठभ्राम्यदमन्दमन्दरगिरिग्रावाग्रकण्डूयनै-
निंद्रालोः कमठाकृतेर्भगवतः श्वासानिलाः पान्तु वः ।
यत्संस्कारकलानुवर्तनवशाद्वेलाच्छलेनाम्भसां
यातायातमहर्निशं जलनिधेर्नाद्यापि विश्राम्यति ॥

श्रीमद्भागवत पुराणममलं यद्वैष्णवानां प्रिय
यस्मिन् पारमहंस्यमेतदखिल ज्ञानं पर गीयते ।
यत्र ज्ञानविरागभक्तिसहित नैष्कर्म्यमाविष्कृतं
तच्छृण्वन्विपठन्विचारणपरो भक्त्या विमुच्येन्नरः ॥

Colophon

समाप्तेयं भागवतसंग्रहस्तुतिः ॥
श्रीकृष्णो रक्षतु ।

Author

Remarks—The Ms is held fast by means of ivory plates The script is bold The following verses bear out that the work written at the bidding of Bālamārtāṇda Varma

सजलजलदशोभः मादरं रक्षितेभः
सुजनसुलभरूपः सहृतापन्नताप. ।
खलजनदुरवापो बालमार्ताण्डभूपं
सदयमवतु भक्तं सन्ततं पद्मनाभः ॥
शुभमस्तु ।

आज्ञया बालमार्ताण्डराजो भागवतस्तुतीः ।
विलिखामि सुसहृत्य कलिकल्मषनाशनी. ॥

The introductory portion of No 1206 manifests that these panegyrics were indited for purposes of protecting the good, destroying the wicked and stabilising the state and hence the existing custom of reciting these *ślokās* during H H The Maharaja's circumambulation inside the temple of Śrī Padmanābha

॥ भागवतगतस्तोत्रसमुच्चयः ॥

1208 BHĀGAVATAGATASTOTRASAMUCCAYA.

Substance—Palm leaf Size—6″ × 2″ Leaves—44 10—12 lines per page and 24 letters per line Script—Malayālam No of Granthas—700. Incomplete.

Subject—Beginning—Same as No 1206

End

भृगुः—

यन्मायया गहनयापहृतात्मबोधा
  ब्रह्मादयस्तनुभृतस्तमसि स्वपन्तः ।
नात्मन् सृतं तव विदन्त्यधुनापि तत्त्व
  सोऽयं प्रसीदतु भवान् प्रणतात्मबन्धुः ॥

ब्रह्मा—

नैतत्स्वरूपं भवतोऽसौ पदार्थभेदग्रहैः पुरुषो यावदीक्षेत् ।
ज्ञानस्य चार्थस्य गुणस्य चाश्रयो मायामयाद्व्यतिरिक्तोऽमतस्त्वम् ॥

इन्द्रः—

इदमच्युत विश्वभावनं वपुरानन्दकरं मनोदृशाम् ।
सुरविद्विट्क्षपणैरुदायुधैर्भुजदण्डैरुपपन्नमष्टभिः ॥

पत्न्यः—

यज्ञोऽयं तव यजनाय केन सृष्टो विध्वस्तः पशुपतिनाद्य दक्षकोपात् ।
तन्नस्त्वं शवशयनाभशान्तमेध यज्ञात्मन्नलिनरुचा दृशा पुनीहि ॥

ऋषयः—

अनन्वितं ते भगवन्विचेष्टितं यदात्मना चरसि न कर्म सज्जसे ।
विभूतये यत ..

Colophon

तृतीयस्कन्धः समाप्तः ।

Author .

Remarks—The invocations occurring in the 3rd *skandha* and a fragment of the 4th are alone embodied in this Ms Four leaves at the end are blank



|| भागवतदशमकथासंग्रहः ||

1209 BHĀGAVATADAŚAMAKATHĀSANGRAHA

Substance—Palm leaf Size—$8\frac{1}{2}'' \times 1\frac{1}{2}''$ Leaves—3
7 lines per page and 26 letters per line
Script—Malayālam No of Granthas—25

Subject—A compendium of the story of Lord Kṛṣṇa

Beginning

हरिः ||

जातो वंशे यदूनां सहभुजगपतिर्भूमिभारं जिहीर्षन्
गत्वा नन्दव्रजं यः समधयदसुभिः पूतनास्तन्यमुग्रम् ।
शश्वद्व्यादमेयां शकटमपनुदन् पादपद्मेन घोरं
वात्यं दैत्यश्च मृद्नन् धनदजमुगमौ पद्मनाभः श्रिय नः ||

सार्कं गोगोपवृन्दैर्वनभुवि विहरन् संहरन् दुष्टदैत्यान्
भृत्यान् कंसस्य चक्रे मुदमतिशयिनी मायया पद्मयोनेः ।
कालिन्द्यां कालियाहेर्विषमविषहरो वह्निमह्नाय मुष्णन्
छत्रीकुर्वन् गिरीन्द्र शतमखमखहा पातु लक्ष्मीपतिर्नः ||

End

कृष्णस्यैतच्चरित्रं सकलजनमनोहारि शश्वद्विचित्रं
भक्त्या पापघ्न्यतेयो दिनमनु मनसा चिन्तयन् तत्स्वरूपम् ।
इष्टान् कामानवाप्य स्वयमिह सुतरां सर्वपापैर्विमुक्तः
सोऽन्ते नारायणाख्य व्रजति हि परमं ब्रह्म सन्तोषशाली ||

Colophon .

Author .

Remarks—Herein is furnished a versified summary of the story contained in the 10th *skandha* of the Bhāgavata

॥ मदनगोपालस्तवः ॥

1210 A MADANAGOPĀLASTAVA

Substance—Palm leaf Size—5½" 1⅞" Leaves—5
6—7 lines per page and 20 letters per line
Script—Malayālam No of Granthas—40

Subject—Same as No 1172 A23

Beginning

श्रृणु देवि प्रवक्ष्यामि रहस्यं भुवनेश्वरि ।
तवैव पौरुषं रूप गोपिकानयनामृतम् ॥
सदा निषेवितं रागाद्भवद्भिरहभीरुणा ।
सत्यभामादिरूपाभिर्मया मूर्तिभिरष्टभिः ॥
ख्यातं मदनगोपालमज्ञया भुवनत्रये ।
तस्य ध्यान प्रवक्ष्यामि सर्वपापप्रणाशनम् ॥
सर्वसंमोहनं सर्वसम्पत्प्रदमनुत्तमम् ।
अणिमादिमहैश्वर्यप्रदमायुष्यवर्धनम् ॥
सर्वशोकप्रशमनं सत्पुत्रावाप्तिकारणम् ।
सौभाग्यदायकं नृणां स्त्रीणां चैव विशेषतः ॥
किमत्र बहुनोक्तेन ध्यानेनानेन भामिनि ।
यद्यदिच्छति तत्सर्व नरः प्राप्नोत्यसशयम् ॥

End

तप्तहेमश्रिया लक्ष्म्या भुवा मरतकश्रिया ।
सत्यभामाप्रधानाभिः स्त्रीभिरष्टाभिरावृतम् ॥
षोडशस्त्रीसहस्रैश्च समन्तादुपशोभितम् ।
देवकीवसुदेवाभ्यां प्रद्युम्नादिकुमारकैः ॥
भ्रातृभिर्बलभद्राद्यैरक्रूराद्यैश्च बन्धुभिः ।
अम्बरीषादिराजन्यैर्वसिष्ठसनकादिभिः ॥
गोवृन्दैश्च नतग्रीवैः सुमुखार्पितदृष्टिभिः ।
नानामृतरसास्वादैर्निष्पन्दनिखिलेन्द्रियैः ॥
उपास्यमानमभितः परमानन्दनिर्भरैः ।
चित्रन्यस्तमिवाशेषमातन्वानमिदं जगत् ॥
ध्यायेन्मदनगोपालं मन्त्री शुचिरलंकृतः ।
सर्वान् कामानवाप्नोति दुर्लभानप्ययत्नतः ॥

ऐं कृष्णाय श्रीं क्लीं गोविन्दाय ह्रीं सौः गोपीजनवल्लभाय स्वाहा । श्रीकृष्णाय नमः । शुभमस्तु ।

Colophon

Author.

Remarks—The Ms is held fast within a pair of ivory boards

॥ रामस्तवः ॥

1210 B RĀMASTAVA

Substance—Palm leaf Size—5½" 1⅞" Leaf—1.

8 lines per page and 21 letters per line. Script—Malayālam No of Granthas—10

Subject—Same as No 1169 I

Beginning

भास्वद्वंशपयोधिकौस्तुभमणिस्त्रैलोक्यरक्षामणिः
पङ्क्तिस्यन्दनवक्त्रपद्मखमणिर्भक्तार्तिचिन्तामणिः ।
भूपुत्रीकुचकुम्भभूषणमणी रक्षोघशिक्षामणिः
रामाख्यो जयतीह वासवमणिर्वेदान्तचूडामणिः ॥

पार्वत्या जप्तमन्त्रो गिरिशहृदि सदा भावितः शुद्धमन्त्रो
वेदान्तोद्घुष्टमन्त्रो रजनिचरखलोन्मूलने मूलमन्त्रः ।
संसारोद्धारमन्त्रः कविवरवचसां रम्यजीवातुमन्त्रो
निर्दोषो राममन्त्रो जयति बहुमतिश्रेयसामाद्यमन्त्रः ॥

End

जन्मव्याधिजरौषध दशरथस्यानन्दसिद्धौषध
कौसल्याधिहरौषध जनकजाशृङ्गारदिव्यौषधम् ।
सुग्रीवस्य हितौषधं दशमुखप्राणापहारौषधं
वीरश्रीरमणौषधं विजयते श्रीरामनामौषधम् ॥

Colophon

Author ·

Remarks—Select words are used 8 times in each verse.

॥ गजेन्द्रमोक्षः ॥

1210 C GAJENDRAMOKSA

Substance—Palm leaf Size—5½" 1⅞" Leaves—13
7—8 lines per page and 16—24 letters per line
Script—Malayālam No of Granthas—125

Subject—Same as No 1169 H

Beginning etc —Same as No 1146 G

― ―

॥ कृष्णस्तवः ॥

1210 D KRSNASTAVA

Substance —Palm leaf Size—5½" × 1⅞" Leaves—2½
7 lines per page and 24 letters per line
Script—Malayālam No of Granthas—25

Subject—Same as No 1172 A23

Beginning

श्रीशुकस्तुतिः

इत्युपामन्त्रितो राजा गुणानुकथने विभोः ।
हृषीकेशं नमस्कृत्य प्रवक्तुमुपचक्रमे ॥

श्रीबादरायणिः—

नमः परस्मै पुरुषाय भूयसे समुद्भवस्थाननिरोधलीलया ।
गृहीतशक्तित्रितयाय देहिनामन्तर्भवायानुपलभ्यवर्त्मने ॥

भूयो नमस्सद्वृजिनाच्छिदेऽसतामसम्भवायाखिलसत्त्वमूर्तये ।
पुंसां पुनः पारमहंस्य आश्रमे व्यवस्थितानामनुमृग्यदाशुषे ॥

नमो नमस्तेस्त्वृषभाय सात्वतां विदूरकाष्ठाय मुहुः कुयोगिनाम् ।
निरस्तसाम्यातिशयेन राधसा स्वधामनि ब्रह्मणि रंस्यते नमः ॥

End

यदङ्घ्र्यभिध्यानसमाधिधौतया
धियानुपश्यन्ति हि तत्त्वमात्मनः ।
वदन्ति चैतत् कवयो यथारुचं
स मे मुकुन्दो भगवान् प्रसीदताम् ॥

प्रचोदिता येन पुरा सरस्वती
वितन्वताजस्य सती हृदि स्मृतिम् ।
स्वलक्षणा प्रादुरभूत्किलास्यतः
स मे ऋषीणामृषभः प्रसीदताम् ॥

भूतैर्महद्भिर्य इमां पुरो विभु-
र्निर्माय शेते यदमूषु पूरुषः ।
भुङ्क्ते (पुनः) षोडशषोडशात्मकः
सोऽलङ्कृषीष्ट भगवान् वचांसि मे ॥

नमस्तस्मै भगवते वासुदेवाय वेधसे ।
पपुर्ज्ञानमयं सौम्यं यन्मुखाम्बुरुहासवम् ॥
एतदेवात्मभू राजन्नारदायानुपृच्छते ।
वेदगर्भोऽभ्यधात् सर्वं यदाह हरिरात्मनः ॥

Colophon

Author

Remarks—The text is borrowed from the Bhāgavata.

॥ कृष्णस्तवः ॥

1210 E KRSNASTAVA

Substance—Palm leaf Size—5½″ × 1⅝″ Leaves—2
7—8 lines per page and 21 letters per line
Script—Malayālam No of Granthas—20

Subject—Same as No 1172 A23

Beginning etc —Same as No 1146 I



॥ सुदर्शनकवचम् ॥

1210 F SUDARŚANAKAVACAM

Substance—Palm leaf Size—5½″ × 1⅞″ Leaves—4
7 lines per page and 17 letters per line
Script—Malayālam No of Granthas—25

Subject—A panegyric of Sudarśana, a weapon of Visnu

Beginning

सुदर्शनकवचमहामन्त्रस्य । अन्तर्यामिभगवन्नारायण ऋषिः । अनुष्टुप्छन्दः । श्रीसुदर्शनमहाविष्णुर्देवता ।

ध्यानम् ।

चक्रं शार्ङ्गं सुखेटं हलपरशुगदापाशकुन्तान् दधानं
वामैरन्यैश्च शङ्खष्वसिमुसललसत्पद्मशूलाङ्कुशाग्रान् ।
ज्वालाकेशं किरीटोज्ज्वलमनलनिभं मन्युमत्युग्रमूर्तिं
प्रत्यालीढस्थमीडे त्रिणयनमनिलं भावयेच्चक्रराजम् ॥

मस्तकं मे सहस्रारः पातु फालं सुदर्शनः ।
भ्रुवौ मे चक्रराट् पातु नेत्रे देवेन्दुलोचनः ॥
कर्णौ वेदस्तुतः पातु घ्राणं पातु [illegible]ः ।
महादीपः कपोलौ मे ओष्ठौ [illegible]ः ॥
दन्तान् पातु जगद्वन्द्यो रसनां [illegible] सर्वदा ।
सर्वविद्यार्णवः पातु गिरं [illegible] ॥
वीरसिंहो मुखं पातु [illegible]ः ।
सर्वदा पातु मे कण्ठं मेघगम्भीरनिस्वनः ॥
मम स्कन्धयुगं पातु [illegible]ः ।

End

सर्वशत्रुक्षयकरं सर्वमङ्गळकारणम् ।
त्रिसन्ध्यं जपतां नृणां सर्वदा विजयप्रदम् ॥
सर्वपापक्षयकरं भोगमोक्षैकसाधनम् ।
प्रातरुत्थाय यो भक्त्या पठेदेतत् सदा नरः ॥
यक्षराक्षसवेताळा भैरवाश्च विनायकाः ।
शाकिनी डाकिनी माया मायेशाः स्फोटकादयः ॥
भूतप्रेतपिशाचाश्च सर्वदुष्टग्रहा अपि ।
कवचस्यास्य जप्तार दृष्टमात्रेण तेऽखिलाः ॥
पलायन्ते यथा नागाः पक्षिराजस्य दर्शनात् ।
विन्यस्याङ्गेष्विदं धीरो युद्धार्थी योऽभिगच्छति ।
रणे जित्वाखिलाञ्छत्रूञ्जयी भवति स ध्रुवम् ।
मन्त्रिताम्बु त्रिवारं वा पिबेत्सप्तदिनावधि ॥
प्रविनश्यन्ति सकला व्याधयः कुक्षिसंभवाः ।
मुखप्रक्षाळनं नेत्रनासिकारोगनाशनम् ॥
भीतानामभिषेकश्च महाभयनिवारणम् ।

Colophon

Author

Remarks—36 leaves are missing after the 20th Fol and hence Kisnāmismriti and Kisnastavaraja are not reproduced

---

॥ विष्णुपादादिकेशस्तवः ॥

1210 G VISNUPĀDĀDIKEŚASTAVA

Substance—Palm leaf Size—8½″ × 1¾″ Leaves—24 6 lines per page and 17 letters per line Script—Malayālam No of Granthas—150

Subject—Same as No 1169 H

Beginning etc —Same as No 1146 H

Remarks—In the closing portion of the Ms are seen the following additional verses

मत्स्यः कूर्मो वराहो नरहरिणपतिर्वामनो जामदग्न्यः
काकुत्स्थः कंसघाती मनसिजविजयी यश्च कल्की भविष्यन् ।
विष्णोरंशावतारा भुवनहितकरा धर्मसंस्थापनार्थाः
पायासुर्मां त एते गुरुतर(पृथिवी)भारखिन्नाशया ये ॥

यस्माद्वाचो निवृत्ताः सममपि मनसा लक्षणामीक्षमाणाः
स्वार्थालाभात् परार्थव्यपगमकथनश्लाघिनो वेदवादाः ।
नित्यानन्दं स्वसंविन्निरवधिममृतं स्वान्तसंक्रान्तबिम्ब-
च्छायापत्यापि(?)नित्य सुखयति यमिनो यत्तदव्यान्महो नः॥

आपादादा च शीर्ष्णो वपुरिदमनघं वैष्णवं यः स चित्ते
धत्ते नित्यं निरस्ताखिलकलिकलुषे संततान्तःप्रमोदः ।
जुह्वज्जिह्वाकृशानौ हरिचरितहविः स्तोत्रमन्त्रानुपाठै-
स्तत्पादाम्भोरुहाभ्यां सततमपि नमस्कुर्महे निर्मलाभ्याम् ॥

॥ विष्णुपञ्जरम् ॥

1210 H VISNUPAÑJARAM

Substance—Palm leaf Size—$5\frac{1}{2}'' \times 1\frac{7}{8}''$ Leaves—4
6 lines per page and 16 letters per line
Script—Malayālam No of Granthas—25

Subject—Same as No 1165 B

Beginning etc —Same as No 1064 E

Remarks—The work is composed in the form of a dialogue between Śatānika and Śaunaka

---

॥ नृसिंहाष्टकम् ॥

1210 I NRSIMHĀSTAKAM.

Substance—Palm leaf Size—$5\frac{1}{2}'' \times 1\frac{7}{8}''$ Leaves—3
6 lines per page and 21 letters per line
Script—Malayālam No of Granthas—25

Subject—Beginning—Same as No. 1172 A7.

End

वारिजविलोचन मदन्त्यदशायां
क्लेशविवशीकृतसमस्तकरणायाम् ।
एहि रमया सह शरण्य विहगानां
नाथमधिरुह्य नरसिंह नरसिंह ॥

Colophon—Same as No 1172 A7

Author—Same as No 1172 A7

Remarks—This work is not noticed in RCMPL.

॥ लक्ष्मीनृसिंहस्तवः ॥

1210 J LAKSMĪNṚSIMHASTAVA

Substance—Palm leaf Size—$5\frac{1}{2}'' \times 1\frac{7}{8}''$ Leaves—$3\frac{1}{2}$
6 lines per page and 18—20 letters per line
Script—Malayālam No of Granthas—25

Subject etc —Same as No 1164 J

Remarks—The opening verse in No 1164 J is omitted in this Ms

॥ विष्णुभुजङ्गप्रयातम् ॥

1210 K VISNUBHUJAṄGAPRAYĀTAM

Substance—Palm leaf Size —$5\frac{1}{2}'' \times 1\frac{7}{8}''$ Leaves—4.
6 lines per page and 17—18 letters per line
Script—Malayālam No of Granthas—25

Subject etc —Same as No 1169 H

॥ रामभुजङ्गप्रयातम् ॥

1210 L RĀMABHUJANGAPRAYĀTAM

Substance—Palm leaf Size—$5\frac{1}{2}'' \times 1\frac{7}{8}''$ Leaves—8.
6 lines per page and 14—18 letters per line
Script—Malayālam No of Granthas—50

Subject etc —Same as No 1146 J

॥ सीतारामस्तवः ॥

1210 M. SĪTĀRĀMASTAVA.

Substance—Palm leaf. Size—$5\frac{1}{2}'' \times 1\frac{7}{8}''$ Leaves—2.
6 lines per page and 12—17 letters per line
Script —Malayālam No of Granthas—12.

Subject—A panegyric of Rāma and Sītā

Beginning ·

अयोध्यापुरनेतारं मिथिलापुरनायिकाम् ।
राघवाणामलङ्कारं विदेहानामलङ्क्रियाम् ॥
रघूणां कुलदीपञ्च निमीनां कुलदीपिकाम् ।
सूर्यवंशसमुद्भूत सोमवंशसमुद्भवाम् ॥
पुत्र दशरथस्यापि पुत्रीं जनकभूपतेः ।
वसिष्ठानुमताचारं शतानन्दमतानुगाम् ॥
कौसल्यागर्भसंभूतं वेदिगर्भोदितां स्वयम् ।
चन्द्रकान्ताननाम्बोजं चन्द्रबिम्बोपमाननाम् ॥

End

मर्वलोकविधातारं सर्वलोकविधायिनीम् ।
लोकाभिरामं श्रीराममभिरामाञ्च मैथिलीम् ॥
दिव्यसिंहासनारूढौ दिव्यस्रग्गन्धभूषणौ ।
अनुक्षण कटाक्षाभ्यामन्योन्येक्षणकाङ्क्षिणौ ॥
अन्योन्यमदृशावेतौ त्रैलोक्यगृहदम्पती ।
उभौ युवां प्रणम्याह व्रजाम्यद्य कृतार्थताम् ॥
तस्य तौ तनुतां प्रीतौ मम्पदः मकला अपि ।

Colophon

इति श्रीरामचन्द्रस्य जानक्याश्च विशेपतः ।
कृतं हनुमता पुण्यं स्तोत्रं मद्यो विमुक्तिदम् ॥
श्रीसीतारामाभ्या नमः ।

Author—Hanuman

Remarks—The epithets used in these verses apply respectively to Rāma and Sīta

---

॥ रामस्तवः ॥

1210 N. RĀMASTAVA.

Substance—Palm leaf Size—$5\frac{1}{2}'' \times 1\frac{7}{8}''$ Leaves—29
6 lines per page and 20 letters per line
Script—Malayālam No of Granthas—225.

Subject—Same as No. 1146 J.

Beginning

यः पृथ्वीभरवारणाय दिविजैस्संप्रार्थितश्चिन्मयः
संजातः पृथिवीतले रघुकुले मायामनुष्योऽव्ययः ।

निश्चक्री हतराक्षसः पुनरगाद्ब्रह्मत्वमाद्यं स्थिरां
कीर्तिं पापहरां विधाय जगतां त जानकीश भजे ॥

विश्वोद्भवस्थितिलयादिषु हेतुमेक
मायामयं विगतमायमचिन्त्यमूर्तिम् ।
आनन्दमान्द्रममलं निजबोधरूप
सीतापति विदित(म?त)त्त्वमहं नमामि ॥

ब्रह्मा—

नमोऽस्तु ते पद देव प्राणबुद्धीन्द्रियादिभिः ।
यच्चिन्त्यते कर्मपाशाद्धृदि नित्यं मुमुक्षुभिः ॥
मायया गुणमय्या त्व सृजस्यवसि लुम्पसि ।
जगत्तेन न ते लेपः स्वानन्दानुभवात्मनः ॥
कथाविशुद्धि दुष्टानां दानाध्ययनकर्मभिः ।

End

ब्रह्मादयस्ते न विदुः स्वरूपं
चिदात्मकत्वं बहिरर्थभावाः ।
अतो बुधस्त्वामिदमेव रूप
भक्त्या भजन्मुक्तिमुपैति दुःखात् ॥

अहं भवन्नाम गृणन्कृतार्थो
वसामि काश्यामनिशं भवान्या ।
मुमूर्षमाणस्य विमुक्तयेऽहं
दिशामि मन्त्र तव रामनाम ॥

इमं स्तव नित्यमनन्यभक्त्या
शृण्वन्ति गायन्ति लिखन्ति ये वै ।

ते सर्वसौख्यं परम च लब्ध्वा
भवत्पदं यातु भवत्प्रसादात् ॥

Colophon

Authoi

Remaiks—The Ms contains the panegyiics of Brahmā, Kousalyā, Ahalyā, Anasūyā, Viradha, Śarabhanga, Sutīksna, Agastya, Rāksasas Jatāyu, Kabandha, Śabaii, Sugiīva, Vāli, Svayamprabhā, Vibhīsana, Naiada, Devas, Indra, Śankaia etc This work is boiiowed from the Adhyātmaiāmāyana

---

॥ रामस्तवराजः ॥

1210 O RĀMASTAVARĀJA

Substance—Palm leaf Size—$5\frac{1}{2}'' \times 1\frac{7}{8}''$ Leaves—5 6 lines pei page and 16 letteis per line Script —Malayālam No of Granthas—30

Subject—Same as No 1169 I

Beginning

हरिः ।

सूत उवाच ।
सर्वशास्त्रार्थतत्त्वज्ञ व्यासं सत्यवतीसुतम् ।
धर्मपुत्रः प्रहृष्टात्मा प्रत्युवाच मुनीश्वरम् ॥

युधिष्ठिर उवाच ।
भगवन् योगिनां श्रेष्ठ सर्वशास्त्रविशारद ।

किं तत्त्व किं परं जप्यं किं ध्यानं मुक्तिसाधनम् ॥
श्रोतुमिच्छामि तत् सर्वं ब्रूहि मे मुनिसत्तम ।

व्यास उवाच ।

धर्मराज महाभाग शृणु वक्ष्यामि तत्त्वतः ।
यत्परं यद्गुणातीतं यज्ज्योतिरमलं शिवम् ॥
तदेव परमं तत्त्वं कैवल्यपदकारणम् ।
श्रीरामेति परं जप्यं तारकब्रह्मसंज्ञकम् ॥
ब्रह्महत्यादिपापघ्नमिति वेदविदो विदुः ।
श्रीरामरामेति (जना ?) ये जपन्ति च सर्वदा ॥
तेषां भुक्तिश्च मुक्तिश्च भविष्यति न संशयः ।
स्तवराजं पुरा प्रोक्तं नारदेन च धीमता ॥
तत् सर्वं संप्रवक्ष्यामि हरिध्यानपुरस्सरम् ।
तापत्रयाग्निशमनं सर्वसम्पत्करं शिवम् ॥

End

रामं रघुवरं वीरं धनुर्वेदविशारदम् ।
मङ्गलायतनं देवं रामं राजीवलोचनम् ॥
सर्वशास्त्रार्थतत्त्वज्ञमानन्दकरसुन्दरम् ।
कौसल्यानन्दनं रामं धनुर्बाणधरं हरिम् ॥
एवं सञ्चिन्तयन्विष्णुं यज्ज्योतिरमलं विभुम् ।
प्रहृष्टमानसो भूत्वा मुनिवर्यः सदा नरः ॥
सर्वलोकहितार्थाय तुष्टाव रघुनन्दनम् ।
कृताञ्जलिपुटो भूत्वा चिन्तयन्नद्भुतं हरिम् ॥
यदेकं यत्परं नित्यं यदानन्दचिदात्मकम् ।
यदेकं व्यापकं लोके तद्रूपं चिन्तयाम्यहम् ॥

विज्ञानहेतुं विमलायताक्षं
प्रज्ञानरूपं स्वसुखैकहेतुम् ।
श्रीरामचन्द्रं हरिमादिदेवं
परात्परं राममहं नमामि ॥

कविं पुराणं पुरुषं पुरस्तात्
सनातनं योगिनमीशितारम् ।
अणोरणीयांसमनन्तवीर्यं
प्राणेश्वरं राममसौ ददर्श ॥

Colophon

Author

Remarks—The work is in the form of a dialogue between Vyāsa and Yudhisthira The following verse furnishes its title

स्तवराजं पुरा प्रोक्तं नारदेन च धीमता ।
तत् सर्वं संप्रवक्ष्यामि हरिध्यानपुरस्सरम् ॥



॥ राममानसपूजा ॥

1210 P RĀMAMĀNASAPŪJĀ

Substance—Palm leaf Size—$5\frac{1}{2}'' \times 1\frac{7}{8}''$ Leaves —$16\frac{1}{2}$ 5 lines per page and 14—15 letters per line Script—Malayālam No of Granthas—75.

Subject—Same as No. 1169 I.

Beginning

श्रीरामचन्द्राय नमः ।

सुतीक्ष्ण उवाच

हृदये मानसी पूजा कीदृशी वा वद प्रभो ।
उपचारैः कतिविधैः पूज्यते रघुनन्दनः ॥

अगस्त्य उवाच

राम पद्मपलाशाक्षं कालाम्बुदसमप्रभम् ।
स्मितवक्त्र सुखासीनं चिन्तये चिन्तितासये ॥
रागादिकलुप चित्तं वैराग्येण सुनिर्मलम् ।
ध्यात्वा नमेत्सदा रामं भवबन्धविमुक्तये ॥
प्रातः शुद्धतनुर्भूत्वा शौचादिभिरतान्द्रितः ।
विविक्तदेशमाश्रित्य ध्यानपूजाः समारभेत् ॥
नाभिकन्दसमुद्भूत कदळीकुसुमोपमम् ।
अष्टपत्र स्निग्धवर्ण ध्यायेद्धृदयपङ्कजम् ॥
तत्पत्र रामनाम्नैव फुल्लं कृत्वास्य मध्यमे ।
ध्यायेत्सूर्यसोमाग्निमण्डलान्युत्तरोत्तरम् (?) ॥
तस्योपरि न्यसेद्दिव्य पीठं रत्नमयोज्ज्वलम् ।
तन्मध्ये राघवं ध्यायेत् सूर्यकोटिसमप्रभम् ॥

End

तप्तजाम्बूनदेनैव निर्मितं रत्नभूषितम् ।
स्वर्णपुष्प रघुश्रेष्ठ दास्यामि स्वीकुरु प्रभो ॥
हृत्पद्मकर्णिकामध्ये सीतया सह राघव ।
निवस त्व सुरश्रेष्ठ सर्वैरावरणैस्सह ॥

मनोवाक्कायजं नित्य कर्म यत्रच्छुभाशुभम् ।
तत्सर्वं प्रीतये भूयान्नमो रामाय शार्ङ्गिणे ॥
अपराधसहस्राणि क्रियन्तेऽहर्निशं मया ।
दासोऽयमिति मां मत्वा क्षमस्व रघुनायक ॥
एव यः कुरुते पूजां बहिर्वा हृदयेऽपि वा ।
सकृत्पूजनमात्रेण राम एव भवेन्नरः ॥
किं पुनः सततं कुर्याद्ब्रह्मण्येव स्थितो हि सः ।
सर्वान् कामानवाप्नोति इह लोके परत्र च ॥

Colophon

इति श्रीअगस्त्यसंहितायां परमरहस्ये श्रीराममानसिकपूजाविधिर्नाम पञ्चविंशोऽध्यायः ।

Author

Remarks—The work is borrowed from the Agastya-samhitā

॥ रामकवचम् ॥

1210 Q. RĀMAKAVACAM

Substance—Palm leaf Size—$5\frac{1}{2}'' \times 1\frac{7}{8}''$ Leaves—5
6 lines per page and 14—17 letters per line
Script—Malayālam No of Granthas—30

Subject—Same as No 1169 I

Beginning

श्रीपार्वत्युवाच

देव देव जगन्नाथ देवेश करुणानिधे ।
आपत्सु विषमे दुर्गे सङ्कटे पथि बन्धने ॥

राजचोरारिपीडासु मृगपीडासमुद्भवे ।
अपवादे भये रोगे धने नष्टे च पातके ॥
भूतवेताळकूश्माण्डमहामारीभयेषु च ।
दुःस्वप्ने दुरवस्थासु मार्गे दस्युभिरावृते ॥
रणे ऋणेषु दारिद्र्येऽप्यग्निदाहे विदारणे ।
केनोपायेन शान्तिः स्यात् सर्वसौभाग्यसम्पदः ॥

End

एव कुर्वन्ननुदिन नरः पापविवर्जितः ।
सर्वापद्भ्यो विमुच्येत देहान्ते राघवं व्रजेत् ॥
अनेन कृतसंरक्षा जायते वज्रपञ्जरम् ।
किमत्र बहुनोक्तेन स देवैरपि पूज्यते ॥
एतद्भक्ताय देयं स्यान्नाभक्ताय कदाचन ।
त्वमपि श्रद्धया देवि वर्मैतन्मैथिलीपतेः ॥
संकीर्त्य सर्वलोकेषु ख्यातिमेष्यति पार्वति ।

Colophon

श्री शंकरसंहितायां परमरहस्ये उमामहेश्वरसंवादे श्रीरामवर्मवैभवं नाम एकोनविंशोऽध्यायः ।

Author -

Remarks—Same as No 1210 P

॥ रामकवचम् ॥

1210 R RĀMAKAVACAM

Substance—Palm leaf Size—$5\frac{1}{2}'' \times 1\frac{7}{8}''$. Leaves—$3\frac{1}{2}$

6 lines per page and 16 letters per line
Script—Malayalam No of Granthas—15

Subject—Same as No 1169 I

Beginning

श्रीविश्वामित्र ऋषिः । अनुष्टुप्छन्दः । श्रीरामचन्द्रो देवता ।
इन्दीवरश्यामदलायताक्षं धनुर्धरं नीलजटावचूडम् ।
पार्श्वद्वये लक्ष्मणमैथिलीभ्यां निषेव्यमाणं प्रगतोऽस्मि रामम् ॥

End

पादौ विभीषणस्येशः पातु रामोऽखिलं वपुः ।
अग्रतः पृष्ठतश्चैव पार्श्वतश्च महाबलौ ॥
आकर्णपूर्णधन्वानौ रक्षेतां रामलक्ष्मणौ ।
एतां रामबलोपेतां रक्षां यस्सुकृती पठेत् ॥
सुचिरायुस्सुखी पुत्री विनयी विजयी भवेत् ।
पाताळभूतलव्योमचारिणश्छद्मचारिणः ॥
न द्रष्टुमपि शक्तास्ते रक्षितं रामनामभिः ।
रामेति रामभद्रेति रामचन्द्रेति वा स्मरन् ॥
नरो न लिप्यते पापैर्भुक्तिं मुक्तिञ्च विन्दति ।
जगज्जैत्रकमन्त्रेण रामनाम्नाभिरक्षितम् ॥
यः पठेद्धारयेत्तस्य करस्थाः सर्वसिद्धयः ।

Colophon

वज्रपञ्जरनामेदं यो रामकवचं पठेत् ।
अव्याहताज्ञः सर्वत्र लभते वाञ्छितं फलम् ।
श्रीरामाय नमः ।

Author

Remarks—Same as No 1172 E.

॥ राममहादुर्गम् ॥

1210 S RĀMAMAHĀDURGAM

Substance—Palm leaf Size—$5\frac{1}{2}'' \times 1\frac{7}{8}''$ Leaves—$1\frac{1}{2}$
6 lines per page and 14 letters per line
Script—Malayālam No of Granthas—8

Subject—Same as No 1169 I

Beginning

श्रीरामो रक्षतु प्राच्यां रक्षेद्याम्यांश्च लक्ष्मणः ।
प्रतीच्यां भरतो रक्षेदुदीच्यां शत्रुसूदनः ॥
ईशान्यां जानकी रक्षेदाग्नेय्यां सूर्यनन्दन ।
विभीषणस्तु नैर्ऋत्यां वायव्यां वायुनन्दनः ॥
ऊर्ध्वं रक्षेन्महाविष्णुर्मध्य रक्षेन्नृकेसरी ।
अधस्ताद्वायुनो ? रक्षेत्सर्वतः पातु राघवः ॥
सर्वत्र कपिसेनौघैस्सदा वानरनायकः ।
चतुर्द्वारं समारक्षेच्चतुर्भिः कपिपुङ्गवैः ॥

End

श्रीरामाख्यं महादुर्गं विश्वामित्रकृत शुभम् ।
यः पठेद्भयकालेषु सर्वशत्रुविनाशनम् ॥
सर्वसम्पत्प्रदं शीघ्रं स गच्छेद्वैष्णवं पदम् ।
अग्रतः पृष्ठतश्चैव पार्श्वतश्च महाबलौ ॥
आकर्णपूर्णधन्वानौ रक्षेतां रामलक्ष्मणौ ।

Colophon

Author—Visvāmitra

Remarks—The work is composed in *anuṣṭup* metre

॥ रामध्यानम् ॥

1210 T RĀMADHYĀNAM

Substance—Palm leaf Size—$5\frac{1}{2}'' \times 1\frac{7}{8}''$ Leaf—1
7 lines per page and 20 letters per line
Script—Malayālam No of Granthas—8

Subject—Same as No 1169 I

Beginning

श्रीरामध्यानम् ।

सौवर्णमण्डपे मध्ये पुष्पके सुविराजिते ।
मूले कल्पतरोः स्वर्णपीठे मिहाष्टसंयुते ॥
मृदुश्लक्ष्णतले तत्र जानक्या सह संस्थितम् ।
शमं नीलोत्पलश्याम द्विभुज पीतवाससम् ॥
श्रीवत्सकौस्तुभोरस्क वनमालाविभूषितम् ।
स्मितवक्त्रं सुखासीन पद्मपत्रनिभेक्षणम् ॥
किरीटहारकेयूरकुण्डलैः कटकादिभिः ।
विराजमानं विज्ञानमुद्रं वीरासने स्थितम् ॥

End

स्पृशन्तं स्तनयोरग्रे जानक्याः सव्यपाणिना ।
वसिष्ठवामदेवादिसेवितं लक्ष्मणादिभिः ॥

अयोध्यानगरे रम्ये अभिषिक्त रघूत्तमम् ।
एवं ध्यात्वा जपेन्नित्य रामनामषडक्षरम् ॥

Colophon

Author

Remarks—Same as No 1210 S

॥ हनुमद्द्वादशकम् ॥

1210 U HANUMADDVĀDAŚAKAM

Substance—Palm leaf Size—5½″ × 1⅞″ Leaves—3
6 lines per page and 19 letters per line
Script—Malayālam No of Granthas—20

Subject—Meditation on Hanumān

Beginning

आञ्जनेयमतिपाटलाननं काञ्चनाद्रिकमनीयविग्रहम् ।
पारिजाततरुमूलवासिनं भावयामि पवमाननन्दनम् ॥
पद्मरागमणिकुण्डलात्विषा पाटलीकृतकपोलमण्डलम् ।
दिव्यहेमकदळीवनान्तरे भावयामि पवमाननन्दनम् ॥
बालसूर्यरुचिराननाम्बुजं पाणिपङ्कजधृताक्षमालिनम् ।
भावयन्तमनिश रघूत्तम भावयामि पवमाननन्दनम् ॥
इन्दिरावरमख हृदन्तरे सुन्दराङ्गमनुचिन्त्य सन्ततम् ।
भावबन्धललितार्द्रलोचनं भावयामि पवमाननन्दनम् ॥

End

यक्षराक्षसकुमारशिक्षणे दक्षदक्षिणभुजं विचक्षणम् ।
राक्षसक्षयकृते कृतक्षणं भावयामि पवमाननन्दमम् ॥

रामचन्द्रचरणाम्बुजद्वयीराजहंसमनिजमानमाम्बुजम् ।
कामतन्त्रविमुखीकृतान्तरं भावयामि पवमाननन्दनम् ॥
रावणादिरिपुमारणौषधं राघवादिजयजीवनौषधम् ।
भेषजं सकलशास्त्रबोधने भावयामि पवमाननन्दनम् ॥
गन्धवाहतनयं गरुत्मता तुल्यवेगमतिवन्धुराकृतिम् ।
सिन्धुराजसमधैर्यशालिनं भावयामि पवमाननन्दनम् ॥
बुद्धिर्बलं यशो धैर्यं निर्भयत्वमरोगता ।
अजाड्यं वाक्पटुत्वं च हनूमत्स्मरणाद्भवेत् ॥

Colophon

Author

Remarks—Same as No 1156 C

॥ हनुमत्षट्कम् ॥

1210 V HANUMATSATKAM

Substance—Palm leaf Size—$5\frac{1}{2}'' \times 1\frac{7}{8}''$. Leaves—$2\frac{1}{2}$
6 lines per page and 18 letters per line
Script—Malayālam No of Granthas—16

Subject etc —Same as No 1172 L

Remarks — The title of this work, based on RCMPL, is evidently erroneous, including as it does the verse containing the colophon.

॥ शिवकेशादिपादस्तवः ॥

1210 W ŚIVAKEŚĀDIPĀDASTAVA

Substance—Palm leaf Size—5½"×1⅞" Leaves—7½
7 lines per page and 17—19 letters per line
Script—Malayālam No of Granthas—125

Subject—Same as No 1147 L

Beginning

कल्याणं वो विधत्तां कटकतटलसत्कल्पवाटीनिकुञ्ज-
क्रीडासंसक्तविद्याधरनिवहवधूगीतरुद्रापदानः ।
तारैर्हेरम्बनादैस्तरळितविनदत्तारकारातिकेकी
कैलासः शर्वनिर्वृत्यभिजनकपदं सर्वदा पर्वतेन्द्रः ॥

यस्य प्राहुः स्वरूपं सकलदिविषदां सारसर्वस्वयोग
यस्येषुः शार्ङ्गधन्वा समजनि जगतां रक्षणे जागरूकः ।
मौर्वी दर्वीकराणामपि च परिवृढः पूस्त्रयी सा च लक्ष्यं
सोऽव्यादव्याजमस्मानशिवभिदनिशं नाकिनां श्रीपिनाकः ॥

आतङ्कावेशहारी सकलदिविषदामङ्घ्रिपादाश्रयाणां
मातङ्गाद्युग्रदैत्यप्रकरगळगळद्रक्तसंसिक्तधारः ।
क्रूरस्सूरायुतानामपि च परिभवं स्वीयभासा वितन्वन्
घोराकारः कुठारो दृढतरदुरिताख्याटवीं पाटयेन्नः ॥

End

देवेभ्यो दानवेभ्यः पितृमुनिपरिपत्सिद्धविद्याधरेभ्यः
साध्येभ्यश्चारणेभ्यो मनुजपशुपतज्जातकीटादिकेभ्यः ।
श्रीकैलासप्ररूढास्तृणविटपिमुखाश्चापि ये सन्ति तेभ्यः
सर्वेभ्यो निर्विचार नतिमुपरचये शर्वपादाश्रयेभ्यः ॥

ध्यायन्नित्थं प्रभाते प्रतिदिवममिदं स्तोत्ररत्नं पठेद्यः
किं वा ब्रूमस्तदीयं सुचरितमथवा कीर्तयामः समासात् ।
सपज्ञात समग्रं सदसि बहुमति सर्वलोकप्रियत्वं
संप्राप्यायुश्शतान्ते पदमयति परब्रह्मणो मन्मथारेः ॥

Colophon

निसर्गभक्तीन्दुकलाद्रवन्मन-
श्शशाङ्कहीरस्य गुणौघवारिधेः ।
कवीन्द्रमौलेर्वदनेन्दुनिस्सृतं
पिबन्तु सन्तः स्तुतिनूतनामृतम् ॥
श्रीपार्वतीपरमेश्वराभ्यां नमः ।

Authoı

Remarks—In RCMPL this work ıs attııbuted to Śankarācāıya but no confiımatoıy evıdence ıs extant hereın

---

॥ दक्षिणामूर्तिपञ्जरम् ॥

1210 X DAKSINĀMŪRTIPAÑJARAM.

Substance—Palm leaf Sıze—$5\frac{1}{2}'' \times 1\frac{7}{8}''$ Leaves—17. 7 lınes per page and 17 letters per lıne Scrıpt—Maıayālam No of Granthas—75.

Subȷect—Same as No 1165 A

Begınnıng etc—Same as No. 1165 C.

Colophon.

इति श्रीब्रह्माण्डपुराणे उत्तरभागे उपरिखण्डे गुहनारदसं-
वादे दक्षिणमूर्त्तिपञ्जरं नाम अष्टाशीतितमोऽध्यायः ।

Author:

Remarks—The work embodies the 88th chapter only in addition to two verses occurring at the end It is borrowed from the Brahmāndapurāna In No 1165 C it is referred to as the 18th chapter The last verse beginning with 'वटविटपि—" cited therein is missing here After colophon occur the following verses

ओन्नमः प्रणवार्थाय शुद्धज्ञानैकमूर्तये ।
निर्मलाय प्रसन्नाय दक्षिणामूर्तये नमः ॥

कैलासाद्रिनिभं शशाङ्कशकलस्फूर्जज्जटामण्डितं
नासालोकनतत्पर त्रिणयन वीरासनाध्यासितम् ।
मुद्राटङ्ककुरङ्गजानुविलसत्पाणि प्रसन्नाननं
कक्ष्याबन्धभुजङ्गमं मुनिवृतं वन्दे महेश परम् ॥

॥ दक्षिणामूर्त्यष्टकम् ॥

1210 Y DAKSINĀMŪRTYAṢṬAKAM.

Substance—Palm leaf Size—$5\frac{1}{2}'' \times 1\frac{7}{8}''$ Leaves—$3\frac{1}{2}$ 6 lines per page and 18 letters per line. Script—Malayālam. No of Granthas—25.

Subject etc.—Same as No 1160 H.

॥ किराताष्टकम् ॥

1210 Z KIRĀTĀSTAKAM

Substance—Palm leaf Size—5½" × 1⅞" Leaves—4
6—7 lines per page and 14 letters per line
Script—Malayālam No of Granthas—25

Subject—A panegyric of Śāsta

Beginning

प्रत्यर्थिव्रातवक्षःस्थलरुधिरसुरापानमत्तं पृषत्कं
चापे सन्धाय तिष्ठन्हृदयसरसिजे मामके तापहन्ता ।
पिञ्छोत्तंसः शरण्यः पशुपतितनयो नीरदाभः प्रसन्नो
देवः पायादपायाच्छबरवपुरसौ सावधानः सदा माम् ॥

आखेटाय वनेचरस्य गिरिजासक्तस्य शंभोस्सुत-
स्त्रातु यो भुवन पुरा समजनि ख्यातः किराताकृतिः ।
कोदण्डक्षुरिकाधरो घनरुचिः पिञ्छावतंसोज्ज्वलः
स त्वं मामव सर्वदा रिपुगणत्रस्त दयावारिधे ॥

यो मां पीडयति प्रसह्य सतत देही त्वदेकाश्रय
भित्त्वा तस्य रिपोरुरः क्षुरिकया शाताग्रया दुर्मतेः ।
देव त्वत्करपङ्कजोल्लासितया श्रीमत्किराताकृते
तत्प्राणान्वितरान्तकाय भगवन्कालारिपुत्राञ्जसा ॥

विद्धो मर्मसु दुर्वचोभिरसतां सन्तप्तशल्योपमै-
र्दीप्तानां द्विषदामशान्तमनसां खिन्नोऽस्मि यावद् भृशम् ।
तावत् त्वं क्षुरिकाशरासनधरश्चित्ते ममाविर्भवन्
स्वामिन्देव किराततरूप शमय प्रत्यर्थिगर्वं क्षणात् ॥

End :

हर्तुं वित्तमधर्मतो मम रताश्चोराश्च ये दुर्जना-
स्तेषां मर्मसु ताडयाशु विशिखैस्त्वत्कार्मुकान्निस्सृतैः ।
शास्तारं द्विषतां किरातवपुषं सर्वार्थदं त्वामृते
पश्याम्यद्य पुरारिपुत्र शरण नाहं पर दैवतम् ॥

यक्षप्रेतपिशाचभूतनिवहा दुःखप्रदा भीषणा
बाधन्ते नरशोणितोत्सुकधियो ये मां रिपुप्रेरिताः ।
चापज्यानिनदैस्त्वमीश सकलान्संहृत्य दुष्टग्रहान्
गौरीशात्मज दैवतेश्वर किराताकार सरक्ष माम् ॥

द्रो(दु?ग्धु) ये निरतास्त्वदीयपदपद्मैकान्तभक्ताय मे
मायाच्छन्नकलेबराश्च विषदानाद्यैः सदा कर्मभिः ।
वश्यस्तम्भनमारणाद्यकुशलप्रारम्भदक्षानरीन्
दुष्टान्संहर देवदेव शबराकार त्रिलोकीश्वर ॥

तन्वा वा मनमा गिरापि सतत दोषश्चिकीर्षन्त्यल
त्वत्पादप्रवणस्य मे निरपराधस्यापि ये मानुषाः ।
सर्वान्नाशय तान् गिरीशसुत मे तापत्रयौघानपि
त्वामेकं शबराकृते भयहर नाथ प्रपन्नोऽस्म्यहम् ॥

कष्ट राजभटैः सदापि परिभूतोऽहं खलैर्वारिभि-
श्चान्यैर्घोरतरे विपज्जलनिधौ मग्नोऽस्मि दुःखातुरः ।
हा हा किं करवै विभो शबरवेप त्वामभीष्टार्थदं
वन्देऽह परदैवतं कुरु कृपामार्तस्य बन्धो मयि ॥

Colophon :

स्तोत्र यः प्रजपेत् प्रशान्तकरणो नित्यं किराताष्टकं
स क्षिप्र वशगान्करोति नृपतीनाबद्धवैरानपि ।

महृत्यात्मविरोधिनः खलजलान्दुष्टग्रहानप्यमौ
यात्यन्ते यमदूतभीतिरहितो दिव्यां गतिं शाश्वतीम् ॥

Author

Remarks—After the colophon occur the subjoined lines

ओं ह्रीं किरातरुद्राय धनुर्धराय समृद्ध्ये स्वाहा ।
ओन्नमो भगवते शिवाय शिवपुत्राय श्यामाय कोमळाङ्गाय
धनुर्बाणाय किरातमूर्तये हौन्नमश्शिवाय हुं फट्००।

॥ सौराष्टकम् ॥

1210 A1 SAURĀSTAKAM

Substance—Palm leaf Size—$5\frac{1}{2}'' \times 1\frac{7}{8}''$. Leaves—2
6 lines per page and 19—20 letters per line.
Script—Malayālam No of Granthas—15

Subject etc —Same as No 1147 E.

Remarks—The following extraneous *śloka* occurs at the end of the Ms

" शरीरे जर्जरीभूते व्याधिग्रस्ते कलेबरे ।
औषध जाह्नवीतोय वैद्यो नारायणो हरिः ॥"

॥ महिम्नःस्तवः ॥

1211 A. MAHIMNASTAVA

Substance—Palm leaf Size—$4'' \times 1\frac{1}{2}''$ Leaves—12

8 lines per page and 16 letters per line. Script—Malayālam No of Granthas—100.

Subject etc.—Same as No 1158 J



॥ उग्रनृसिंहस्तोत्रम् ॥

1211 B UGRANRSIMHASTOTRAM.

Substance—Palm leaf Size—4" × 1½" Leaves—4. 6—7 lines per page and 12 letters per line. Script—Malayālam No of Granthas—20

Subject—A panegyric of Ugranrsimha.

Beginning

हरिः ।

गर्जन्तं गर्जयन्त निजभुजपटलं स्फोटयन्त हसन्त
क्रुध्यन्तं ताडयन्त दिवि भुवि दितिजान् क्षेपयन्तं किरन्तम् ।
छिन्दन्त दारयन्त दशदिशि सततं संहरन्तं ग्रसन्तं
पीताक्षं घूर्णयन्तं करनिकरशतैः श्रीनृसिंहं नमामि ॥

नमत्सर्वगीर्वाणकोटीरकोटि-
स्फुरद्रत्ननिर्यत्ननीराजिताङ्घ्रिम् ।
शरच्चन्द्रकोटिप्रभाभासुराङ्गं
नमस्कुर्महे वीरलक्ष्मीनृसिंहम् ॥

सभास्तम्भनिर्भेदनाविर्भवन्तं
ध्वनिस्तम्भिताशेषदम्भो(धि?लि)केळिम् ।
प्रचण्डस्फुरत्काण्डचण्डाट्टहासं
नमस्कुर्महे वीरलक्ष्मीनृसिंहम् ॥

End

विपन्नप्रपन्नार्तिविच्छेदहेतुं
ततो द्वैकृताप्राकृतात्मावतारम् ।
ततो निर्विकारं निराकारमेकं
नमस्कुर्महे वीरलक्ष्मीनृसिंहम् ॥

नमस्ते नमस्ते समस्तैकबन्धो
नमस्ते नमस्ते कृपापारसिन्धो ।
नमस्ते नमस्ते महावीरलक्ष्मी-
नृसिंहामराधीश देव प्रसीद ॥

Colophon

उग्रनृसिंहस्तोत्रं समाप्तम् ।
श्रीपद्मनाभाय नमः ।

Author

Remarks—In RCMPL this *stotra* and the next are missing

॥ लक्ष्मीनृसिंहस्तोत्रम् ॥

1211 C. LAKSMĪNRSIMHASTOTRAM.

Substance—Palm leaf Size—4″ × 1½″ Leaves—5. 7 lines per page and 11—12 letters per line Script—Malayalam No of Granthas—25.

Subject etc —Same as No 1164 J.

|| सुदर्शनकवचम् ||

1211 D SUDARŚANAKAVACAM

Substance—Palm leaf Size—4" × 1½" Leaves—4.
9 lines per page and 14—16 letters per line
Script—Malayālam No of Granthas—35

Subject etc —Same as No 1210 F

Colophon.

इति पाञ्चरात्रे विहगेन्द्रसंहितायामगस्त्याम्बरीषसंवादे षोडशोऽध्यायः ।

Author

Remarks—The work contains a portion of Vihagendrasamhitā in the Pañcarātra

---

|| माधवस्तवराजः ||

1212. MĀDHAVASTAVARĀJA.

Substance—Palm leaf. Size—10" × 2½" Leaves—14
5 lines per page and 20 letters per line.
Script—Malayālam. No of Granthas—100.

Subject—Same as No 1172 A23

Beginning etc.—Same as No 1146 F.

॥ माधवस्तवराजः ॥

1213 A MĀDHAVASTAVARĀJA

Substance—Palm leaf Size—8″×2″ Leaves—6
9 lines per page and 20 letters per line.
Script—Malayālam No of Granthas—100

Subject—Same as No 1172 A 23

Beginning etc —Same as No 1146 F

॥ कृष्णस्तवराजः ॥

1213 B KṚSNASTAVARĀJA

Substance—Palm leaf Size—8″×2″ Leaves—11
9 lines per page and 22 letters per line
Script—Malayālam No of Granthas—140

Subject—Same as No. 1172 A 23.

Beginning etc —Same as No 1146 E.

॥ कृष्णानुस्मृतिः ॥

1213 C. KṚSNĀNUSMṚTI.

Substance—Palm leaf Size—8″ 2″ Leaves—7
10 lines per page and 22 letters per line.
Script—Malayālam. No of Granthas—95

Subject—Same as No 1172 A 23

Beginning etc —Same as No. 1146 C.

॥ कृष्णस्तवः ॥

1213 D KRSNASTAVA

Substance—Palm leaf Size—8″ × 2″ Leaf—1
9 lines per page and 26 letters per line
Script—Malayālam No of Granthas—15

Subject—Same as No. 1172 A 23.

Beginning

हरिः । श्रीगणपतये नमः शुभमस्तु ।
चलत्कुटिलकुन्तलं ललितलीलमन्दागति ?
तरक्षुनखमण्डनं मधुरमुग्धमन्दा(न)नम् ।
क्वणत्कटकनूपुर रणितकिङ्किणीकङ्कणं
व्रजाङ्गणविभूषणं नमत नन्दगोपीसुतम् ॥

कळत्क्वणितवेणुके तनुनिपक्तगोरेणुके
त्रयीशिरसि निष्ठिते त्रिभुवनैकमूलेऽनिशम् ।
निसर्गसुकुमारके निखिलभक्तनिस्तारके
ममाभिरमतां मनो महसि घोषयोषित्प्रिये ॥

End

तमालतरुणप्रभ तरळलोचनामध्यग
गभीरमृदुलस्मित स्वरितवंशकाण्डाधरम् ।
तदप्रतिमविक्रमं प्रणतकामकल्पद्रुमं
महः किमपि मामके मनसि सन्निधत्तां चिरम् ।'

सुरासुरशिरोमणिं विजययानभूषामणिं
जगत्प्रणुतसन्मणि व्रजविलासिनीहृन्मणिम् ।

खलाहिविषनुन्मणिं सकललोकरक्षामणिं
रमाम्बुजदिवामणिं भजत भक्तचिन्तामणिम् ॥

Colophon

Author

Remarks—The works embodied in this Ms are not arranged in proper order in RCMPL

॥ कृष्णस्तवः ॥

1213 E KRSNASTAVA

Substance—Palm leaf Size—8″ × 2″ Leaf—1
10 lines per page and 26 letters per line
Script—Malayalam No of Granthas—16

Subject—Same as No 1172 A 23

Beginning etc—Same as No 1154 D

Colophon
इति कृष्णस्तवः समाप्तः ।

Remarks—The title is furnished by the colophon

॥ रामस्तवराजः ॥

1213 F RĀMASTAVARĀJA

Substance—Palm leaf Size—8″ × 2″ Leaves—6
10 lines per page and 24 letters per line
Script—Malayāḷam No of Granthas—90.

Subject—Same as No 1169 I.

Beginning

हरिः । श्रीरामाय नमः । अविघ्नमस्तु ।

सर्ववेदान्ततत्त्वज्ञं व्यासं सत्यवतीसुतम् ।
धर्मपुत्रः प्रहृष्टात्मा परिपप्रच्छ सादरम् ॥

युधिष्ठिरः—

भगवन् योगिनां श्रेष्ठ सर्वशास्त्रविशारद ।
किं तत्त्वं किं परं जप्यं किं ध्यानं मुक्तिसाधनम् ॥

ज्ञातुमिच्छामि तत्सर्वं ब्रूहि मे मुनिपुङ्गव ।
धर्मराज महाभाग शृणु वक्ष्यामि तत्त्वतः ॥

यत्परं यद् गुणातीतं यज्ज्योतिरमलं शिवम् ।
तदेव परमं तत्त्वं कैवल्यपदकारणम् ॥

श्रीरामेति परं जप्यं तारकब्रह्मसंज्ञितम् ।
ब्रह्महत्यादिपापघ्नमिति वेदविदो विदुः ॥

श्रीराम राम रामेति ये वदन्त्यपि सर्वदा ।
तेषां भुक्तिश्च मुक्तिश्च भविष्यति न संशयः ॥

स्तवराजः पुरा प्रोक्तो नारदेन महात्मना ।
तदहं सम्प्रवक्ष्यामि हरिध्यानपुरःसरम् ॥

End ·

इति श्रीरघुनाथस्य स्तवराजमनुत्तमम् ।
सर्वसौभाग्यसम्पत्तिदायकं मुक्तिदं शुभम् ।
ब्रह्मपुत्रेण कथितं वेदानां सारमुत्तमम् ।
गुह्याद् गुह्यतरं राजन् तव स्नेहात्प्रकीर्तितम् ॥

यः पठेच्छृणुयाद्वापि त्रिसन्ध्यं श्रद्धयान्वितः ।
ब्रह्महत्यादिपापानि तत्समानि बहूनि च ।
स्वर्णस्तेयसुरापानगुरुतल्पायुतानि च ।
सर्वपापैः प्रमुच्यन्ते कल्पायुतशतोद्भवैः ॥

वाचिकं मानसं पापं कर्मणा समुपार्जितम् ।
श्रीरामस्मरणेनैव व्यपोहति न संशयः ॥

श्रीरामचन्द्र रघुपुङ्गव राजवर्य
राजेन्द्र राम रघुनायक राघवेश ।

राजाधिराज रघुनन्दन रामभद्र
दासोऽहमद्य भवतः शरणं गतोऽस्मि ॥
दयानिधे राघव रामचन्द्र
निरस्य पापानि ममाखिलानि ।
त्वय्येव भक्तिं सुदृढां प्रयच्छ
सैव प्रसूते सकलानभीष्टान् ॥

Colophon

इति श्रीब्रह्माण्डपुराणे हिरण्यगर्भसंहितायां ब्रह्मनारद-संवादे श्रीरामस्तवराजः समाप्त. । हरिः शुभमस्तु ।
श्रीरामलक्ष्मणभरतशत्रुघ्नसीताहनुमद्भ्यो नमः । हरिः ।

Author

Remarks—The work is borrowed from the *Hiranyagarbhasamhitā* in the Brahmāndapurāna

---

॥ रामानुस्मृतिः ॥

1213 G RĀMĀNUSMṚTI

Substance—Palm leaf Size—8″ × 2″ Leaf—1
10 lines per page and 28 letters per line.
Script—Malayālam No of Granthas—18

Subject—Same as No 1169 I

Beginning

हरिः

वन्दे रामं जगद्वन्द्यं सुन्दरास्यं शुचिस्मितम् ।
कन्दर्पकोटिलावण्यं कामितार्थप्रदायकम् ॥

भास्वत्किरीटकटककटिसूत्रोपशोभितम् ।
विशाललोचनं भ्राजत्तरुणारुणकुण्डलम् ॥

श्रीवत्सकौस्तुभलसद्वक्षसं वनमालिनम् ।
मुक्ताहारविशोभाढ्यमुद्रिकारत्नभास्वरम् ॥

End

षोडशैतानि नामानि रामचन्द्रस्य नित्यशः ।
पठेद्विद्वान् स्मरन् रामं स एव स्याद्रघूत्तमः ॥

श्रीरामभक्तिरचला भवत्येव हि सर्वदा ।
मरणे समनुप्राप्ते राघवस्सीतया सह ॥

हृदि सन्दृश्यते तस्य साक्षात् सौमित्रिणा सह ।
मुच्यतेऽनुस्मृतिं जप्त्वा मृत्युदारिद्र्यपातकैः ॥

Colophon

इति श्रीब्रह्माण्डपुराणे हिरण्यगर्भसंहितायां रामानुस्मृतिस्तोत्रं समाप्तम् । हरिः ।

Author:

Remarks—The daily recital of this hymn ensures emancipation from all worldly miseries

---

॥ नृसिंहाष्टकम् ॥

1213 H NṚSIMHĀSTAKAM

Substance—Palm leaf Size—8″ × 2″ Leaf—1
10—11 lines per page and 26 letters per line
Script—Malayālam No of Granthas—18

Subject etc —Same as No 1172 A7

॥ नृसिंहाष्टकम् ॥

1213 I NṚSIMHĀSTAKAM

Substance—Palm leaf Size—8″ × 2″. Leaves—1½
11 lines per page and 24 letters per line Script
—Malayālam No of Granthas—25

Subject etc —Same as No 1172 A 7

॥ आत्मार्पणस्तवः ॥

1213 J ĀTMĀRPAṆASTAVA

Substance—Palm leaf Size—8″ × 2″ Leaves—7.
10 lines per page and 24 letters per line
Script—Malayālam No of Granthas—105

Subject etc —Same as No 1145

॥ विष्णुस्तवः ॥

1213 K VISNUSTAVA

Substance—Palm leaf Size—8″ × 2″ Leaves—3
10 lines per page and 24 letters per line
Script—Malayālam No of Granthas—45

Subject —Same as No 1172 A 23

Beginning

हरिः

श्रीनारद उवाच—

नमः पराय देवाय परात्परतराय च ।
परापरनिवासाय सगुणायागुणाय च ॥
ज्ञानाज्ञानस्वरूपाय धर्माधर्मस्वरूपिणे ।
विद्याविद्यास्वरूपाय सुस्वरूपाय ते नमः ॥
अमायायात्मसंज्ञाय मायिने योगरूपिणे ।
योगेश्वराय योगाय योगगम्याय ते नमः ॥
ज्ञानाय ज्ञानगम्याय सर्वज्ञानैकहेतवे ।
ज्ञानेश्वराय दिव्याय ज्ञानवेद्याय ते नमः ।
ध्यानाय ध्यानगम्याय ध्यातृपापहराय च ।
सत्स्वरूपाय सुधिये तस्मै शुद्धात्मने नमः ॥

End ·

सर्वतश्चमयं शान्तं सर्वस्रष्टारमीश्वरम् ।
सहस्रशीर्षं देवं तं वन्दे भावनामयम् ॥
यद्भूत यच्च वै भव्य जगत् स्थावरजङ्गमम् ।
दशाङ्गुलं योऽत्यातिष्ठत्तमीशमजर भजे ॥

अणोरणीयांसमजं महताञ्च महत्तरम् ।
गुह्याद् गुह्यतमं देवं प्रणमामि पुनः पुनः ॥
ध्यातः स्मृतः पूजितो वा स्तुतो वा नमितोऽपि वा ।
स्वपदं यो ददातीशस्त वन्दे पुरुषोत्तमम् ॥

Colophon

य इद नारदस्तोत्रं प्रातरुत्थाय यः पठेत् ।
सर्वपापविनिर्मुक्तो ब्रह्मलोके महीयते ॥
हरिः । शुभमस्तु । श्रीकृष्णाय नमः ।

Author—Nāıada

Remarks—Thıs work ıs also known by the tıtle Nāıadastotra as ıs evıdent from the colophon

---

॥ अपामार्जनस्तवः ॥

1213 L APĀMĀRJANASTAVA.

Substance—Palm leaf. Sıze—8″ × 2″. Leaves—9. 11 lınes peı page and 28 letters per lıne. Scrıpt—Grantha No of Granthas—175.

Subȷect—Same as No 1172 A 23.

Begınnıng

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

दाल्भ्य उवाच—

भगवन् प्राणिनः सर्वे विषरोगाद्युपद्रवैः ।
दुष्टग्रहोपघातैश्च सार्वकालमुपद्रुताः ॥

आभिचारककृत्याभिः स्पर्शरोगैश्च दारुणैः ।
सदा संपीड्यमानास्तु तिष्ठन्ति मुनिसत्तम ॥
येन कर्मविपाकेन विषरोगाद्युपद्रवाः ।
प्रभवन्ति नृणां तन्मे यथावद्वक्तुमर्हसि ॥

पुलस्त्य उवाच—

व्रतोपवासैर्येर्विष्णुर्नान्यजन्मनि तोषितः ।
ते नरा मुनिशार्दूल ग्रहरोगादिभागिनः ॥
यैर्न तत्प्रणतं चित्तं सर्वदेवनरैः कृतम् ।
विषज्वालाग्रहाणां ते मनुष्या दाल्भ्य भा(ज्ञि?गि)नः ॥

End

इदं स्तोत्र जपन् रुग्णः कुशैः सम्मार्जितः शुचिः ।
व्याध्यपस्मारकुष्ठादिपिशाचोरगराक्षसाः ॥

तस्य पार्श्वं न गच्छन्ति स्तोत्रमेतत्तु यः पठेत् ।
यश्चेदं धरते विद्वान् श्रद्धाभक्तिसमन्वितः ॥
ग्रहास्तं नोपसर्पन्ति भूतवेतालराक्षसाः ।
धन्यो यशस्वी धृतिमान् स्वाध्यायी मुनिसत्तम ॥

शृण्वन् गृणन् पठन् यः स विष्णुमाहात्म्यमुत्तमम् ।
वाराहं नारसिंहश्च वामनं विष्णुमेव च ॥

स्मरञ्जपेदिदं स्तोत्र सर्वदुष्टोपशान्तये ।
आर्ता विषण्णाः शिथिलाश्च भीता घोरेषु च व्याधिषु वर्तमानाः ॥
सङ्कीर्त्य नारायणशब्दमात्रं विमुक्तदुःखाः सुखिनो भवन्तु ॥

Colophon

श्रीविष्णुधर्मे दाल्भ्यपुलस्त्यसंवादे अपामार्जनस्तोत्रं नाम एकोनत्रिंशोऽध्यायः ।

हरिः । शुभमस्तु ।

Author

Remarks—The recital of this *stotra*, occurring in Visnudharma, is capable of warding off the evil influences of planets

---

॥ गोविन्दस्तवराजः ॥

1213 M GOVINDASTAVARĀJA.

Substance—Palm leaf Size—8″ × 2″ Leaves—9 10—12 lines per page and 44 letters per line. Script—Malayālam No of Granthas—150

Subject—A panegyric of Govinda.

Beginning.

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

शौनकः—

अम्बरीष शुभं वाक्य मयोक्त श्रृणु भक्तितः ।
धर्मार्थकाममोक्षार्थं कुरु गोविन्दकीर्तनम् ॥

यदीच्छसि पर ज्ञान ज्ञानात्तत्परमं पदम् ।
तदादरेण राजेन्द्र कुरु गोविन्दकीर्तिनम् ॥

कर्मणा मनसा वाचा यदीच्छासि भवक्षयम् ।
तदाजस्र महीपाल कुरु गोविन्दकीर्तनम् ॥

सर्वरोगविनाशाय चात्मनः शुभकाम्यया ।
अहर्निशं तदा राजन् कुरु गोविन्दकीर्तिनम् ॥

संसारानलतापस्य यदीच्छसि शम नृप ।
तदा चित्तं स्थिरं कृत्वा कुरु गोविन्दकीर्तिनम् ॥

End·

यः पठेत्कलिकाले तु गोविन्दाख्य महास्तवम् ।
प्रवेशो नास्ति पापस्य नाशं यान्ति भयान्यपि ॥
लिखित तिष्ठते यस्य गोविन्दाख्य महास्तवम् ।
ग्रहाः सानुग्रहा नित्यं सुप्रसन्नाः पितामहाः ॥
तुष्टि कुर्वन्ति विबुधाः कलौ गोविन्दकीर्तनम् ।
गोविन्देति कृतोच्चारे विबुद्ध्यन्ति मनांसि च ॥
विकसन्ति महीपाल यथा पद्मं भगोदये ।
सिद्ध्यन्ति सर्वकार्याणि मनसा चिन्तितान्यपि ॥
गोविन्देति कृतोच्चारे अहन्यहनि भूमिप ।
क्षिप्ता कालिमुखं पांसून्नेत्राभ्याश्च सुरेश्वर ॥
गतोऽसौ परमं लोक कृत्वा गोविन्दकीर्तनम् ।

Colophon

इति गारुडपुराणे शौनकाम्बरीषसंवादे सर्वप्रायश्चित्ताख्य-गोविन्दस्तवराजो नाम पञ्चविंशोऽध्यायः । हरिः । गोवि-न्दाय नमः । शुभमस्तु ।

Author

Remarks—The work begins with a dialogue between Śaunaka and Ambarīsa The colophon denotes that it is a portion of the Garuḍa-purāna

॥ विष्णुपञ्जरम् ॥

1213 N VISNUPAÑJARAM.

Substance—Palm leaf Size—8″ × 2″ Leaves—3
10 lines per page and 24 letters per line
Script—Malayālam No of Granthas—35

Subject—Same as No 1165 B

Beginning etc.—Same as No 1064 E

Author

Remarks—The work opens with a dialogue between Śatānīka and Śaunaka It contains the rites of chanting mantras and the effects thereof. The Gītātrıstup mantra occurring prior to the beginning is given below

हरिः । श्रीगणपतये नमः ।

स्थाने हृषीकेश तव प्रकीर्त्या
सहस्रार हुंफट् हृदयाय नमः ।
जगत्प्रहृष्यत्यनुरज्यते च
सहस्रार हुंफट् शिरसे स्वाहा ।
रक्षांसि भीतानि दिशो द्रवन्ति
सहस्रार हुंफट् शिखायै वषट् ।
सर्वे नमस्यन्ति च सिद्धसङ्घाः
सहस्रार हुंफट् कवचाय हुम् ।
स्थाने हृषीकेश तव प्रकीर्त्या
जगत्प्रहृष्यत्यनुरज्यते च ।
रक्षांसि भीतानि दिशो द्रवन्ति
सर्वे नमस्यन्ति च सिद्धसङ्घाः ॥

सहस्रार हुफट् अस्त्राय फट् ब्रह्मबृहस्पती ऋषिः । अनुष्टुप्-त्रिष्टुभौ छन्दसी । विश्वरूपविष्णुर्देवता ।

The following verses are seen at the end of the Ms

यज्ञेश यज्ञपुरुषाच्युत तीर्थपाद
तीर्थश्रवःश्रवणमङ्गलनामधेय ।
आपन्नलोकवृजिनोपशमोदयाद्य
शं नः कृधीश भगवन्नरविन्दनाभ ॥

विश्वाय विश्वभवनस्थितिसंयमाय
स्वैरं गृहीतपुरुशक्तिगुणाय भूम्ने ।
स्वच्छाय शश्वदुपबृंहितपूर्णबोध-
व्यापादितात्मतमसे हरये नमस्ते ॥

आयुः पर वपुरभीष्टमतुल्यलक्ष्मी-
र्द्यौर्भूरसास्सकलयोगगुणस्त्रिवर्गः ।
ज्ञान च केवलमनन्त मवन्ति तुष्टात्
त्वत्तो नृणां किमु मपत्नजयाधिनाशः ॥

श्रीकृष्ण विष्णो नृहरे मुरारे
प्रद्युम्न सङ्कर्पण वासुदेव ।
अजानिरुद्धामल पद्मनाभ
त्व पाहि नः सर्वभयादजस्रम् ॥
हरये नमः ।

॥ नृसिंहध्यानम् ॥

1213 O NRSIMHADHYĀNAM.

Substance—Palm leaf. Size—8″×2″ Leaves—2.

11 lines per page and 24 letters per line
Script—Malayālam No of Granthas—15

Subject—Meditation on Nṛsimha

Beginning

उग्रमुग्रतरोदग्रनखाग्रदलितासुरम् ।
स्वर्गापवर्गदं वन्दे सर्वपापहर हरिम् ॥
वीर विदारितारातिशोणितारुणविग्रहम् ।
वारणारिमुखं वन्दे सर्वपापहरं हरिम् ॥
महाविष्णु महाबाहुं विमर्दितसुरद्विपम् ।
महाकारुणिकं वन्दे सर्वपापहरं हरिम् ॥
ज्वलन्तं लोचनज्वालादग्धदानवसैनिकम् ।
ज्वलनोद्गारिणं वन्दे सर्वपापहरं हरिम् ॥
सर्वतोमुखमीशानं सर्वतोबाहुपादकम् ।
सर्वतोनयनं वन्दे सर्वपापहर हरिम् ॥

End

अहमाद्यन्तरहितमात्मान जगतां परम् ।
अमितानन्दगं वन्दे सर्वपापहर हरिम् ॥
महामन्त्रमय स्तोत्रं महापातकनाशनम् ।
यः पठेद् भक्तिमानेतत् स भवेत् पुरुषोत्तमः ॥
जान्वोरासक्ततीक्ष्णस्वनखरुचिलसद्बाहुसंस्पृष्टकेशं
चक्रं शङ्खञ्च दोर्भ्यां दधदनलसमज्योतिषा भग्नदैत्यम् ।
ज्वालामालापरीतं रविशशिदहनत्रीक्षणं दीप्तजिह्वं
दंष्ट्रोग्रं धूतकेशं वदनमपि वहन् पातु वो नारसिंहः ॥
इति ध्यानम् । शुभमस्तु ।

Colophon

Author

Remarks—The Ms is in neat legible hand

॥ नारायणकवचम् ॥

1213 P NĀRĀYANAKAVACAM

Substance—Palm leaf Size—8" × 2" Leaves—4
10 lines per page and 24—30 letters per line.
Script—Malayālam No of Granthas—50

Subject—A panegyric of Nārāyana

Beginning

हरिः । श्रीगणपतये नमः । श्रीगुरुभ्यो नमः ।

शिवः—

शृणु वक्ष्यामि सर्वेषां साधकानां महात्मनाम् ।
श्रीमदष्टाक्षराधीशकवचं पुण्यवर्धनम् ॥

सर्वपापप्रश(मं?मनं) सर्वदुःखनिवारणम् ।
दारिद्र्यदोषशमनं धनधान्यविवर्धनम् ॥

सर्वव्याधिभयापह्नं सर्वसौख्यबलावहम् ।
सर्वदुष्टशमनं सर्वशत्रुनिवारणम् ॥

सर्वरक्षाकरं दिव्यं सर्वसम्पत्समृद्धिदम् ।
सर्वलोकैकविजयं सर्वाभीष्टार्थसिद्धिदम् ॥

नानामृत्युहर श्रेष्ठमायुरारोग्यवर्धनम् ।

सन्तानसिद्धिद ह्यं धर्मकामार्थमोक्षदम् ।
ब्रह्मादिभिः सुरैः सर्वैर्वसिष्ठादिमुनीश्वरैः ॥
महाबलादियोगीन्द्रैः स्तूयमानमनुत्तमम् ।
य इद कवच मन्त्री जपेद् ब्राह्ममुहूर्तके ।
चतुस्सन्ध्यासु वा नित्य भवेत्सर्वार्थसिद्धिमान् ॥

End

नारायणाख्यं कवचं महामन्त्र परात्परम् ।
यः पठेच्छृणुयाद्वापि मुच्यते सर्वपातकैः ॥
सायं प्रातर्जपेन्नित्यं नारायणपरायणः ।
नित्यकल्याणतुष्टात्मा निर्वृति परमां व्रजेत् ॥
श्रीनारायणकवच यः शृणोत्यभ्यसेज्जपत् ।
पुस्तके विलिखेत् पश्येत् पूजयेदुपलालयेत् ॥
श्रावयेदखिलान् वापि कथाभिः परितोषयेत् ।
स नरः शुद्धचित्तात्मा सर्वोत्तमपदं लभेत् ॥
इति निखिलरहस्यशास्त्रसूक्ष्मभेद-
क्रमकवचं विकल्पगोत्रमार्गमन्त्रम् ।
बहुकलनविचित्रभाग्यदीर्घसिद्ध्यै
परिचयतु समस्तगात्रनेत्रमन्त्री ॥

Colophon

इति महार्णवतन्त्रे ज्ञानपराङ्कुशरहस्याष्टार्णमहाविद्याकल्पे प्रत्यक्षसिद्धिप्रदे उमामहेश्वरसंवादे श्रीनारायणकवचं नाम षोडशोऽपदेशः ।

श्रीरमेशाय नमः ।

Author :
47

Remarks—The Ms deals with the methods of chanting mantras and the practices connected therewith It commences with Śiva's sermon to Pārvati The work is borrowed from the Mahārnavatantra

---

॥ विष्णुनामाष्टोत्तरशतम् ॥

1213 Q VISNUNĀMĀSTOTTARASATAM

Substance—Palm leaf Size—8'×2" Leaves—2½
11 lines per page and 24 letters per line
Script—Malayālam No of Granthas—40.

Subject—Enumeration of 108 appellations of Visnu.

Beginning

श्री रमेशाय नमः ।

शिवः—

श्रृणु वक्ष्ये रमेशस्य नाम्नामष्टोत्तरं शतम् ।
सर्वपापप्रशमनं सर्वदोषनिवारणम् ॥
सर्वदुःखहर दिव्य सर्वशत्रुविनाशनम् ।
महारोगोपशमनं महामृत्युविभञ्जनम् ॥
सर्वकल्याणद श्रेष्ठं सर्वसौभाग्यवर्धनम् ।
नानाविजयदं हृद्यं नानामोहनिवर्तकम् ॥
नानाविधपदैश्वर्यभोगभाग्यबलावहम् ।
अमोघमतुलं साक्षान्नारायणमनोमयम् ॥
धर्मार्थकाममोक्षैकहेतुकं ब्रह्मसिद्धिदम् ।
श्रीनामाष्टोत्तरशतमहामन्त्रस्य तत्परः ।
ऋषिश्छन्दो देवता चानुष्टुप् नारायणः परः ।

End :

अथवेमाश्वपत्तीनां प्राणबाधकर्मकटम् ।
भविष्यति न सन्देहस्तस्य नारायणाज्ञया ॥
एवमाद्याखिले कर्मण्यनुक्ते मन्त्रनिचयम ।
तथा तथा जपेत् मद्यस्तत्तदिष्टार्थसिद्धये ॥

इति जपविधिसूक्ष्मं सर्वसूक्ष्मोत्तमाश्च
गुरुवरमुखपद्मात् सावधानेन मन्त्री ।
असकृदमलबुद्ध्याकर्ण्य वर्णक्रमज्ञो
जपतु सकलसिद्ध्यै दिव्यनारायणात्मा ॥

Colophon

इति श्रीमहार्णवतन्त्रे ज्ञानपराङ्कुशरहस्यसंहितायामष्टाक्षरमहाविद्याकल्पे प्रत्यक्षसिद्धिप्रद उमामहेश्वरसंवादे नामजपलक्षणं नाम चतुर्थोऽपदेशः ।

Author

Remarks — The title "Visnunāmajapalaksanam" given in the colophon is more appropriate The text is borrowed from the Mahārnavatantra.

॥ एकादशीमाहात्म्यम् ॥

1213 R EKĀDAŚĪMĀHĀTMYAM

Substance—Palm leaf Size—8″ × 2″ Leaves—5
10 lines per page and 28 letters per line
Script—Malayālam No. of Granthas—90,

Subject—Glorification of the Ekādaśīvrata.

Beginning

हरिः श्रीगणपतये नमः । अविघ्नमस्तु ।
शुभे मार्गशिरे मासि दशम्यां नियतेन्द्रियः ।
पञ्चशुक्लः समश्नीयादेकवारमकुत्सितः ॥
मनश्शुक्लोऽथ वाक्शुक्लः कर्मशुक्लस्तथैव च ।
दन्तशुक्लो वस्त्रशुक्लः पञ्चशुक्लोऽयमीरितः ॥
कोद्रवान्नं कलञ्जं च मसूरं शणकं तथा ।
गृञ्जनं चारनाकञ्च लशुनं तुम्बमेव च ॥
निष्पावमधुमांसानि तैलं माहिषकं दधि ।
क्षीरं घृतं चाविकञ्च दशम्यां परिवर्जयेत् ॥
द्वादश्यां वापि राजेन्द्र स्त्रियमभ्यङ्गमेव च ।
भुक्त्वा यथावदाचम्य कुर्याद्वा दन्तधावनम् ॥
तत आचम्य सस्मृत्य देवं नारायणं हरिम् ।
अनुज्ञां प्राप्य विप्रेभ्यः प्रणिपत्येदमीरयेत् ॥
एकादश्यां निराहारः स्थित्वाऽहनि परे ह्यहम् ।
भोक्ष्यामि पुण्डरीकाक्ष शरणं मे भवाच्युत ॥

End

तदेतदखिलं प्रोक्तं संक्षेपेण वरानने ।
एकादशीव्रतं पुण्यं सर्वपापभयापहम् ॥
इति तस्य वचः श्रुत्वा शङ्करस्य महात्मनः ।
उपोष्यैकादशीं देवी पूजयामास केशवम् ॥
रात्रौ जागरणं कृत्वा प्रातः स्नात्वा यथाविधि ।
पूजयेद्देवदेवेशं पुनर्विप्रांश्च भोजयेत् ॥

दक्षिणाश्च ततो दत्त्वा वित्तशाठ्यविवर्जितः ।
अनुज्ञां प्राप्य विप्रेभ्यस्ततो भुञ्जीत वाग्यतः ॥

Colophon

Author

Remarks—The work commences with Śiva's sermon to Pārvatī

॥ विष्णुस्तुतिः ॥

1213 S VISNUSTUTI

Substance—Palm leaf Size—8″ × 2″ Leaves—2½
10 lines per page and 26—30 letters per line.
Script—Malayālam No of Granthas—40

Subject—Same as No 1165 B

Beginning

केचित्स्वदेहान्तर्हृदयावकाशे
प्रादेशमात्रं पुरुषं वसन्तम् ।
चतुर्भुज कञ्जरथाङ्गशङ्ख-
गदाधरं धारणया स्मरन्ति ॥

प्रसन्नवक्त्रं नलिनायतेक्षणं
कदम्बकिञ्जल्कपिशङ्गवाससम् ।
लसन्महारत्नहिरण्मयाङ्गदं
स्फुरन्महारत्नकिरीटकुण्डलम् ॥

उन्निद्रहृत्पङ्कजकर्णिकालये
योगेश्वरास्थापितपादपल्लवम् ।
श्रीलक्षणं कौस्तुभरत्नकन्धरम्
अम्लानलक्ष्म्या वनमालयाचितम् ॥

End

मनिद्वयश्रियमधिक्षिपदब्जनेत्रं
ध्यायेन्मनोमयमतन्द्रितमुल्लसद्भ्रु ।
तस्यावलोकमधिकं कृपयातिघोर
तापत्रयोपशमनाय निसृष्टमक्ष्णोः ॥

स्निग्धस्मितानुगुणित विपुलप्रसादं
ध्यायेच्चिरं विततभावनया गुहायाम् ।
हास हरेरवनताखिललोकतीव्र-
शोकाश्रुसागरविशोषणमत्युदारम् ॥

सम्मोहनाय रचितं निजमाययास्य
भ्रूमण्डलं मुनिकृते मकरध्वजस्य ॥

ध्यानायन प्रहसित बहलाधरोष्ठ-
भासारुणायिततनुद्विजकुन्दपङ्क्ति ।
ध्यायेत दहकुहरे वसितस्य विष्णो-
र्भक्त्यार्द्रयार्पितमना न पृथग्दिदृक्षेत् ॥

Colophon

Author ·

Remarks—This panegyric is borrowed from the Bhāgavata The following verse occurs at the end of the Ms.

"नक्तं हविष्यान्नमनोदनं च
मूल फलं क्षीरमथाज्यमम्बु ।
यत्र च गव्यं तुलसी च वायुः
प्रशस्तमत्रोत्तरमुत्तरं च ॥"

॥ नारायणादिध्यानमन्त्राः ॥

1213 T NĀRĀYAṆĀDIDHYĀNAMANTRA.

Substance—Palm leaf Size—8" × 2" Leaves—5
10 lines per page and 26—30 letters per line
Script—Malayālam No of Granthas—75.

Subject—Meditation on Nārāyana, etc

Beginning

हरिः श्रीगणपतये नमः । शुभमस्तु ।

साध्यनारायण ऋषिः । देवी गायत्री च्छन्दः । परमात्मा देवता ।

अर्कौघाभं किरीटान्वितमकरलसत्कुण्डलं दीप्तिराज-
त्केयूर कौस्तुभाभाशबळरुचिरहारं सपीताम्बरञ्च ।
नानारत्नांशुभिन्नाभरणशतयुतं श्रीधराश्लिष्टपार्श्वं
वन्दे दोस्सक्तचक्राम्बुरुहदरगद विश्ववन्द्य मुकुन्दम् ॥

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं
विश्वाकारं गगनसदृश मेघवर्णं शुभाङ्गम् ।
लक्ष्मीकान्तं कमलनयनं योगिहृद्ध्यानगम्य
वन्दे विष्णु भवभयहरं सर्वलोकैकनाथम् ॥

End


वीर नरसिंह महाविष्णो दिव्यरूप जगत्पते भञ्ज भञ्जारिपक्षवि-
नाशेन त्रासय त्रासय देव तुभ्यं नमोऽस्तु हुफट् स्वाहा ।

उज्ज्वलत्प्रलयानलाभमयुग्मनेत्रमनाग्तं
भासुरं शिखिनः शिखाभिरुदग्रदंष्ट्रमुखाम्बुजम् ।
रक्षसां भयदायिकीर्णमटाकलापविभीषणं
चक्रशङ्खकृपाणखेटकधारिणं नृहरिं स्मरेत् ॥

Colophon

Author

Remarks—The verses of meditation on Nārāyana, Śrī Rāma, Kisna, Sadāsiva, Gauri, Vāsudeva and Nrsimha etc and the Rsi, and metre pertaining thereto are cited in the course of the work.



॥ द्वादशाक्षरध्यानादि ॥

1213 U DVĀDASĀKSARADHYĀNĀDI

Substance—Palm leaf Size—8″ 2″ Leaf—1. 11 lines per page and 40 letters per line Script—Malayālam No of Granthas—20

Subject—Meditation on Vāsudeva, etc.

Beginning·

श्रीमहागणपतये नमः । प्रजापति ऋषिः । गायत्री च्छन्दः । विष्णुर्देवता । ओन्नमो भगवते वासुदेवाय । साध्यनारायण ऋषिः । अनुष्टुप्च्छन्दः । लक्ष्मीनारायणो देवता । ओन्नमो भगवते विष्णवे श्रीसालग्रामनिवासिने श्रीपतये सर्वाभीष्टफलप्रदायिने सर्वपापप्रणाशनाय महाविष्णवे हुफट् स्वाहा ।

End

सालग्राममन्त्रस्य प्रजापति ऋषिः । तृष्टुप्छन्दः । वीरनरसिंहविष्णुर्देवता ।

वीरनरसिंह महाविष्णो दिव्यरूप जगत्पते भञ्जभञ्जारिपक्षविनाशन त्रामय त्रामय देव तुभ्यन्नमोऽस्तु हुंफट् स्वाहा ।

उज्ज्वलत्प्रळयानलाभमयुग्मनेत्रमनारत
भासुरं शिखिनः शिखाभिरुदग्रदंष्ट्रमुखाम्बुजम् ।
रक्षमां भयदायिकीर्णसटाकलापविभीषणं
चक्रशङ्खकृपाणखेटकधारिणं नृहरि स्मरेत् ॥

Colophon

Author

Remarks—The work includes not only the mantra and Dhyāna concerning Dvādasākṣara but also the meditative mantras on Nṛsimha

। गुरुस्तवः ॥

1213 V. GURUSTAVA.

Substance—Palm leaf Size—8″ × 2″ Leaf—1. 10 lines per page and 28 letters per line. Script—Malayālam No of Granthas—18

Subject—Glorification of preceptors

Beginning ·

हरिः श्रीगणपतये नमः । श्रीगुरुभ्यो नमः ।
यस्य प्रसादादहमेव विष्णुर्मय्येव सर्वं परिकल्पितञ्च ।
इत्थं विजानामि सदात्मरूपं तस्याङ्घ्रिपद्मं प्रणतोऽस्मि नित्यम् ॥

नारायणं पद्मभुवं वसिष्ठं शक्तिञ्च तत्पुत्रपराशरञ्च ।
व्यासं शुकं गौडपदं महान्तं गोविन्दयोगीन्द्रमथास्य शिष्यम् ॥
श्रीशङ्कराचार्यमथास्य पद्मपादञ्च हस्तामलकञ्च शिष्यम् ।
तं तोटकं वार्तिककारमन्यानस्मद्गुरून् सन्ततमानतोऽस्मि ॥

End

शङ्करं शङ्कराचार्यं केशवं बादरायणम् ।
सूत्रभाष्यकृतौ वन्दे भगवन्तौ पुनः पुनः ॥
गुरुरेव शिवश्चात्मा नामरूपक्रियात्मकः ।
स्वप्रकाशो न दृग्दृश्यस्तस्मै श्रीगुरवे नमः ॥

Colophon

Author

Remarks—The subjoined *slokas* are quoted at the close of the work

अविनयमपनय विष्णो दमय मनश्शमय विषयमतितृष्णाम् ।
भूतदयां विस्तारय तारय संसारसागरतः ॥
दिव्यधुनीमकरन्दे परिमळपरभागसच्चिदानन्दे ।
श्रीपदपदारविन्दे भवभयखेदच्छिदी वन्दे ॥
उद्धृतनग नगभिदनुज दनुजकुलामित्रतमित्रशशिदृष्टे ।
दृष्टे भवति प्रभवति भवति न किं भवतिरस्कारः ॥
सत्यपि भेदापगमे नाथ तवाहं न मामकीनस्त्वम् ।
सामुद्रो हि तरङ्गः क्वचन समुद्रो न तारङ्गः ॥
मत्स्यादिभिरवतारैरवतारवता वतावता वसुधाम् ।
परमेश्वर परिपाल्यो भवता भवतापभीतोऽहम् ॥

दामोदर गुणमन्दिर सुन्दरवदनारविन्द गोविन्द ।
भवजलधिमथनमन्दर परमन्दरमपनय त्वं मे ॥
नारायण करुणाकर शरणं करवाणि तावकौ चरणौ ।
इति षट्पदी मदीये वदनसरोजे सदा वसतु ॥

॥ लक्ष्मीनृसिंहस्तवः ॥

1213 W LAKSMĪNRSIMHASTAVA

Substance—Palm leaf Size—8" × 2" Leaf—½
10 lines per page and 28 letters per line
Script—Malayālam No of Granthas—8

Subject—Same as No 1104 J

Beginning

चेतोभृङ्ग भ्रमसि वृथा भवमरुभूमौ विरसायाम् ।
भज भज लक्ष्मीनरसिंहमनघपदसरसिजमकरन्दम् ॥
शुक्तौ रजतप्रतिभा जाता कटकाद्यर्थसमर्था जयतु ।
दुःखमयी ते संसृतिरेषा निर्वृतिदाने निपुणा स्यात् ॥
चेतोभृङ्ग ।
आकृतिसाम्याच्छल्मलिकुसुमे स्थलनलिनत्वभ्रममकरोः ॥
गन्धरसाविह किमु विद्येते विफलं भ्राम्यसि विसृजैनम् ।
चेतोभृङ्ग ॥

End

त . . . व हितमेकं वक्ष्ये शृणु सुखकामो यदि तत्त्वम् ।
स्वप्ने दृष्टं सकलं हि मृषा जाग्रति च स्मर तद्वदिति ॥

चेतोभृङ्ग भ्रमसि वृथा भवमरुभूमौ विरमायाम् ।
भज भज लक्ष्मीनरसिंहमनघपदसरसिजमकरन्दम् ॥

Colophon :

Author

Remarks—This work is composed in conformity with the rules of music

---

॥ रामध्यानादि ॥

1213 X RĀMADHYĀNĀDI

Substance — Palm leaf Size—8″ 2″ Leaf—1
11 lines per page and 32 letters per line
Script—Malayālam No of Granthas—20

Subject—Meditation on Rāma, etc.

Beginning.

सरयूतीरमन्दारवेदिकापङ्कजासने ।
वीरासने समासीनं ज्ञानमुद्रालसत्करम् ॥
वामजानुन्यस्तहस्तं सीतालक्ष्मणसेवितम् ।
अवेक्ष्यमाणमात्मानमात्मनामिततेजसम् ॥
शुद्धस्फटिकसङ्काशं केवल मोक्षकाङ्क्षया ।
भावयेत् परमात्मान रामं राजीवलोचनम् ॥

ब्रह्म ऋषिः । गायत्रीच्छन्दः । श्रीरामो महाविष्णुर्देवता । श्री-
नारद ऋषिः । गायत्रीच्छन्दः । श्रीकृष्णो देवता ।

End ·

ओन्नमः किरीटकेयूरहारमकरकुण्डलालङ्कृतशङ्खचक्रगदाब्ज-हस्तपीताम्बरधरश्रीवत्साङ्कितवक्षस्थलश्रीभूमिसहितस्वात्मज्यो (?) तिष्टिकराय सहस्रादित्यतेजसे नमः ।

Colophon

Author

Remarks — The work deals with meditation on Rāma and Kisna

॥ घण्टाकर्णमन्त्रः ॥

1213 Y. GHANTĀKARNAMANTRA

Substance—Palm leaf Size—8″×2″ Leaf—½. 11 lines per page and 30 letters per line. Script—Malayālam No of Granthas—10.

Subject—A panegyric of Ghantākarna.

Beginning

हरिः श्रीगणपतये नमः । अविघ्नमस्तु ।

वेताल ऋषिः । तृष्टुप् च्छन्दः । घण्टाकर्णरुद्रो देवता । ओन्नमो भगवते घण्टाकर्णाय कराळदंष्ट्राय विष्णुभक्ताय भूतप्रेतपिशा(च)क्षिरोगज्वरमन ?

सहस्रहस्तज्वालाभिर्दन्तात्विस्फोटकान्मुहुः ।
हाहाशब्दे चाट्टहासे घण्टाकर्ण नमाम्यहम् ॥

End

भूतेशं भूतसैन्यं भुवनभयहरं कृष्णवेतालपीठं
हाहाहीहीति वादैरतिरवसहितैरट्टहासैरुपेतम् ।
हस्तैस्माहस्रमख्यैर्ज्वलनशिखिशिखैस्माध्यदेहाधिरूढं
स्फोटं मन्दह्यमानं मुहुरहमनिशं घण्टकर्णं नमामि ॥

Colophon

घण्टाकर्णमन्त्रः ।

Author

Remarks—The following mantras on Kālī and a Nyāsa of Dvīdasākṣarī in Malayālam occur at the close of the Ms —

पिप्पलाद ऋषिः अनुष्टुपच्छन्दः । श्रीभद्रकालीदेवता ।

टङ्कं कपाल डमरु त्रिशूल
सम्बिभ्रती चन्द्रकलावतमा ।
पिङ्गोर्ध्वकेशी सितचारुदंष्ट्रा
भूयाद्विभूत्यै मम भद्रकाली ॥

कालि कालि महाकालि
भद्रकालि नमोऽस्तु ते ।
कुलञ्च कुलधर्मञ्च
माञ्च पालय पालय ॥

श्रीः । इति भद्रकालीमन्त्रम् ।

അഭിവാദ്യംചെയ്തിരിക്കുന്ന ആസനംസ്പൃശിച്ചു് ഗും ഗുരുഭ്യോ നമഃ എന്നു ശിരസ്സിങ്കലും വലത്തു മുലയുടെ മുകളിലും ഗം ഗണപതയെ നമഃ എന്നു് എടത്തു് മുലമുകളിലും പം പരമാ

ത്മനെ നമഃ എന്നു് ഹൃദയത്തിങ്കലും വന്ദിച്ചു് യന്നമഃ രന്നമഃ
എന്നു വലത്തെ കൈയ്യിലും എടത്തെ കൈയ്യിലും ന്യസിച്ചു്
സഹസ്രോല്കായസ്വാഹാ അസ്ത്രായഫട് എന്ന മന്ത്രംകൊണ്ടു്
രണ്ടുകരങ്ങളുടെ അകത്തും പുറത്തും എല്ലാടവുംകൂടെ ന്യസിച്ചു്
കാലത്രയവും ദിഗ്ബന്ധനവും അഗ്നിപ്രാകാരങ്ങളും ചെയ്തു്
മൂലമന്ത്രംകൊണ്ടു് മൂന്നുരു പ്രാണായാമവും മൂന്നുരു വ്യാപകവും
ചെയ്തു് ക്രുദ്ധോല്കായ സ്വാഹാ ഹൃദയായ നമഃ മഹോല്കായ
സ്വാഹാ ശിരസെസ്വാഹാ വീരോല്കായ സ്വാഹാ ശിഖാ
യൈ വഷട്, ദ്യുല്കായ സ്വാഹാ കവചായ ഹും സഹസ്രോ
ല്കായ സ്വാഹാ അസ്ത്രായഫട് ഇങ്ങനെ അംഗങ്ങളെ ന്യസി
ച്ചു് ഋഷിച്ഛന്ദോദേവതകളേയും ന്യസിച്ചു് മൂഥാവുതൊട്ടു്
പന്ത്രണ്ടുരു ദ്വാദശാക്ഷരമന്ത്രത്തെ ജപിച്ചു് ധ്യാനശ്ലോകവും
തൊഴുതു ജപിച്ചു് കിരീടമന്ത്രവും മൂന്നുരു ജപിച്ചു് ഠം അമൃതീ
ഭവ എന്നു് സുരഭിമുദ്രയും കാണിച്ചു് യഥാശക്തി ജപിച്ചു്
അവസാനത്തിങ്കൽ മൂലമന്ത്രംകൊണ്ടു് മൂന്നുരു പ്രാണായാമവും
വ്യാപകവും അംഗവും ചെയ്തു് ഋഷിച്ഛന്ദോ ദേവതകളെയും
ന്യസിച്ചു് അസ്ത്രമന്ത്രംകൊണ്ടു് കരവ്യാപകവും താലത്രയവും
ദിഗ്ബന്ധനവും അഗ്നിപ്രാകാരവും ചെയ്തു വന്ദിച്ചുകൊൾക—

**ओन्नमः किरीटकेयूरहारमकरकुण्डलालङ्कृतशङ्खचक्रगदाब्ज-
हस्तपीताम्बरधरश्रीवत्साङ्कितवक्षस्थलश्रीभूमिसहितस्वात्मज्योतिर्द्द-
यदीप्तिकराय सहस्रादित्यतेजसे नमः ।**

॥ कुण्डमूर्त्युपासनामन्त्रादि ॥

1213 Z KUNDAMŪRTYUPĀSANĀMANTRĀDI

Substance—Palm leaf Size—8″ × 2″. Leaves—3½

10 lines per page and 30 letters per line.
Script—Malayalam No of Granthas—60

Subject—Mantras recited in connection with the Bhadradīpa

Beginning

हरिः । श्रीगणपतये नमः ।
देवदेव जगन्नाथ विश्वकारण कारण ।
प्रसीद सर्वभावेन त्वामहं शरणं गतः ॥
समस्तजीवभूतानां शरीरान्तरवर्तिने ।
हिरण्यतेजसे तुभ्यं सर्वतेजोनिधे नमः ।
स्थानादस्माज्जगन्नाथ घृतपात्रे तव प्रभो ।
स्थिति सङ्कल्पयिष्यामि तदनुज्ञातुमर्हसि ।

മഹാവർത്തിയിങ്കലേക്കു് കുണ്ഡമൂർത്ത്യുപാസനാമന്ത്രങ്ങൾ

मायामय हृषीकेशमम मायागतं तमः ।
सर्वलोकप्रदीपात्मन् प्रकाशय नमोऽस्तु ते ॥

End.

വിളക്കുകൊളുത്തുമ്പോഴ്

देव देव जगन्नाथ എന്ന ശ്ലോകങ്ങൾ മൂന്നുംകൊണ്ടും സ്തുതിക്കേണം. ഇതു് കുണ്ഡത്തിൽ പ്രാർത്ഥനാമന്ത്രങ്ങൾ. പിന്നെ മഹാവർത്തികൊളുത്തുമ്പോൾ മായാമയ എന്ന മന്ത്രംകൊണ്ടു് പ്രാർത്ഥിക്കണം. പിന്നെ സ്തുതിപ്പാൻ സ്വാൽകഷ്ടമന്ത്യമഹസാം ഇത്യാരഭ്യ സംശ്രയേന്മധുസൂദനം ഇത്യന്തം. പൂജാവസാനങ്ങളിൽ സ്തുതിപ്പാൻ ജിതന്തേത്യാരഭ്യ ഹൃദി സദൈവ ത്വൽസ്വരൂപം മമേതി ഇത്യന്തം. ഹരിഃ

Colophon

Author

Remarks—This mantra is employed on the occasion of Bhadradīpa The invocatory rites are also described both in Sanskrit and Malayālam in the course of the work

॥ विष्णुस्तवः ॥

1213 A 1 VISNUSTAVA.

Substance — Palm leaf Size—8" × 2" Leaf—1
10 lines per page and 26 letters per line
Script—Malayālam No of Granthas—20.

Subject—Same as No 1165 B

Beginning

हरिः ।

नमः परस्मै पुरुषाय भूयसे
सदुद्भवस्थाननिरोधलीलया ।
गृहीतशक्तित्रितयाय देहिना-
मन्तर्भवायानुपलक्ष्यवर्त्मने ॥

भूयो नमस्सद्वृजिनच्छिदे सता-
मसम्भवायाखिलसत्त्वमूर्तये ।
पुंसां मुहुः पारमहस्य आश्रमे
व्यवस्थितानामनुमृग्यदाशुषे ॥

नमो नमस्तेस्त्वृषभाय सात्त्वतां
विदूरकाष्ठाय मुहुः कुयोगिनाम् ।

निरस्तसाम्यातिशयेन राधसा
स्वधामनि ब्रह्मणि रंस्यते नमः ॥

End:

यदङ्घ्र्यभिध्यानसमाधिधौतया
धियाभिपश्यन्ति हि तत्त्वमात्मनः ।
वदन्ति चैतत्कवयो यथारुच
स मे मुकुन्दो भगवान् प्रसीदतात् ॥

प्रचोदिता येन पुरा सरस्वती
वितन्वताजस्य सती स्मृतिं हृदि ।
स्वलक्षणा प्रादुरभूत् किलास्यतः
स मे ऋषीणामृषभः प्रसीदतात् ॥

भूतैर्महद्भिर्य इमाः पुरो विभु
र्निर्माय शेते यदमूषु पूरुषः ।
भुङ्क्ते गुणान् षोडश षोडशात्मकः
सोऽलङ्कृषीष्ट भगवान् वचांसि मे ॥

Colophon

Author—Vedavyāsa.

Remarks—This work is borrowed from the Bhāgavata.

॥ कनकधारास्तवः ॥

1213 A2 KANAKADHĀRĀSTAVA.

Substance—Palm leaf. Size—8" × 2". Leaves—2½.

9 lines per page and 26 letters per line. Script—Malayalam No of Granthas—35.

Subject etc —Same as No 1147 D

Remarks—The rites to be observed by one who desires the attainment of prosperity are mentioned in the following stanzas —

नाभ्यक्तोऽद्यान्न नग्नः सलिलमवतरेन्न स्वपेद्वाशुचिः स-
न्नाभ्यङ्ग्यान्नैव चाद्यात्तिलरुहलवणे केवले नैव दोषाम् ।
वक्त्रे लिम्पेद्वदेन्नानृतमपि मलिनः स्यान्न बिल्वाम्बुजन्म-
द्रोणान्नो धारयेत् के भुवनमपि वृथैवालिखेदिन्दिरार्थी ॥

दुष्टां कष्टान्ववायां कलहकलुषितां मार्गदृष्टामदृष्टा-
मन्यासक्तामभक्तामतिविपुलकृशाङ्गीमतिह्रस्वदीर्घाम् ।
रोगार्तां भोगलोलां प्रतिपुरुषचलां राजकान्तामकान्तां
काकाक्षीमेकचारां ग्रहकुसुमयुतां न स्पृशेदिन्दिरार्थी ॥

सुविमलवस्त्रः स्याच्छुद्धमाल्यानुलेपा-
भरणवमनदेहो मुख्यगन्धोत्तमाङ्गः ।
सुविशदनखदन्तः शुद्धधीर्विष्णुभक्तो
विमलरुचिरशय्यः स्याच्चिरायेन्दिरार्थी ॥

शान्तः शश्वत् स्मितमधुरपूर्वाभिभाषी दयार्द्रो
देवाचार्यातिथिदहनपूजारतः पुण्यशीलः ।
नित्यस्नायी नियमनिरतः प्रत्यगाशामुखाशी
मन्त्री वर्णाश्रमदृढरतिः स्याच्चिरायेन्दिरार्थी ॥

श्रीमन्त्रभक्तः श्रितविष्णुदीक्षः
श्रीसूक्तजापी शिवधीः सुशीलः ।

- स्वदारतुष्टो मितभाषणाशी
 लोकप्रियः स्याच्चिरमिन्दिराथी ॥

जपन् कनकधाराख्यं स्तवराजमहर्मुखे ।
निजधर्मे रतो वेगादिन्दिरामन्दिरायते ॥

The following verses in praise of Śāstā, Śani, and Subrahmanya are cited at the close of the Ms —

सर्वशास्त्रमयो यस्तु सर्वलोकदयापरः ।
सर्वदुःखप्रशमनस्तस्मै शास्त्रात्मने नमः ॥

कोदण्डी कुण्डली खड्गी बलिहारी शरीसुखी ।
नीलनीरदनीलाङ्गः शास्ता रक्षतु मां सदा ॥

चण्डश्चण्डीशकण्ठद्युतिरमितजटाभारतुङ्गोत्तमाङ्गो
 द्राघीयःश्मश्रुजालोज्ज्वलमुखकमलो मङ्ग... पिङ्गलाक्षः
चण्डांशोरंशजन्मा कृशतनुरतिशूरः शनैस्सञ्चरिष्णु-
 र्ब्रह्मण्यः क्रूरकर्मा मम शनिरशनैः श्रेयसे बोभवीतु ॥

तुरग इव हरेऽहं धुर्ययुक्षि त्वयैव
 प्रतिदिनमिह तामेवास्तखेदं वहामि ।
न खलु तदनुवृद्धिं तद्विमोक्षश्च याचे
 स्वयमिह पुर एता सत्पदव्या नयास्मान् (?) ॥

षडाननं कुङ्कुमरक्तवर्णं
 महामतिं दिव्यमयूरवाहनम् ।
रुद्रस्य सूनुं सुरसैन्यनाथं
 गुहं सदाहं शरणं प्रपद्ये ॥

॥ मानसस्नानम् ॥

1213 A3 MĀNASASNĀNAM

Substance — Palm leaf Size—8″ × 2″. Leaf—1
10 lines per page and 29 letters per line
Script—Malayalam No of Granthas—15

Subject—The excellencies of meditation on God

Beginning

श्रीकृष्णाय नमः ।

स्वस्थितं पुण्डरीकाक्षं चिन्तयेत्पुरुषोत्तमम् ।
अनन्तादित्यसङ्काशं वासुदेवं चतुर्भुजम् ॥
शङ्खचक्रगदापद्मपीताम्बरधर हरिम् ।
श्यामलं शान्तहृदय प्रसन्नवदनं शुभम् ॥
दिव्यचन्दनलिप्ताङ्गं चारुहासं शुभेक्षणम् ।
वनमालापरिवृतं नारदादिभिरर्चितम् ॥
केयूरहारिणं देव सुवर्णमकुटोज्ज्वलम् ।
अनेकरत्नसंच्छन्नस्फुरन्मकरकुण्डलम् ॥

End

इळा भागीरथी गङ्गा पिङ्गला यमुना स्मृता ।
तयोर्मध्यगता नाडी सुषुम्नाख्या सरस्वती ॥
ज्ञानहृदे ध्यानजले रागद्वेषमलापहे ।
यः स्नाति मानसे तीर्थे स याति परमां गतिम् ॥
अच्युतोऽहमनन्तोऽह गोविन्दोऽहमह हरिः ।
अनन्तोऽहमशेषोऽहमजोऽहममृतोऽस्म्यहम् ॥

नित्योऽहं निर्विकल्पोऽहं निराकारोऽहमव्ययः ।
सच्चिदानन्दरूपोऽहं परिपूर्णोऽस्म्यहं सदा ॥
ब्रह्मैवाहं न संसारी मुक्तोऽहमिति भावयेत् ।
अशक्नुवन् भावयितुं वाक्यमेतदुदीरयेत् ॥
नवनीलघनश्यामं नलिनायतलोचनम् ।
स्मरामि पुण्डरीकाक्षं तेन स्नातो भवाम्यहम् ॥

Colophon

Author

Remarks — The work deals at length with the attainment of purification by sheer dint of Dhyāna in case one is disabled from taking the usual bath That attainment is based on the belief that arteries in the human body are representative of the great rivers of Bhāratakhanda.

॥ धन्वन्तरिस्तवः ॥

1213 A4 DHANVANTARISTAVA.

Substance—Palm leaf Size—8″ × 2″. Leaf—1. 10 lines per page and 32 letters per line. Script —Malayālam No of Granthas—20.

Subject—Same as No. 1147 V.

Beginning:

लक्ष्मीपते ललितकान्तकलत्रयकान्ते
लक्ष्मीकलाञ्जनभुविक्रमणप्रयोगे ।

मन्वन्तरे विविधविग्रह शार्ङ्गधन्वन्
धन्वन्तरे मधुरिपो भगवन् प्रसीद ॥

येनामयाविजनजीवनलम्पटेन
क्षीरार्णवादमृतकुम्भभृतोद्गामि ।
तस्मै जगत्त्रयमहाभिषजे नमस्ते
धन्वन्तरे मधुरिपो भगवन् प्रसीद ॥

End

सिञ्चन्निम निजकराञ्चलसंभृतेन
रोगाभिभूतममृतेन रमापते माम् ।
गोविन्द नन्दय मुकुन्द जगन्निवास
धन्वन्तरे मधुरिपो भगवन् प्रसीद ॥

नारायणाय नतलोकशिवङ्कराय
विश्वम्भराय विनतासुतवाहनाय ।
दामोदराय दयमाननिधे नमस्ते
धन्वन्तरे मधुरिपो भगवन् प्रसीद ॥

Colophon

Author :

Remarks—At the close of the Ms. occurs the following stanza

"कृष्णो नः शिखिपिञ्छसयतकचो बालाकृतिः कर्णयो-
स्तन्मुद्रामकरोज्वलोल? कटकं वक्त्रं वहन् दक्षिणे ।
दोर्वामं सदरं कटौ विनिदधल्लम्बाग्रमर्धोरुक
बिभ्रद्दीप्तविभूषणः सुलक्षितो रक्षेत् स्थितो गोव्रजे" ॥

॥ रामचन्द्रस्तवः ॥

1213 A5 RĀMACANDRASTAVA

Substance—Palm leaf Size—8" 2" Leaves—2
10 lines per page and 30 letters per line
Script—Malayāḷam No of Granthas—35

Subject—Same as No 1169 J

Beginning

हरिः । श्रीगणपतये नमः । शुभमस्तु ।

पटुतरजलदौघध्वानमादाय चाप
पवनजवनमेकं बाणमाकृष्य तूणात् ।
अभयवचनदायी सानुजः सर्वतो मे
रणहृतदनुजेन्द्रो रामचन्द्रः सहायः ॥

शरणमुपगतानां सर्वदा देवतानां
प्रथममभयमुक्त्वा रावणोपद्रुतानाम् ।
दशरथनृपभार्याप्राप्तदायादभावो
रघुकुलतिलको मे रामचन्द्रः सहायः ॥

सदसि दशरथस्य प्राप्तसाकेतभूमेः
सपदि कुशिकसूनोरात्तसर्वास्त्रशस्त्रः ।
पथि मुनिवरवाक्यात्ताटकाया निहन्ता
रणदलितसुबाहू रामचन्द्रः सहायः ॥

End

समरभुवि समस्तान् राक्षसान् साधु हत्वा
सहजनककुमार्या पुष्पकं पूरयित्वा ।

मकलहरिगणेन्द्रैः प्राप्य माकेतभूमि
स्वयमधिगतराज्यो रामचन्द्रः महायः ॥

सुरतरुवरमूले पर्णसिंहासनस्थो
वितरणमतिदक्षो वीक्ष्य सीतां कृतात्मा ।
हनुमति कृतहारो हारकेयूरभूषा-
मणिमकुटमनोज्ञो रामचन्द्रः महायः ॥

असुरकुलकृशानुर्मानसाम्भोजभानुः
सुरवरनिकराणामग्रणीरश्चितात्मा ।
अगणितगुणसीमा नीलमेघौघधामा
नमदमरमुनीन्द्रो रामचन्द्रः महायः ॥

श्रीरामचन्द्राय नमः ।

Colophon

Author

Remarks—The work is a compendium of the Rāmāyana

॥ हनुमद्द्वादशकम् ॥

1213 A6. HANUMADDVĀDAŚAKAM

Substance — Palm leaf Size—8″ × 2″ Leaf—1
11 lines per page and 26 letters per line.
Script—Malayālam No of Granthas—18

Subject etc —Same as No 1210 U

Remarks—This work is entitled as Āñjaneyastava in RCMPL.

॥ पूजान्तस्तुतिः ॥

1213 A7 PŪJANTASTUTI

Substance — Palm leaf Size—8" 2" Leaf—1
12 lines per page and 18 letters per line
Script—Malayālam No of Granthas—13

Subject—Same as No 1105 B

Beginning

हरिः ।

स्वामिन्ननन्त पुरुषोत्तम पुष्कराक्ष
भक्तार्त्तिभञ्जन हरे भगवन्मुरारे ।
श्रीमन्नृसिंह नरलोकविडम्बनात्त-
लीलावतार तरणीन्दुविलोचनेश ॥

लक्ष्मीमहीकरसरोरुहलालिताङ्घ्रि-
पद्माप्रमेय मधुभञ्जन मञ्जुदेप ।
सन्मङ्गलप्रद विभो भजतां तवाङ्घ्रि-
पङ्केरुहस्मरणमात्रभवाब्धिनाश ॥

नित्येश वन्द्य नवनीरदनीलवर्ण-
स्वर्णाम्बरोज्ज्वल सुपर्णरथामरेश ।
नारायणाच्युत विभो नवनीतचोर
श्रीकेशव श्रुतिशिरोभिरदृश्यमूर्ते ॥

End

त्रैगुण्यमूर्तिपरिवर्तितलोकलीला-
प्राबल्यनम्रसुरसङ्घमुनीन्द्रवन्द्य ।

इन्द्रानुजेन्द्रदनुजेन्द्रकुमारमान्द्र
स्तोत्रस्तुतस्तुतिनिधे मयि धेहि रक्षाम् ॥

Colophon

पूजान्ते स्तुति हरिः ।

Authoi

Remarks—The woik is styled Nisimhastava in RCMPL At the end of the Ms occuis the following verse —

लक्ष्मीपते ललितचारुकलायकान्ते
लक्षीकृतार्तजनभूरिकृपापयोधे ।
मन्वन्तरे विविधाविग्रह शार्ङ्गधन्वन्
धन्वन्तरे मधुरिपो भगवन् प्रसीद ॥

॥ रामस्तवः ॥

1213 A8 RĀMASTAVA

Substance—Palm leaf Size—8″ 2″. Leaves—2 10 lines per page and 26 letteis per line Sciipt—Malayālam No of Granthas—32

Subject—Same as No 1169 I

Beginning

श्रीगणपतये नमः ।
अविघ्नमस्तु ।

ततो वैश्रवणो राजा यमश्चामित्रकर्शनः ।
सहस्राक्षो महेन्द्रश्च वरुणश्च परन्तपः ॥

षडर्धनयनः श्रीमान् महादेवो वृषध्वजः ।
कर्ता सर्वस्य लोकस्य ब्रह्मा ब्रह्मविदा वरः ॥
एते सर्वे समागम्य विमानैः सूर्यसन्निभैः ।
आगम्य नगरी लङ्कामभिजग्मुश्च राघवम् ॥
ततस्सहस्ताभरणान् प्रगृह्य विपुलान् भुजान् ।
अब्रुवन् त्रिदशश्रेष्ठाः प्राञ्जलिं राघवं स्थितम् ॥
कर्ता सर्वस्य लोकस्य श्रेष्ठो ज्ञानवतां प्रभुः ।
उपेक्षसे कथं सीतां पतन्तीं हव्यवाहने ॥

End

महेन्द्रश्च कृतो राजा बलिं बद्ध्वा महासुरम् ।
सीता लक्ष्मीर्भवान् विष्णुर्देवः कृष्णः प्रजापतिः ॥
वधार्थं रावणस्येह प्रविष्टो मानुषीं तनुम् ।
तदिदं नः कृतं कार्यं त्वया धर्मभृतां वर ॥
निहतो रावणो राम प्रहृष्टो दिवमाक्रम ।
अमोघं बलवीर्यं ते न ते मोघं पराक्रमम् ॥
अमोघदर्शनं राम न ते मोघस्तव स्तवः ।
अमोघास्ते भविष्यन्ति भक्तिमन्तस्तु ये नराः ॥
ये त्वां देव ध्रुवं भक्ताः पुराणं पुरुषोत्तमम् ।
प्राप्नुवन्ति सदा कामानिह लोके परत्र च ॥
इमामार्षं स्तवं दिव्यमितिहासं पुरातनम् ।
ये नराः कीर्तयिष्यन्ति नास्ति तेषां पराभवः ॥
श्रीरामाय नमः ।

Colophon,

Authoi

Remaiks—This woik is not noticed in RCMPL It is boiiowed fiom the Vālnīkiiāmāyana

---

॥ मातृकान्यासः ॥

1213 A9 MATRKĀNYĀSA

Substance — Palm leaf Size—8″ × 2″ Leaf—1
11 lines pei page and 30 letters per line
Sciipt—Malayālam No of Gianthas—40

Subject—The pieliminaiy rites of meditation on Kisna

Beginning

हरिः । श्रीगणपतये नमः ।

श्रां, ह्रां, क्लां, अङ्गुष्ठाभ्यां नमः । श्रीं, ह्रीं, क्लीं, तर्जनीभ्यां नमः । श्रूं, ह्रुं क्लूं, मध्यमाभ्यां नमः । श्रें, ह्रें, क्लें, अनामिकाभ्यां नमः । श्रौं, ह्रौं, क्लौं, कनिष्ठिकाभ्यां नमः । श्रः, ह्रः, क्लः, करतलकरपृष्ठाभ्यां नमः । एतैरेव षडङ्ग पुनर्दिव्यनामाभिर्मातृकास्थानेषु न्यासं कुर्यात् । नारायणाय नमः । जगत्साक्षिणे नमः ।

End

आनिर्देश्याय नमः, निरालम्बाय नमः, नित्यानन्दामृताकाराय नमः, अनन्ताय नमः, परमात्मने नमः, सर्वाधिकपदप्रदाय नमः, एतैर्नामभिर्मूर्धादिपादान्तं पादादिमूर्धान्त विन्यस्य मातृकास्थानेषु पुनर्ध्यायेत् ।

ब्रह्मानन्दामृताब्धौ कमलवनवृते+श्रीक्षमेशम् । शुभमस्तु । हरि ।

Colophon

Author

Remarks—108 *Anganyāsas* pertaining to Kṛṣnamantradhyāna are dwelt upon herein

॥ लक्ष्मीनिवासस्थलम् ॥

1213 A10 LAKSMĪNIVĀSASTHALAM

Substance—Palm leaf Size—8″ × 2″ Leaves—3
11 lines per page and 28 letters per line
Script—Malayālam No of Granthas—50

Subject—Ascertainment of the abode of Goddess Lakṣmī

Beginning

श्रीगणपतये नमः ।

कीदृशे पुरुषे तात स्त्रीषु वा पुरुषर्षभ ।
श्रीः पद्मा वसते नित्यं तन्मे ब्रूहि पितामह ।

श्रीभीष्मः—

अत्र ते वर्तयिष्यामि यथावृत्तं यथाश्रुतम् ।
रुक्मिणी देवकीपुत्रसन्निधौ पर्यपृच्छत ॥

नारायणस्याङ्गगतां ज्वलन्तीं
दृष्ट्वा श्रियं पद्मसमानवक्त्राम् ।
कौतूहलाद्विस्मितचारुनेत्रा
पप्रच्छ माता मकरध्वजस्य ॥

End

नग्नो नावतरेदम्भस्तैलाभ्यक्तो न भक्षयेत् ।
हरिद्रां न मुखे लिम्पेन्न सुप्यादशुचि: क्वचित् ॥
न वृथा विलिखेद् भूमि न बिल्वं द्रोणमम्बुजम् ।
धारयेन्मूर्ध्नि नैवाद्याल्लोणं तैलञ्च केवलम् ॥
मलिनो न भवेज्जातु कुत्सितान्नं न भक्षयेत् ।
द्रोणपङ्कजबिल्वानि पद्भ्यां जातु न लङ्घयेत् ॥
सहान्देवीमिन्द्रवल्लीं श्रीदेवीं विष्णुवल्लभाम् ।
कन्यां जम्बूप्रवालञ्च धारयेन्मूर्ध्नि सर्वदा ॥
इत्याचारपरो नित्यं विष्णुभक्तो दृढव्रत ।
श्रियमाप्नोति महतीं देवानामपि दुर्लभाम् ॥

Colophon

इत्यानुशासनिके त्रयस्त्रिंशोऽध्यायः ।

Author

Remarks—The work is borrowed from the Mahābhārata It is styled Bhaktamāhātmya in RCMPL

— —

॥ नारायणकवचम् ॥

1213 A 11 NĀRĀYANAKAVACAM

Substance—Palm leaf Size—8″×2″ Leaves—3½
10—11 lines per page and 26 letters per line
Script—Malayālam No of Granthas—50.

Subject etc —Same as No 1171 A

॥ गजेन्द्रमोक्षः ॥

1213 A 12 GAJENDRAMOKSA

Substance—Palm leaf Size—8" 2" Leaves—7
11 lines per page and 26 letters per line
Script—Malayālam No of Granthas—125

Subject—Same as No 1165 B

Beginning etc —Same as No 1146 G

॥ गायत्रीव्याख्या(केरळभाषा) ॥

1213 A 13 GĀYATRĪVYĀKHYĀ

Substance—Palm leaf Size—8"×2" Leaf—1
12 lines per page and 22 letters per line.
Script—Malayālam No of Granthas—10

Subject—Exposition of Gayatrī, in Malayālam

Beginning

हरिः ।

नः अस्माकं धियः मतीः यः प्रचोदयात् നമ്മുടെ ബുദ്ധിക-
ളെ യാതൊരു പരമാത്മാവു് പ്രചോദനം ചെയ്യുന്നതു്
ധര്‍മ്മാദി പുരുഷാര്‍ത്ഥങ്ങളെ വിഷയീകരിച്ചു് പ്രേരിപ്പിക്കുന്ന

तस्य सवितुः देवस्य यत् भर्गः—

End

അങ്ങനെത്തെ പരമാത്മാവിന്റെ ഭര്‍ഗ്ഗസ്സു് എന്നു് ഭവ-
ബീജഭര്‍ജ്ജനമായുള്ള തേജസ്സു് സംസാരബീജത്തെ വറുത്തുകള-
യുന്ന തേജസ്സു് എന്നു് നിത്യനിര്‍മ്മലമായി ചൈതന്യകരമായി

രിക്കുന്ന സ്വരൂപം അതു് യാതൊന്നു് വരേണ്യമെന്നു് വര
ണീയമെന്നു് ആനന്ദാത്മകം അങ്ങിനെയൊ സ്വരൂപത്തെ ധ്യാ
നഞ്ചെയ്യായിവരേണം ശ്രീഃ

Colophon

Author

Remarks—This is a commentary on the Gāyatrī-mantra, explanatory of each word therein

---

॥ सूर्यस्तवः ॥

1213 A14 SŪRYASTAVA

Substance — Palm leaf Size—8″ × 2″ Leaf—1. 10 lines per page and 28 letters per line Script—Malayālam No of Granthas—16

Subject—Same as No 1147 A

Beginning

श्रीगणपतये नमः ।

धृतपद्मद्वयं भानुं तेजोमण्डलमध्यगम् ।
सर्वाधिव्याधिशमनं छायाश्लिष्टतनुं भजे ॥

उद्यन्नद्य विवस्वानारोहन्नुत्तरां दिवं देवः ।
हृद्रोग मम सूर्यो हरिमाणश्चाशु नाशयतु ॥

निमिषार्धेनैकेन द्वे च शते द्वे तथा सहस्रे द्वे ।
क्रमणाय योजनानां नमोऽस्तु ते नळिननाथाय ॥

शिवरूपाज्ज्ञानमहं त्वत्तो मुक्तिं जनार्दनाकारात् ।
शिखिरूपाच्चैश्वर्यं भवतश्चारोग्यमिच्छामि ॥

End

येन विनान्धं तिमिरं जगदेतद्यत्र सति धृतबोधम् ।
त नळिनीभर्तारं हन्तारश्चापदामीडे ॥

यस्य सहस्राभीशोरभीशुलेशो हिमांशुबिम्बगतः ।
भासयति नक्तमखिलं खिलयतु स विपद्गणानखिलान् ॥

वाताश्मरीदुर्नामत्वग्दोषमहोदरप्रमेहांश्च ।
ग्रहणीभगन्दरमुखान्महारुजोऽपि त्वमिन हरसि ॥

त्व शरणं त्वं माता त्वं तातस्त्व धनं त्वमाचार्यः ।
त्वं त्राता त्व हर्ता विपदामर्क प्रसीद मम ।

Colophon

इत्यार्याद्वादशकं साम्बस्य पुरो नभस्तलात्पतितम् ।
पठतां भाग्यसमृद्धिः समस्तरोगक्षयश्च स्यात् ॥
हरिः ।

Author

Remarks—The title Āryādvādaśakam given in the colophon is based on the fact that the work comprises 12 verses in Āryā metre. The colophon manifests that the *stotra* fell from heaven in front of Sāmba

---

॥ सौराष्टकम् ॥

1213 A15 SAURĀṢṬAKAM.

Substance—Palm leaf Size—8″ × 2″ Leaf—1. 10 lines per page and 30 letters per line. Script—Malayāḷam. No. of Granthas—18.

Subject etc —Same as No 1147 E.

Remarks—After the colophon occur following verses

नमः सवित्रे जगदेकचक्षुषे
जगत्प्रसूतिस्थितिनाशहेतवे ।
त्रयीमयाय त्रिगुणात्मधारिणे
विरिञ्चनारायणशङ्करात्मने ॥

वैदैर्ज्योतिर्मयत्वे जगति परिणमद्भिस्सदात्मप्रसूतै-
र्ध्वान्तं निर्मूलयद्भिर्बुधजनहृदये बोधमात्र दधानैः ।
त्रैलोक्य भामयन्तं रविमखिलसुरैःस्तूयमानप्रभावं
मृत्युग्रस्तात्मजनाऽन्नो हृदयरुगगदंकारमाद्य प्रपद्ये ॥

ध्येयः सदा सवितृमण्डलमध्यवर्ती
नारायणः सरसिजासनसन्निविष्टः ।
केयूरवान्मकरकुण्डलवान् किरीटी
हारी हिरण्मयवपुर्धृतशङ्खचक्रः ॥

हरिः ।

॥ नित्यकर्मविधिः (केरळभाषा) ॥

1213 A16 NITYAKARMAVIDHI
(Malayālam)

Substance—Palm leaf Size—8″ × 2″ Leaves—2 10 lines per page and 26 letters per line Script —Malayāḷaṃ No of Granthas—16,

Subject—Description of daily rites

Beginning

കാലത്തു സ്നാനം ചെയ്വാൻ കടവിൽ ഇറങ്ങി രണ്ടൂഴം കാലു കഴുകി ആചമിച്ചു് മുഴുകി കുളിച്ചു് കുളിപ്പാൻ മന്ത്രം ആപൊ ഹിഷ്ഠാമയൊ ഭുവഃ താനഊർജ്ജെദധാതന മഹെരണായ ചക്ഷസെ യൊവശ്ശിവതമൊരസഃ തസ്യഭാജയതെഹനഃ ഉശതീരിവമാതരഃ തസ്മാഅരംഗമാമവഃ യസ്യക്ഷയായ ജിന്വഥ ആപൊജനയഥാചനഃ ഇമ്മന്ത്രം ചൊല്ലിത്ത ളിച്ചു് കുളിക്കണം

End

പൂണൂൽ പൊട്ടിയാൽ പകരുവാൻ കാവു് കഴുകി ആച മിച്ചു് മന്ത്രം ചൊല്ലിത്തളിച്ചു് പൂണൂവിട്ടു് കൊള്ളുക ഉപ സ്ഥാനത്തുന്നേരത്തു് എങ്കിൽ ഊത്തു് ഗായത്രിജപിച്ചു് പൂണൂ ലിട്ടുകൊള്ളുക ഊണു് കഴിഞ്ഞിട്ടു് മൂന്നിഴയും പൊട്ടിയെ ങ്കിൽ കുളിച്ചു് കാലുകഴുകി ആചമിച്ചു് മന്ത്രംകൊണ്ടു് തളിച്ചു് പൂണൂൽ പകൎന്നു കൊള്ളു

Colophon .

Author

Remarks — The work ablutionary and describes customary rites

॥ शिवभुजङ्गप्रयातम् ॥

1213 A17 ŚIVABHUJANGAPRAYĀTAM.

Substance—Palm leaf Size—8″ × 2″ Leaves—1½
10 lines per page and 26 letters per line
Script—Malayālam No, of Granthas—12.

Subject—Same as No 1147 K

Beginning etc —Same as No 1172 R

॥ महिम्नःस्तवः ॥

1213 A18 MAHIMNASTAVA

Substance—Palm leaf Size—8″ × 2″ Leaves—1½
10 lines per page and 26 letters per line
Script—Malayalam No of Granthas—13

Subject—Same as No 1147 G

Beginning

शिवाय नमः ।

जय शङ्कर पार्वतीपते मृड शम्भो शशिखण्डमण्डन ।
मदनान्तक भक्तवत्सल प्रियकैलास दयासुधाम्बुधे ॥
सदुपायकथास्वपण्डितो हृदये दुःखशरेण खण्डितः ।
शशिखण्डशिखण्डमण्डनं शरण नौमि शरण्यमीश्वरम् ॥
महतः परितः प्रसर्पतस्तमसो दर्शनभेदिनो भिदे ।
दिननाथ इव स्वतेजसा हृदये व्योम्नि मनागुदेहि नः ॥

End

शरण तरुणेन्दुशेखरः शरणं मे गिरिराजकन्यका ।
शरणं पुनरेव तावुभौ शरणं नान्यदुपैमि दैवतम् ॥
उपमन्युकृतं शिवस्तवं पठतः शम्भुसमीपभक्तितः ।
अभिवाञ्छितभाग्यसम्पदा परमायुः प्रददाति शंकरः ॥

Colophon.

महिम्नस्तवः समाप्तः । शुभमस्तु ।

Author—Upamanyu

Remarks—Three leaves in the end embody a commentary on Gāyatrī, in Malayālam

---

(To be continued)

